CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शोध

SHODH



अनुसन्धानात्मक पत्रिका

नेपाल संस्कृत विश्वविद्यालय प्राध्यापक सङ्घ

केन्द्रीय समिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेपाल संस्कृत विश्वविद्यालय प्राध्यापक सङ्घ

केन्द्रीय समिति

सभापति

शान्तिकृष्ण अधिकारी

उपसभापति

हेमनारायणलाल कर्ण

महासचिव

शम्भुराज गौतम

सचिव

योगराज शर्मा

कोषाध्यक्ष

आनन्दमणि रिजाल

सदस्यहरु

मोहनप्रसाद पोखेल

दामोदर गौतम

खगेश्वर गौतम

डिल्लीप्रसाद पाण्डेय

जर्मन चौधरी

प्रकाश तिवारी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्र·वि·वि·६·

शोध

SHODH

अनुसन्धानात्मक पत्रिका

वर्ष - १ अङ्क - १ २०६९ वैशाख ५

संरक्षक
शान्तिकृष्ण अधिकारी

जर्नल प्रकाशन समिति
संयोजक
शम्भुराज गौतम
सदस्य
आनन्दमणि रिजाल
मोहनप्रसाद पोखेल
जर्मन चौधरी
प्रकाश तिवारी

सम्पादन समूह
प्रधान सम्पादक
शम्भुराज गौतम
सम्पादक
मोहनप्रसाद पोखेल
सुमोदवर्धन कौण्डिन्न्यायन
बिमला शर्मा
केशवशरण अर्याल

नेपाल संस्कृत विश्वविद्यालय प्राध्यापक सङ्घ
केन्द्रीय समिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकाशक :
नेपाल संस्कृत विश्वविद्यालय प्राध्यापक संघ
केन्द्रीय समिति
प्रदर्शनी मार्ग, काठमाडौं
फोन नं. ४२२५६०५

प्रकाशन मिति : २०६९ वैशाख ५ गते, एकादशी

Acc. 30804 / 30405

© प्रकाशक

प्रकाशित प्रति : १०००

मूल्य : रु. ३००.००

मुद्रक :
एपेक्स प्रिन्टिङ्ग प्रेस प्रा.लि.
तीनकुने, काठमाडौं
फोन नं.: ०१-४१११८११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सभापतिको कलमबाट

नेपाल संस्कृत विश्वविद्यालय प्राध्यापक संघ विश्वविद्यालयको समुत्थान, प्राध्यापकहरूको हकहित एवं प्राज्ञिक उन्नयन गर्ने उद्देश्यले स्थापित संस्था हो । चौथो राष्ट्रिय अधिवेशनबाट निर्वाचित वर्तमान केन्द्रीय समिति कार्यभार सम्हालेका मितिदेखि नै संघको उद्देश्यानुरुप क्रियाशील छ । संस्कृत विश्वविद्यालय र अन्तर्गतका प्राध्यापकहरूलाई समस्यामुक्त बनाउनका लागि प्राध्यापक संघ प्रयत्नशील छ । यसै सन्दर्भमा प्राध्यापकहरूमा रहेको प्राज्ञिक खुबीलाई उजागर गर्ने प्रयासस्वरुप "शोध" नामक यो अनुसन्धानमूलक पत्रिका प्रकाशन गरिएको छ ।

नेपालको शिक्षा क्षेत्र लामो समयदेखि आन्दोलन, हडताल र तालाबन्दीका कारण समस्याग्रस्त छ । यस्तो अवस्था आउन नदिन सम्बन्धित निकायहरू जिम्मेवारीका साथ सचेत हुनु पर्दछ । आधुनिकीकरण एवं विश्वव्यापीकरण बन्दै गएको २१औं शताब्दीको शिक्षा प्रणालीसँग प्रतिस्पर्धा गर्न सक्ने तथा आधुनिक प्रविधिमैत्री वातावरण निर्माण गर्न तल्लीन हुनु पर्ने संघ संस्थाहरू बाटो बिराएको अवस्थामा छन् । अझ संस्कृत शिक्षा त विभिन्न कारणले संकटमा छ । हाम्रा संस्कृति, परम्परा र रीतिरिवाजका साथै प्राचीन ग्रन्थहरूको संरक्षण, संवर्धन एवं प्रवर्धन गर्दै विश्वव्यापी बनाउनु पर्ने चुनौती हाम्रा सामु छन् । समग्र विश्वविद्यालयकै ध्यान यतातर्फ उन्मख हुनुपर्ने अहिलेको आवश्यकता हो ।

मुलुक अहिले संविधान निर्माणप्रक्रियामा छ । समयमै संविधान जारी गरी जनताको चाहना बमोजिमको शासनव्यवस्था कायम हुनेछ र शान्तिप्रक्रिया पूर्णतः टुंगो लाग्नेमा हामी विश्वस्त छौं । अब आउने संविधानले शिक्षा सबै नेपालीको पहुँचमा पुऱ्याई सर्वसुलभ एवं व्यावहारिक शिक्षा लागू हुने नै छ । सबै भाषाभाषीका शिक्षालाई संरक्षण गर्ने क्रममा संस्कृत शिक्षाले प्रमुख प्राथमिकता पाउनु पर्दछ भन्ने हाम्रो धारणा छ ।

गोष्ठीसञ्चालन, जर्नलप्रकाशन र संस्कृतशिक्षाको विकासका निम्ति आवश्यक कार्यक्रमहरू अगाडि बढाउने कार्यहरू नेपालसंस्कृत विश्वविद्यालय प्राध्यापक संघको प्राथमिकतामा छन् । यसै क्रममा यो जर्नल प्रकाशन गरिएको छ । हाम्रो उत्साहलाई सफल बनाउन सहयोग गर्दै जर्नलमा अमूल्य लेख दिनुहुने विद्वान् लेखकहरू, जर्नल प्रकाशन समिति र सम्पादनसमूहलाई हार्दिक धन्यवाद ज्ञापन गर्दछु । साथै जर्नल प्रकाशनका क्रममा आर्थिक सहयोग गर्ने नेपाल संस्कृत विश्वविद्यालय, विज्ञापनदाताहरू र प्रत्यक्ष परोक्षरुपमा सहयोग गर्नुहुने सबैलाई धन्यवाद दिन चाहन्छु । भविष्यमा पनि यस्तै सहयोगको निरन्तर अपेक्षा गर्दै नववर्ष २०६९ को उपलक्ष्यमा सम्पूर्ण प्राध्यापक, कर्मचारी, विद्यार्थी एवम् संस्कृत प्रेमी महानुभावहरूमा हार्दिक मंगलमय शुभकामना व्यक्त गर्दछु । अस्तु ।

जयतु संस्कृतम् ।

शान्तिकृष्ण अधिकारी
सभापति
नेपाल संस्कृत विश्वविद्यालय प्राध्यापक संघ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्पादकीय

नेपाल संस्कृत विश्वविद्यालय प्राध्यापक संघ, केन्द्रीय समितिद्वारा पहिलो पटक प्रकाशित यो 'शोध' नामक अनुसन्धानात्मक पत्रिका प्रकाशनार्थ विभिन्न विषयगत विधाका विद्वान् प्राध्यापकहरूद्वारा गहिरो अभिरुचिपूर्वक अनुसन्धानमूलक लेखहरू उपलब्ध गराई सहयोग गर्नु भएकोमा सर्वप्रथम हामी हार्दिक आभार व्यक्त गर्न चाहन्छौं ।

नेपाल संस्कृत विश्वविद्यालयमा अध्ययन अध्यापन गरिने पौरस्त्य एवं समसामयिक विधामा शोध कार्य गरी तत्तद् विषयका गहकिला र समाजोपयोगी विषयहरूलाई प्रकटीकरण गर्ने एवं विकास र विस्तार गर्ने उद्देश्यका साथै नेपाल संस्कृत विश्वविद्यालयमा अध्यापनरत प्राध्यापकहरूको वृत्तिविकासमा सहयोग पुग्ने अनुसन्धानात्मक लेखहरूलाई प्रकाशन गर्ने उद्देश्यसमेतले यो शोध नामक पत्रिका प्रकाशन गरिएको हुँदा पत्रिकाका लागि लेखहरू छनोट गरिँदा उपर्युक्त विषयलाई समेत ध्यान दिइएको छ । हाम्रो अनुरोधलाई स्वीकार गरी विभिन्न विषयमा अनुसन्धानात्मक लेखहरू उपलब्ध गराउनु हुने कतिपय प्राध्यापकहरूका लेख प्रकाशनयोग्य हुँदा हुँदै पनि माथि उल्लिखित कारणवश यो पहिलो अङ्कमा प्रकाशन गर्न असमर्थ भए तापनि छनोटमा परेका अनुसन्धानमूलक लेखहरू दोस्रो अङ्कमा प्रकाशन गरिने बेहोरा सादर अनुरोध गर्दछौं । शोधपत्रिकामा प्रकाशनार्थ प्राप्त कतिपय लेखहरूले आधुनिक अनुसन्धान प्रविधिका सवै मान्यताहरूलाई समेट्न नसकेको सन्दर्भमा यथासम्भव ती लेखहरूलाई अनुसन्धान प्रविधिभित्र ढाल्ने कोसिस गर्दा लेखकहरूको मूल पाठभन्दा प्रकाशित सामग्री केही भिन्न भएको हुन सक्दछ । यसका साथै सीमित समयावधिको कारणले गर्दा एवं कतिपय सामग्री निर्धारित समयभन्दा धेरै ढिला प्राप्त भए पनि लेखकहरूको तात्कालीन आवश्यकतालाई मध्यनजर गर्दै लेखहरू प्रकाशित गर्नु परेकाले कतिपय भाषागत एवं प्रविधिगत अशुद्धिहरू रहन गएकोमा क्षमाप्रार्थी छौं । कतिपय इमेलमार्फत् प्राप्त भएका लेखहरूको लेखकहरूद्वारा नै सम्पादन गरी हाम्रो कार्यलाई सहज बनाउनु भएकोमा तत्तत् लेखका लेखकहरूप्रति हार्दिक आभार व्यक्त गर्दछौं । समयको वन्धनभित्र रही सम्पादन कार्य गर्नुपर्दा कतिपय पेनड्राइभ र सी.डी.मा प्राप्त विद्वान् लेखकका लेखहरूलाई लेखकहरूको सहमतिमै यथावत् प्रकाशन गरिएको छ ।

सम्पादन कार्य गर्दा सवै विधाका लेखहरूको उचित सम्पादन गर्न सम्पादक मण्डललाई सहयोग आवश्यक परेको अवस्थामा सम्वन्धित विषयका विद्वान्हरूको सहयोग लिइएको बेहोरा अनुरोध गरिन्छ । यसरी सहयोग गर्नु हुने सम्पादक समूहभन्दा बाहिरका विद्वान्हरूप्रति आभार व्यक्त गर्नु हाम्रो कर्तव्य ठान्दछौं ।

अन्त्यमा सम्पादन कार्यमा प्राविधिक एवं अन्य सवै प्रकारका सहयोग गर्नु हुने सवै विद्वज्जनमा हार्दिक कृतज्ञता ज्ञापन गर्दै नववर्ष २०६९ को पावन अवसरमा हार्दिक मङ्गलमय शुभकामना व्यक्त गर्दछौं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयसूची

संस्कृतखण्डः

पेज

१. सिद्धहैमशब्दानुशासने निर्दिश्यमानः पाणिनीयव्याकरणप्रभावविमर्शः डा. सरस्वती पोखेल १
२. 'समर्थानां प्रथमाद्वा' इति सूत्रस्याधिकारविचारः रश्मिराजपाण्डेयः ६
३. प्रमेयविषये न्यायमीमांसयोर्मतम् अच्युतप्रसादलामिछानेः ९
४. कालिदासस्य सर्वस्वम् : अभिज्ञान शाकुन्तलम् देवीप्रसाद काफ्ले १२
५. यदागमपरिभाषायां तत्र भूतिविजययोश्च किञ्चिद् विवेचनीयम् केशवशरण उपाध्यायः १९
६. आशौचस्वरूपं कालश्च माधवप्रसादलामिछानेः २३
७. कालद्योतकानां लकाराणां परिचयस्तेषामर्थनिर्धारणं प्रयोगाश्च मोहनप्रसादपोखेलः २९
८. भू-भ्रमणम् नारायणराज दाहाल ३५
९. रामायणस्य विवेचनं श्रीरामस्य परब्रह्मत्वञ्च उदयराजसुवेदी ३७
१०. न मलमासोऽयं पुरुषोत्तमासः पुष्पप्रकाशज्ञवालीः ४०
११. शब्दस्यस्वरूपसमीक्षा रामचन्द्रकण्डेलः ४२
१२. पाणिनेरकारादिघटितसंज्ञानामनुशीलनम् योगराजशर्मा ४८
१३. पौरस्त्यपाश्चात्त्यदर्शनपथेन परमाणुवादविचारः केशवशरणोऽर्यालः ५३

नेपाली खण्ड

१४. वैदिक संस्कृतिमा सामाजिक व्यवस्था प्रा.माधवराज गौतम ५९
१५. नेपालमा संस्कृत अध्ययन अध्यापनको परम्परा प्रा. डा. विष्णुप्रसाद शर्मा देवकोटा ६५
१६. धर्मशास्त्रको आधारमा विवाह काशीराज पोखेल ७१
१७. प्राचीन हिन्दु राजनीतिकचिन्तनमा मनुको राजधर्म डा.भेषराज अर्याल ७६
१८. संस्कारहरुको महत्त्व र सोह्र संस्कारहरु प्रेमकुमार आचार्य ८०
१९. पाणिनिको शब्दधर्म डा.विष्णु दहाल ८९
२०. वाक्यपरिचय, मिश्रवाक्य र विश्लेषणविधि ध्रुवप्रसाद भट्टराई ९५
२१. अलङ्कार धारणा र विकास गणेशप्रसाद घिमिरे १००
२२. 'कर्तव्य' कथा : एक संक्षिप्त विश्लेषण' ध्रुवराज गौतम १०३
२३. 'मुलुकवाहिर' : विश्लेषणात्मक अध्ययनमा' ध्रुव राय १०७
२४. पाञ्चायनमा श्रीगणेश नवराज घिमिरे ११०
२५. माधुरी नानीको मनोवैज्ञानिक पक्ष नवराज कट्टेल ११६
२६. व्यावहारिक प्रयोगमा न्यायदर्शनका प्रमाणहरू माधव अधिकारी ११९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२७. शब्द, अर्थ र सम्बन्ध एक विवेचना — नारायणप्रसाद पौडेल — १२५
२८. कोइरालाका सामाजिक उपन्यासहरूको समीक्षा — डा. नारायण चालिसे — १३१
२९. संस्कार-विवेचना — नारायणप्रसाद वराल — १३५
३०. काव्यहेतुविमर्श भामहदेखि जगन्नाथसम्म — नन्दन भट्टराई — १४०
३१. शब्दका विषयमा पाणिनिको सिद्धान्त — मुरली मोहन वाँस्तोला — १४४
३२. पूर्वीय नाट्यसिद्धान्तको अध्ययन — टीकाराम गौतम — १४८
३३. निरुक्तकार यास्कका निर्वचन-सिद्धान्त र नियमहरूको समीक्षा — डा. ऋषिराम रेग्मी — १५८
३४. भाषा सिकाइमा त्रुटि विश्लेषण — नीलप्रसाद सापकोटा — १६४
३५. दाम्पत्य जीवन र विवाह मेलापक — टीकाराम घिमिरे — १७३
३६. रस र रसनिष्पत्तिका प्रमुख मान्यताहरू — जगन्नाथ रेग्मी — १७७
३७. नेपालको इतिहासमा पौराणिक महत्त्व — जनार्दन उपाध्याय — १८६
३८. बौद्धदर्शनको मूल दार्शनिक सिद्धान्त : प्रतीत्यसमुत्पाद — लेशमणि दाहाल — १९२
३९. विस्मयादिवोधक शब्द — प्रकाश तिवारी — १९६
४०. लोकतन्त्र — ईश्वरकान्त झा — २०१

English Section

41. Agriculture and Development — Shambhu Raj Gautam — 205
42. Globalization – its Pros and cons — Namita Pokhrel — 208
43. An Introduction to Vedic Mathematics — Arjun Adhikari — 212
44. The Science and Buddhism: Resemblances — Bhawani Shankar Adhikari — 215
45. A Mental Mathematics-Trachtenberg System — Krishna Kanta Parajuli — 218
46. Women in A Thousand Splendid Suns — Bimala Sharma — 225
47. Aljhieko Mana (Entangled Heart): Journey from Love Songs to National Songs and Psalms — Mohan Raj Gouli — 231
48. English and Sanskrit Authors of Central Tarai, Nepal — Vijay Kr. Datta — 234
49. Research Methodology in Mathematics — Indra Prasad Adhikari — 238
50. Literature is the key for science — Dr. Murari Singh — 241

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धहैमशब्दानुशासने निर्दिश्यमानः पाणिनीयव्याकरणप्रभावविमर्शः

डा. सरस्वतीपोखेल
सहप्राध्यापिका

दृष्टिसाध्यमेव जैनविद्वदुपवृम्हितव्याकरणेषु ख्यापितं हेमचन्द्राचार्येण प्रणीतं व्याकरणमाख्यया **सिद्धहैमशब्दानुशासनमपि सम्प्रति** । व्याकरणमिदं ग्रन्थकृता **गुजरातप्रदेशस्थ-सम्राजः सिद्धराजस्याऽऽदेशेन (आसन्नराज्यभोगवर्षाणि ख्रैष्टाब्दम्, ११५०-११९९)** प्रणीतमित्युपलभ्यते । एतदीयमैतिहासिकं विवरणन्त्वेतदाकारकमवाप्यते । तथा हि - राजा जयसिंहो मालवदेशाधिपतिं यशोवर्माणं विजित्य, ततः समधिगतस्य राज्ञो भोजस्याख्यया सरस्वतीकण्ठाभरणस्य व्याकरणसम्वद्धविषयकस्य ग्रन्थस्य (हस्तलिखितग्रन्थप्रतेः) सन्दर्शनेन पुलकितो जातः । भोजस्योक्तग्रन्थेन समं प्रतिस्पर्धां विधातुमीहता राज्ञा तेन जयसिंहेन तदनुरूपस्योत्कृष्टस्य व्याकरणसम्वद्धग्रन्थान्तरस्य प्रणयनार्थमाचार्योऽयं हेमचन्द्रो वह्वनुनीत आसीदिति निर्दिश्यते । राज्ञः सिद्धराजस्यादेशेन प्रणीतस्य ग्रन्थस्य सत्त्वादस्य ग्रन्थस्य नामापि सिद्धहैमशब्दानुशासनमिति सार्थकं समजायत इति प्रसिद्धिः ।

जैनेषु प्रसिद्धस्याचार्यस्य हेमचन्द्रस्य जन्म गुजरातप्रदेशस्य प्रधानान्नगरादहमदावादात् त्रिंशत्क्रोशावधिकदूरदक्षिणपश्चिमकोणे समवस्थिते धुन्धुकाख्ये नगरे समजायत । संस्कृतभाषोपनिवद्धग्रन्थेषु नगरस्याऽस्य नाम धुन्धुकपुरमित्यप्यवाप्यते । आचार्यस्यास्य जन्म
(वैक्रमाब्दम्, ११४५) कार्त्तिके मासि पूर्णिमायां रात्रौ समजायत इत्यैतिह्यानुशीलनं गमयति

हेमचन्द्रस्य पिता मोढवंश्यो नाम्ना चाचिंग इत्यवाप्यते। मातृनामत्वस्य पाहिणी देवीत्यऽधिगम्यते। 'मोढे' इति समुपाह्वाद् ग्रामविशेषादेतद्वंश्याः समायाता इति हेमचन्द्रादयो मोढवंश्या उच्यन्ते स्म । नाम तु हेमचन्द्रस्य प्राग्वर्ती **चाङ्गदेव इत्याकारकं दृष्टिपथमायाति** । विलक्षणप्रतिभायुतोऽयमाशैशवादेव व्युत्पन्नमतिश्चासीदिति पूर्वाचार्याः ।

शैवधर्मावलम्बिनः पितुः सञ्जातस्यास्य हेमचन्द्रस्य प्राप्येते मातृमातुलौ तु जैनधर्मावलम्बिनाविति । तदत्र प्रतीयते, मात्रा जैनधर्मस्यानुशीलनम्, पित्रा च तद्भिन्नशैवधर्मस्यानुसरणमिति यद्यपि सम्प्रति समाजे अन्यथेव = असामान्यमिव = विपरीतमिव च तथापि प्रचलति स्म प्राचीनकाले गुर्जरादिषु देशविशेषेषु परिवारसदसि प्रायोऽयं व्यवहार इति गमयति जैनेतिहासावलोकनमधुना । एवं हि हेमचन्द्रोऽपि संप्रदायान्तरस्याऽनुशीलनार्थं वह्वनुनीतोऽवाप्यते मन्त्रिणा उदयनोपाह्वेन कालेस्मिन् । तदर्थं मन्त्रिणा तेन हेमचन्द्रायास्मै प्रदत्तानि वहूनि द्रव्याण्यपि । परन्तु नोपगृहीतानि मन्त्रिणा तेन प्रदत्तानि द्रव्याणि हेमचन्द्राचार्येणाऽनेन । यथा हि शिवनिर्माल्यमग्राह्यमिति प्रसिद्धिर्वर्तते तथैवानेन नैवोपात्तानि द्रव्याणि तानि मन्त्रिणा उदयनोपाह्वेनाभ्यर्थितानीति जैनवाङ्मयसम्वद्धैतिह्यपरिशीलनं प्रमापयति ।

पुरुषविशेषेण धनदनामकेन केनचिन्नागपुरवास्तव्येनाचार्योऽयं (वि.सं. ११६६) समये सूरीति पदेनापि सभाजितोऽवाप्यते । हेम्नस्तुल्यकान्तियुततयास्याख्या हेम इति, स्वभावेनापि शीतलश्चन्द्रोपमश्चेत्युभयं संघटय्य संज्ञाप्यस्य हेमचन्द्र इत्यजायत इति च विदुषः ।[१]

व्याकरणमिदमष्टस्वऽध्यायेष्ववलोक्यते । तत्राद्येषु सप्तस्वऽध्यायेषु गीर्वाणवाणीसंयुता व्याकरणसामग्री दृष्टिपथमायाति । संख्ययाऽष्टमेऽध्याये प्राकृत-शौरसेनी-मागधी-पैशाची-चूलिका-पैशाच्यादिका भाषा अनुशिष्यन्ते । संस्कृत-प्राकृतादिभाषाविषये व्याकरणमिदमत्यन्तोपयोगीत्यवधार्यते । अत्र ग्रन्थे सप्तस्वऽध्यायेषु ३५६६ इति सूत्रसंख्या निर्दिश्यते । अष्टमे तु सूत्रसंख्या १११९ इत्येतदाकारा दृग्गोचरी भवति । ग्रन्थेऽत्र (१००६)युता उणादि-सूत्रसंख्या निर्दिश्यते । सङ्कलने सूत्रसंख्या एतद्ग्रन्थसम्वद्धा (४६८५) एतदाकाराऽवतरति । ग्रन्थकृता ग्रन्थोऽयं एकवर्षेणैव विरचित इति जैनप्रसिद्धिः ।[२] तथा हि - *श्रीहेमचन्द्र... रचयाञ्चक्रे,* इति ।

यद्यपि हेमचन्द्रेण पुराणविषयमाधृत्य - त्रिषष्टिशलाकापुरुषचरितमिति, काव्यविधामाधाय - कुमारपालचरितमिति, कोषविषयमादाय - अभिधानचिन्तामणिः, अनेकार्थसंग्रहः, निघण्टुः, देशीनाममाला, अलङ्कारविधायाम् - काव्यानुशासनमिति, छन्दोविषयमादाय छन्दोऽनुशासनमिति, न्यायविषयमादाय - प्रमाणमीमांसेति, स्तोत्रविषयमाधाय - द्वात्रिंशिकेति, योगशास्त्रञ्च सुरभारतीयुतोपनिवद्धं सम्प्रत्युपलब्धिसाध्यमिति । यद्यपि अधिकाः शब्दानुशासनेतरग्रन्था प्रणीता दृष्टिपथमायान्ति, तथापि शब्दानुशासनसम्वद्धाश्च कृतयोऽनेन नैवाल्पीयस्य विरचिता वर्तन्ते संख्ययेति । कृतीनान्तासां नामान्यत्र प्रदीयन्ते । तथा हि - हैमशब्दानुशासनस्य स्वोपज्ञा लघ्वी वृत्तिः, मध्यवृत्तिः । बृहती वृत्तिः । हैमशब्दानुशासनमाधृत्य बृहन्न्यासः । धातुपाठस्तस्य धातुपारायणनाम्नी व्याख्या । गणपाठस्तस्य वृत्तिः । उणादिसूत्राणि । उणादिसूत्रेषु स्वोपज्ञवृत्तिः । लिङ्गानुशासनम् । लिङ्गानुशासनस्य वृत्तिश्चेति । चर्चितानां सर्वाषामपि शब्दानुशासनसम्बद्धानां कृतीनामवतारणस्योपादेयतेति शब्दशास्त्रस्य तदुपनिवद्धस्य पाणिनीयाष्टाध्यायीरीत्या परिपूरणार्थमेवेति स्पष्टम् । हेमचन्द्रेणोपनिबद्धानां चर्चितानां गीर्वाणवाणीसमन्वितानां ग्रन्थानां विवरणमिदमाचार्यमेनं सुरभारतीनिष्ठमिति प्रमापयति ।

---

१. युधिष्ठिर, मीमांसक, संस्कृत व्याकरण शास्त्र का इतिहास, पृ. २३२ ।
२. मेरुतुङ्गाचार्य, प्रबन्धचिन्तामणि, युधिष्ठिर मीमांसक, पूर्ववत् पृ. ६० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पार्यते द्रष्टुं , विदुषानेन प्राकृतादिष्वन्यास्वपि भाषास्वावद्धा नैकविधग्रन्था: प्रणीता आसन्निति । सिद्धहैमशब्दानुशासने गीर्वाणवाणीसंयुतेऽस्मिंस्तु समग्राण्युपकरणानि यद्यपि सर्ववाङ्मयोपपादकान्येवोपदृश्यन्ते । तथापि विशेषता जैनेतिहासस्योपदर्शने लभ्यते । संस्कृतवाङ्मये पाणिनीयाष्टाध्यायी यथा सर्वानपि व्याकरणग्रन्थानतिशेते । तथैव जैनपरम्परायां निर्दिष्यमानेषु जैनविद्वदुपनिवद्धेषु सुरभारतीयुत-व्याकरणग्रन्थेषु हैमशव्दानुशानस्यैवोत्कर्षोऽध्ययनाध्यापनादिकञ्च वहुधा दृष्टिपथमायाति । तत्र कारणन्तु यथाकाले एततपूर्ववर्ति-व्याकरणेषु निर्दिष्यमानाभाव-परिपूरकभावेनास्योदितत्वम्, व्याकरणसम्वद्ध-सर्वविधोपकरणयुतत्वञ्चेति स्पष्टमेव । अत एवान्यापेक्षया हैममेतच्छव्दानुशासनं स्वीकार्यते मनीषिभिः साङ्गं परिपक्वञ्चेति । तेनाधुना जैनेष्वस्यैव ग्रन्थस्य निर्दिश्यते प्रचलनं वहुधा ।

प्रयोगदृशा पाणिनीयाष्टाध्यायी त्रिधा विभक्ता निर्दिश्यते । प्रायस्तत्र प्रथम-द्वितीयाध्यायाभ्यां वाक्येभ्य: पदानां सङ्कलनं वर्तते । तृतीयाध्यायादारभ्य आपञ्चमाध्यायान्तं पदेषु विधातव्य: प्रकृति-प्रत्ययविभागो दृष्टिपथमायाति । षष्ठाध्यायादारभ्य अष्टमाध्यायान्तं प्रकृतिप्रत्ययादिषु आगमादेशादीनां समायोजनेन परिनिष्ठितानां पदानां निष्पत्तिविषयो वर्तत इति क्रमेणानेनात्र पाणिनीयाष्टाध्यायी पूर्णा द्रष्टुं शक्यते । तेन तृतीये चरणे सन्धिकार्येष्वावद्धपाणिनीयव्याकरणस्याऽयं परिनिष्ठित: प्रयोगविषयोऽभ्युपगम्यते । अत्र ग्रन्थे अष्टस्वध्यायेष्वध्यायप्रथम: परिभाषा: कतिपया आदाय संज्ञापरकत्वेनोपस्थितिमेति । तत्राऽपि वृद्धिरादैच्[३] इति सूत्रत आरभ्य नाज्झलौ[४] इति सूत्रं यावद् वर्णसम्वद्धा: संज्ञा निर्दिश्यन्ते । ईदूदेद् द्विवचनं प्रगृह्यम्[५] इति सूत्रत आरभ्य वर्णसमूहात्मिका: संज्ञा: पार्यन्तेऽत्र द्रष्टुम् । नवेति विभाषा[६] इत्याकारकसूत्रस्योपस्थित्या विभाषासंज्ञया, इग्यण: सम्प्रसारणम्[७] इत्याकारकसूत्रतोपस्थित्या च सम्प्रसारणसंज्ञया आर्धीसंज्ञा शक्यते द्रष्टुम् । रीत्याऽनया पाणिनीयाष्टाध्याय्या: संज्ञासम्वद्ध: कार्यपक्ष: पूर्णतामेत्यत्र । इग्यण: सम्प्रसारणमिति सूत्रतोऽग्रेऽनेन परिभाषाप्रकरणस्यारम्भो विधीयते । क्रमेऽस्मिन् अदर्शनं लोप:[८] इति सूत्रस्योपस्थापनेन अर्थसम्वद्धा लोपसंज्ञा निदर्श्यते । औचित्यानुसारेण तदनु अचोऽन्त्यादि टि[९] सदृशसूत्रस्योपस्थित्या टिसंज्ञाया उपस्थितिरवतार्यते । तदनु *अलोऽन्त्यात् पूर्व उपधा*[१०]सूत्रस्योपस्थित्या उपधासंज्ञायाश्चोपस्थापनं विधीयते । पादान्ते वृद्धसंज्ञा दृग्गोचरीभवति । एतन्निदर्शनं पाणिनीयाष्टाध्याय्या:प्रथमाध्यायस्य प्रथमस्य पादस्यावतारितमित्यवधार्यमध्येतृभि: ।

पाणिनीयव्याकरणमुपजीव्य शास्त्रान्तरे यततामधिकसंख्यावतां धीमतां मध्ये पाणिनेरपेक्षया वाङ्मयान्तरसेविना हेमचन्द्रेणाऽनेनाऽप्यष्टाध्यायात्मको ग्रन्थो वर्तते विरचित: साम्प्रतं सिद्धहैमशव्दानुशासनाख्य: । ग्रन्थोऽयं जैनवाङ्मये गीर्वाणवाणीविस्तराय सौगम्येन च पाणिनीयव्याकरणस्याऽध्ययनाय ग्रन्थकृतावतारित: । प्राज्ञिकस्य जगत: समुदयो गीर्वाणवाणीसमन्वित-पाणिनीयव्याकरणमाध्यमेनोपदृश्यते जैनजगतीति चास्ति ग्रन्थस्यास्य विशेषता । अत एव हैमव्याकरणसम्वद्धा सूत्रोदाहरण-संज्ञा-प्रत्ययादियुता सामग्री समग्रा सुरभारतीसंवलिता पाणिनीयव्याकरणानुरूपा सत्यपि जैनेष्वनकूला निर्दिश्यते परमार्थत: ।

अत्र ग्रन्थे प्रथमं सूत्रम् *अर्हम्*[११] इत्याकृत्याऽवतरति । सूत्रमेतत् शव्दशास्त्रे सर्वतोभावेन मङ्गलाय निर्दिश्यते, तच्च न केवलं जैनेष्वेवेति सूत्राकृतिर्निरूपयति । सूत्रं तत्रावतीर्णं द्वितीयं *सिद्धि: स्याद्वादात्*[१२] इत्याकृत्या वर्तते । सूत्रादस्मान्निर्दिश्यते जैनसिद्धान्त: । जैनजगति शव्दानां सिद्धेर्विषयो निष्पत्ति-ज्ञप्ति-परिज्ञानादिकमपि स्याद्वादसिद्धान्तमेवानुसरति नैकान्तम् । एतदेवाभिसूचयता हेमचन्द्रेण सूत्रादस्मात् समस्तानामपि शव्दानां सिद्धिर्निष्पत्तिर्ज्ञप्तिश्च स्ववाङ्मयसम्वद्धानेकान्तवादत: स्वीकार्यते । प्रमापयति चैनं जैनवाङ्मयसम्वद्ध: पन्था:, जैनाचार्योपरचितानि विविधानि ग्रन्थरूपोपकरणानि च ।[१३] हेमचन्द्रेण प्रणीतं सूत्रं तृतीयं *लोकात्*[१४] इत्याकारेणावतरति । सूत्रस्याऽस्य माध्यमेनाऽनेन पाणिनीयव्याकरणशास्त्र-सम्वद्धो विषयो जैनेषु लौकिकव्यवहारोपयोगिदृशा समुपस्थितये प्रयत्तमवलोक्यते । चतुर्थसूत्रादारभ्याऽनेन पाणिनीयस्यैव व्याकरणसम्वद्धविषयस्य

---

३. पा.सू. १।१।१॥
४. पा.सू. १।१।१०॥
५. पा. सू. १।१।११॥
६. पा.सू.१।१।४४ ॥
७. पा.सू.१।१।४५
८. पा.सू.१।१।६०॥
९. पा.सू. १।१।६३ ॥
१०. पा.सू. १।१।६४ ॥
११. है.सू.१।१।१॥
१२. है.सू. १।१।२॥
१३. ऐन्द्र. जैन न्याय।
१४. है.सू. १।१।३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जैनजगति सौगम्येनोपस्थापनायाऽवबोधनाय च कतिपयेषां स्वोपनिबद्धानामपि संज्ञानामुपस्थितिरवतारिता । तादृशानां संज्ञानां सामान्यानां विवेचनमपि सूत्राणामेव माध्यमेन हेमचन्द्रेण विधीयत इति निदर्शनान्यत्र प्रस्तूयन्ते -

स्वरविषयः	=	औदन्ताः स्वराः	(है.सू. १।१।४॥) इत्यनेन ज्ञाप्यते ।
ह्रस्व-दीर्घ-प्लुताः	=	एकद्वित्रिमात्रा ह्रस्वदीर्घप्लुताः	(है.सू.१।१।५॥) इत्यनेन ज्ञाप्यते ।
नामि	=	अनवर्गा नामि	(है.सू.१।१।६॥) इत्यनेन ज्ञाप्यते ।
समान	=	लृदन्ताः समानाः	(है.सू.१।१।७) इत्यनेन ज्ञाप्यते ।
सन्ध्यक्षरम्	=	ए ऐ ओ औ सन्ध्यक्षरम्	(है.सू.१।१।८।) इत्यनेन ज्ञाप्यते ।
अनुस्वारविसर्गौ	=	अं अः अनुस्वारविसर्गौ	(है.सू.१।१।९।) इत्यनेन ज्ञाप्यते ।
व्यञ्जनम्	=	कादिर्व्यञ्जनम्	(है.सू.१।१।१०॥) इत्यनेन ज्ञाप्यते ।
धुट्	=	अपञ्चमान्तस्थो धुट्	(है.सू.१।१।११॥) इत्यनेन ज्ञाप्यते ।
वर्गः	=	पञ्चको वर्गः	(है.स.१।१।१२॥) इत्यनेन ज्ञाप्यते ।
अघोषा	=	आद्य-द्वितीयशषसा अघोषाः	(है.सू. १।१।१३॥) इत्यनेन ज्ञाप्यते ।
घोषवत्	=	अन्यो घोषवान्	(है.सू.१।१।१४॥) इत्यनेन ज्ञाप्यते ।
अन्तस्थ	=	यरलवा अन्तस्थाः	(है.सू.१।१।१५॥) इत्यनेन ज्ञाप्यते ।
शिट्	=	अं अः क = प शषसाः शिट्	(है.सू.१।१।१६॥)इत्यनेन ज्ञाप्यते ।
स्वः	=	तुल्यस्थानास्यप्रयत्नः स्वः	(है.सू.१।१।१७) इत्यनेन ज्ञाप्यते ।
प्रथमादिः	=	स्वौजसमौशष्टाभ्या...	(है.सू.१।१।१८।) इत्यनेन ज्ञाप्यते ।
विभक्ति	=	स्त्यादिर्विभक्तिः	(है.सू. १।१।१९।) इत्यनेन ज्ञाप्यते
पदम्	=	तदन्तं पदम्	(है.सू.१।१।२०।) इत्यनेन ज्ञाप्यते ।
वाक्यम्	=	सविशेषणमाख्यातं वाक्यकम्	(है.सू.१।१।२६।) इत्यनेन ज्ञाप्यते ।
नाम	=	अधातुविभक्तिवाक्यमर्थवन्नाम	(है.सू. १।१।२७) इत्यनेन ज्ञाप्यते ।
संख्यावत्	=	डत्यतु संख्यावत्	(है.सू.१।१।३९।) इत्येनेनेति

हेमचन्द्रेण स्वोपनिबद्धः शब्दशास्त्रसम्बद्धः संज्ञाविषयः स्ववाङ्मयानुकूलया रीत्या शास्त्रस्यादौ सर्वप्रागुपस्थापित इत्युक्तमेवात्रास्माभिरत्र । समग्रा ग्रन्थसम्बन्धिनी विधा त्वेतदाकारावलोक्यते । यथा हि पाणिनीयाष्टाध्याय्यां संज्ञाविषयः, सन्धेर्विषयः, कारकविषयः, समासविषयः, तिङन्तविषयः, कृदन्तविषयः, तद्धितादिकश्च विषयः स्फुटमवतरति ॥ तथैव हेमचन्द्रेण प्रणीतोऽपि शब्दशास्त्रस्याऽस्योपस्थितिविषयः संज्ञा-सन्धि-कारक-समासाख्यात-कृदन्त-तद्धितादिरीत्याऽध्ययनसौगम्येनाऽवलोक्यते । समग्रमत्र पाणिनीयव्याकरणसम्वद्धं रूपान्तरमेव परिदृश्यत न तद् भिन्नमिति निदर्श्यन्तेऽत्र कानिचनैव निदर्शनानि । तथा हि -

पाणिनीये व्याकरणे निर्दिश्यमान अच् सन्धिर्हेमचन्द्रेण स्वरसन्धिसंज्ञया विज्ञापितः ।

पाणिनीये व्याकरणे निर्दिश्यमानो हल्सन्धिर्हेमचन्द्रेण व्यञ्जनसन्धिसंज्ञया निगदितः।

पाणिनिना एचोऽयवाऽयावः,[15]इत्याकारकसूत्रस्याध्ययनेन एचां = ए ओ ऐ औ एतेषां स्थाने अय् अव् आय् आव् विधानव्यवस्था कमेणोपदर्शिता । अधीतस्याऽस्यैव विषयस्योपस्थापनाय हेमचन्द्रेण एदैतोऽयाय् [16]इत्याकारकं पृथक्सूत्रं प्रथममधीतम् । ओदौतोऽवाव् [17] इत्याकारकं च पृथक्सूत्रं द्वितीयं समधीतम् । सूत्राकृतिमन्तरा नोपलभ्यते पार्थक्यमत्रोभयविधसूत्राभ्याम् । यतो हि स एवाऽयं विषयः पाणिनिना सूत्रमात्रेणोपदर्शितः । हेमचन्द्रेण तु सूत्रयोरुभयोरुपस्थापनेनोपदर्शितः ।

पाणिनिना ऋलृवर्णयोः स्थाने कमशो विधीयमानयो अर्-अल् आदेशयोर्विषये आद्गुणः[18] इति सूत्रमधीत्य तदर्थप्रतिपत्तये उरण् रपरः[19] इति सूत्रान्तरमधीतम् । सूत्राभ्यामाभ्याम् ऋलृवर्णसम्बन्धिनी बृहती प्रकिया सन्निहिताऽवलोक्यते । आद्गुणः इति सूत्रस्यार्थावबोधमेव उरण् रपर इति सूत्रस्योपस्थितिः सरलायते । अतस्तत्र पाणिनीये व्याकरणे प्रथमम् आद्गुणः इति सूत्रस्यार्थाऽवबोधः कार्यो भवति । तदनन्तरमेव उरण् रपर इति सूत्रस्याधीतिः

---

१५. पा.सू.६।१।७८॥

१६. है.सू. १।२।२३॥

१७. है.सू.१।२।२४॥

१८. पा.सू.६।१।८४॥

१९. पा.सू. १।१।५०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Digitization by eGangotri.Funding: MIDF

समीचीनायते नाऽन्यथा । यतो हि आद्गुण:,इति सूत्रार्थाधीनं वर्तते उरण् रपर इति सूत्रम् । उरण् रपरः इति सूत्रसदृशसूत्रसम्वद्धो विषयोऽयमन्यत्रापि वहुधा निर्दिश्यते समग्रे पाणिनीये ग्रन्थे ।

एवं हि पाणिनिनाऽधीतस्याऽस्यैव ऋलृवर्णयोः स्थाने क्रमशो विधीयमानस्य अर्-अल् विषयस्योपस्थापनाय हेमचन्द्रेण *लृत ऋलृ ऋलृभ्यां वा* [२०] ईदृशं सूत्रमात्रं निगदितम् । पाणिनिना सूत्राभ्यामुपस्थापितो विषयो हेमचन्द्रेण सूत्रमात्रेण निगदितो दृष्टिपथमायाति । पाणिन्यधीतापेक्षया नोपदृश्यते पार्थक्यञ्चोभयविधग्रन्थाभ्याम् । उभयत्र पार्थक्याऽभावकारणन्तु पाणिनीया सूत्रपद्धतिरेतांदृशी वर्तते या तदनुवर्त्तिभिर्वैयाकरणैः सुगमा,सरलग्राह्येति चाऽभिमन्यते । चर्चितोऽपि ऋलृवर्णयोर्विषयो यद्यपि गहनतम एवाभविष्यद् यदि पाणिनीयः पन्थास्तथाविधो नाऽभविष्यत् सरलसाध्यः । वर्ततेऽत्र सुगमता, एतेन वाङ्मयान्तराण्यप्यस्य सारावदोहने क्षमाणि कुशलानि च यथाऽत्र ।

पाणिनिना एङि पररूपम्[२१]सूत्रस्य माध्यमेन अ-ए-ओवर्णेषु परतो विद्यमानेषु पररूपविधिर्विहितोऽवाप्यते । पाणिनीयसूत्रस्याशयमाधाय सूत्रान्तरं विहितं प्रतिभाति हेमचन्द्रेण -

वौष्ठौतौ समासे [२२]इति । अनेन सूत्रमाध्यमेन पाणिनीयः पररूपविषयो लुग्विधानेन प्रपूर्यते हेमचन्द्रेण । नैतावदेवापि तु पाणिन्यधीतः पररूपविषयः पूर्वरूपश्चाऽपि विषयो लुग्विधिमादायाऽत्र हैमव्याकरणे समुदेति पाणिनेरपेक्षयाभिनवेन पथा । पाणिनिना पूर्वरूपत्वेनोपस्थापित उदाहरणविषयो हेमचन्द्रेण लुग्विधिना प्रकाशितः । पाणिन्यधीतः पररूपविषयोऽपि हेमचन्द्रेणोदाहरणे लुग्विधिमादायोपस्थापितः । अनेन नोपलभ्यते पाणिनिप्रणीतसूत्रेभ्यो हेमचन्द्रप्रणीतसूत्रेषु तात्त्विको विभेदश्च ।

पाणिनिनाऽधीयते ग्रीष्मावरसमाद् वुञ् [२३]इत्येतदाकारकं सूत्रम् । एतदर्थस्त्वेतादृशो वर्तते - ग्रीष्मावरसमात = **ग्रीष्म अवरसमा इति प्रकृतिकात्** तत्र[२४] देयमृणे,[२५] वुञ=**वुञ्प्रत्ययो भवति इति** । ग्रैष्मकमिति चोदाहरणं निर्दिश्यतेऽत्राष्टाध्याय्याम् ।

एतद्सूत्रस्थानीय सूत्र वर्तते हेमचन्द्रेणोपन्यस्तम् ग्रीष्मावरसमादकञ् [२६] इति । ग्रन्थकृता हेमचन्द्रेण चर्चितसूत्रोदाहरणत्वेन ग्रैष्मकमित्याकारकमेवोदाहरणमुपन्यस्त निर्दिश्यते । विग्रहस्तत्राऽपि ग्रीष्मे देयमृणं ग्रैष्मकमित्याकृत्याऽवलोक्यते ।

कलाप्यश्वत्थयववुसाद् वुन् [२७] इति सूत्रं पाणिनीयं वर्तते । अस्यार्थस्त्वेतादृशो वर्तते । तथा हि - कालात् [२८] कलाप्यश्वत्थयववुसात् = कलापी, (न्) अश्वत्थ, यवबुसप्रकृतिकात्, तत्र, [२९] देयमृणे,[३०] वुन् =**वुन्प्रत्ययो भवति इति । यस्मिन् काले मयूराः कलापिनो भवन्ति सः कालोऽपि साहचर्यात् कलापी उच्यते । यस्मिन् काले अश्वत्थाः फलन्ति सः कालोऽप्यश्वत्थ उच्यते । यस्मिन् काले यववुसं सम्पद्यते सः कालोऽपि यववुस इत्युच्यते ।** कलापकम् । **अश्वत्थकम् ।** यवबुसकम् इत्युदाहरणानि पाणिनीयानि ।

चर्चित-पाणिनिसूत्रस्थानीयं हैमं सूत्रं **कलाप्यश्वत्थयववुसौमाव्यासैषमसोऽकः**[३१] इत्यवाप्यते । सूत्रेऽत्र कलापकम्, **अश्वत्थकम्** ,यवबुसकमित्युदाहरणानि प्रदत्तानि ग्रन्थस्य प्रणेत्रा हेमचन्द्रेण । तत्रोपस्थापितेपूदाहरणेपु निर्दिश्यमानो विग्रहस्त्वेतदाकृत्याऽवलोकनीयस्तथा हि - कलापकम्- यस्मिन् काले मयूराः केदाराः इक्षवः कलापिनो भवन्ति, सः कालस्तत्साहचर्यात् कलापी, तत्र देयं ऋणम् कलापकमिति । **अश्वत्थकम् - यस्मिन् काले अश्वत्थाः फलन्ति सः कालोऽश्वत्थफलसहचरितोऽश्वत्थः तत्र देयमृणमश्वत्थकमिति** । यवबुसकम् - यस्मिन् काले यवानां बुसं भवति सः कालो यवबुसः । तत्र देयं ऋणं यवबुसकमिति । नोपदृश्यते तात्त्विको विभेदोऽत्राप्युभाभ्याम् ।

अर्थवदधातुरप्रत्ययः प्रातिपदिकम्[३२] इति वर्तते पाणिनीयं सूत्रम् । एतदर्थ इत्थमवतरति - अधातुः = धातुभिन्नम्, अप्रत्ययः = प्रत्यय-प्रत्ययान्तभिन्नम्, अर्थवत्=अर्थयुक्तं शब्दस्वरूपम्, प्रातिपदिकम् =प्रातिपदिकसंज्ञं भवति इति । पाणिनिना सूत्रेणाऽनेन प्रातिपदिकसंज्ञा प्रकाशिता ।

---

२०. है.सू.१।२।३॥
२१. पा.सू.६।१।२।९४॥
२२. है.सू.१।२।१७॥
२३. पा.सू. ४।३।४९॥
२४. पा.सू. ४।३।२५॥
२५. पा.सू. ४।३।४७॥
२६. है.सू. ६।३।११५॥
२७ पा.सू. ४।३।४८॥
२८. पा.सू. ४।३।४३॥
२९. पा.सू. ४।३।२५।
३०. पा.सू. ४।३।४७॥
३१. है.सू. ६।३।११४॥
३२. पा.सू. १।२।४५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतदाशयगं पाणिनिसूत्रस्थानीयं सूत्रान्तरं हेमचन्द्रप्रणीतम् अधातुविभक्तिवाक्यमर्थवन्नाम[३३] इति निर्दिश्यते । सूत्रकृता नामशव्देन पाणिनीया प्रातिपदिकसंज्ञा विनिमितेति संसूच्यते । उपस्थापयति चैतत् सूत्रं पाणिन्यधीतसूत्राशयावधायं नामशव्दस्य परिभाषामपि । सूत्राकृतिमन्तरा पाणिनि-हेमचन्द्रप्रणीतसूत्राभ्यामाभ्यां नैव भिन्नता तात्त्विकीति स्पष्टम् ।

सूत्रार्थापनविषयोऽपि हेमचन्द्रेणाम्नातस्तथा नोदेति पाणिनेरपेक्षया पार्थक्यमादायेति निदर्शनाय सूत्रमधीयते पाणिनीयम् अपत्यं पौत्रप्रभृति गोत्रम्[३४] इति । एतदर्थः पाणिनिना विहितः ईदृशोऽवलोक्यते - पौत्रप्रभृतिः=पौत्रादिः, अपत्यम् = सन्ततिः, गोत्रम् = गोत्रसंज्ञकं भवति इति । एतत् सूत्रं निकषाऽधीयते सूत्रान्तरं पाणिनिना जीवति तु वंश्ये युवा[३५] इति । एतदर्थः पाणिनिना विहित ईदृशोऽवतरति - वंश्येः=पित्रादौ, जीवति तु=जीवति सति तु, पौत्रप्रभृतिः अपत्यम् तस्यापत्यम्[३६] =पौत्रप्रभृतेरपत्यम् (चतुर्थादिः) युवा=युवसंज्ञकमेव भवति न तु गोत्रसंज्ञकमिति । पाणिन्यधीताष्टाध्याय्यां निर्दिश्यमानयोःसूत्रयोरनयोरर्थः शक्यतेऽत्र द्रष्टुं व्याकरणे हैमेऽपि ।

यतो हि हेमचन्द्रेण *वंशज्यायोभ्रात्रोर्जीवति प्रपौत्राद्यस्त्री*[३७] *युवा* इत्याकारकं सूत्रमधीयते । एतदर्थश्चेत्थमवतरति । तथा हि- वंशे भवो वंश्यः- पित्रादिरात्मनः कारणम् । ज्यायान् भ्राता वयोऽधिक एकपितृक एकमातृको वा । प्रपौत्रम् - पौत्रापत्यम् परमप्रकृतेश्चतुर्थः । स्त्रीवर्जितं प्रपौत्राद्यपत्यम् जीवति वंश्यो ज्यायो भ्रातरि वा युवसंज्ञं भवति इति । अत्र हैमे व्याकरणे सूत्रस्याकृतिरेव पाणिनेरपेक्षया पार्थक्येनोपदृश्यते न तात्त्विको विभेद इति सूत्राभ्यामुभाभ्यामन्तरः परमार्थतः । पाणिनिनाष्टाध्यायीतो गोत्रस्योपजीव्यिकेति ऋषिपरम्परा निर्दिश्यते । यथा *भारद्वाजीयाः पठन्ति । वासिष्ठानामियं यज्ञशाला इत्यादि* । हेमचन्द्रेणाऽपि गोत्रविषये पाणिनिदेशीया रीतिरनुसृताऽवाप्यते । तदधिकन्तु येषां नाम कुलविशेषे भवति ख्यातं तेषामपि नाम हेमचन्द्रेण गोत्रस्योपजीव्यपरम्परायाः स्थिरापनार्थमुपदर्शितम् । अर्थात् पाणिनेरपेक्षया ऋषीनन्तराऽपि शक्यते द्रष्टुं गोत्रस्योपजीव्यपरम्परेति हेमचन्द्रेणोपन्यस्यते ससूत्रमेव । तथा हि सूत्रम् - *वह्वादिभ्यो गोत्रे*[३८] *स्वापत्यसन्तानस्य स्वव्यपदेशकारणमृषिरनृषिर्वा यः प्रथमः पुरुषस्तदपत्यं गोत्रम्*, यथा वाहोरपत्यं वाहविः, औपगविः इति एतेन वंशसंस्थापकव्यक्तेर्नामाऽपि गोत्रत्वेनोपगृह्यते हेमचन्द्रेणेति निष्कर्षोऽत्र । विशेषेण जैनजगतः श्रेयसे पाणिनीयाष्टाध्यायी सामग्र्याः परिवर्तनमादायाऽपि सम्पादितं दृष्टिपथमायाति ग्रन्थेऽत्र हैमव्याकरणे । ग्रन्थस्याऽस्य परमा विशेषतैषा कौशल्यञ्च प्रणेतुरिति निर्विवादमेव । पाणिनिनाऽष्टाध्यायीमाध्यमेनान्यदीयया शैल्या समीहितो विषयः स्थालिपुलाकन्यायेनोपयातोऽत्र तद्भेदे तदभेदेनाप्युपस्थितिमेति । पाणिनिना सूत्रयोरुभयोरुपस्थापनेन साधितो विषयः साध्यते हेमचन्द्रेण सूत्रेणैकेनैव । क्वचित्तु सूत्रमात्रेणैवोपस्थापितोऽपि पाणिनीयो विषयो हेमचन्द्रेणोपदर्श्यते सूत्राभ्यामिति वैलक्ष्यण्यमत्र प्रतीयते । अनेन पाणिनीया सूत्रसंरचनापद्धतिर्वैज्ञानिकीति हेमचन्द्रेणाऽपि सुशकपरिवर्तनान्यधिगतानीति स्पष्टम् । यथा पाणिनीयाष्टाध्यायीस्थसूत्रेषु स्वारस्यमनिर्वचनीयं तथैव हैमशव्दानुशासनसम्वद्धसूत्रेष्वपीति समीक्षकाः । वाङ्मयान्तराण्यप्यस्य सारावदोहने दृष्टिपथमायान्ति कुशलानि । यथार्थज्ञा विजानन्त्येव यज्जैनेषु चर्चितानां समेषामेव शव्दानुशासनसम्वद्धग्रन्थानां परमा प्रकृतिः तदेव शव्दानुशासनमनुसरति नाऽन्यदिति । पाणिनीयोपकरणेषु मौलिकताप्रदानेनैव चर्चितेऽत्र शव्दानुशासने हैमेऽपि निर्दिश्यते पार्थक्यं पाणिनेरपेक्षया । यथा संज्ञासु, पदेषु, सूत्रेषु, वार्तिकेषु, वचनेष्विति सूत्राणां प्रकृतिरेव निर्दिशति । परन्तु स एवाऽयं विषयः पाणिनीयो हेमचन्द्रेण स्ववाङ्मयानुसारेणात्मनीनायां संस्कृताववतारितः । जैनमतस्योपस्थापनं पाणिनीयव्याकरणमाध्यमेनोपदर्शितमिति वर्तते वैशिष्ट्यमस्य ग्रन्थस्य प्रणेतुर्हेमचन्द्रस्य सिद्धहैमशव्दानुशासनस्याऽपीति ।

सन्दर्भसामग्रीसूची

१. आचार्यः, पाणिनिः, अष्टाध्यायीसूत्रपाठः, (व्याख्याकार श्रीनारायणमिश्र) वाराणसी : चौखम्बा ओरियण्टालिया, ई. १९७७ ।

२. कुमार, महेन्द्र, *न्यायकुमुदचन्द्र* भाग २, वङ्गाल : वारेन्द्र रिसर्च सोसाइटी, ई.१८८७ ।

३. कुमार, महेन्द्र, जैनदर्शन, (पं.फूलचन्द्रसिद्धान्तशास्त्री सम्पा.) प्रथम संस्क. दिल्ली : जैनग्रन्थमाला, ई. १९५५ ।

४. मीमांसक, युधिष्ठिर, संस्कृत व्याकरण शास्त्र का इतिहास (प्रथम भाग), हरियाणा : रामलाल कपूर ट्रष्ट, २०४१ ॥

५. शास्त्री, नेमिचन्द्र, *आचार्य हेमचन्द्र और उनका शव्दानुशासन : एक अध्ययन*, वाराणसी : चौखम्वा विद्याभवन वि.सं. २०००।

---

३३. है.सू. १।१।२७॥
३४. पा.सू. ४।१।१६२॥
३५. पा. सू. ४।१।१६३॥
३६. पा.सू. ४।१।१६२॥
३७. है.सू. ६।१।३॥
३८. है.सू. ६।१।३२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

gitization by eGangotri.Funding: MIDF

'समर्थानां प्रथमाद्वा' इति सूत्रस्याधिकारविचारः

रश्मिराजपाण्डेयः
सहप्राध्यापकः

'समर्थानां प्रथमाद्वा' (पा.सू.,४।१।८२) इत्येतदधिकारसूत्रेष्वन्यतमं सूत्रम् । अस्मिन् सूत्रे त्रीणि पदानि सन्ति, तानि त्रीण्येव पदानि उत्तरसूत्रेष्वधिक्रियन्ते । तेष्वपि "प्रथमात्" इत्यस्य माहात्म्यं प्रथमं प्रस्तूयते । यथा– प्रथमादित्यस्य सूत्रे प्रथमोपस्थितात्=प्रथमोच्चारितात् प्रत्यया भवन्तीत्यर्थः । तथा च "तस्यापत्यम्"४।१।९२ इत्यत्र षष्ठ्यन्तादपत्यमित्यर्थे प्रत्ययो भवति, अथवा अपत्यवाचकाः षष्ठ्यर्थे प्रत्ययो भवतीति । तत्रोपतिष्ठते अधिकृतं प्रथमादिति, ततश्च तस्यापत्यमिति सूत्रे तस्येत्यस्य प्रथमोच्चरितत्वेन षष्ठ्यन्तादपत्यमित्यर्थे प्रत्ययो भवतीत्यर्थो ज्ञायते । "तेन रक्तं रागात्" ४।२।१ अत्र तेनेति प्रथमोच्चरितत्वेन तृतीयान्तात् प्रत्ययो भवतीत्यर्थो ज्ञायते । "नक्षत्रेण युक्तः कालः (४।२।३) इत्यत्र 'नक्षत्रेण' इत्यस्य प्रथमोच्चरितत्वेन नक्षत्रवाचिनः तृतीयान्तात् समार्थात् प्रत्ययो भवतीति ज्ञायते । 'तत्रोद्धृतममत्रेभ्यः' (४।२।१३) इत्यत्र तत्रेत्यस्य प्रथमोच्चरितत्वेन सप्तम्यन्तसमर्थेभ्यः प्रत्ययो भवतीति ज्ञायते 'सास्मिन् पौर्णमासीति' (४।२।२१) इत्यत्र 'सा' इत्यस्य प्रथमोच्चरितत्वेन प्रथमान्तसमर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । "सास्य देवता" (४।२।२३) इत्यत्र 'सा' इत्यस्य प्रथमोच्चरितत्वेन प्रथमान्तसमर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'तस्य समूहः' ४।२।३६ इत्यत्र तस्येतस्य प्रथमोच्चरितत्वेन षष्ठ्यन्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । सोऽस्यादिरितिच्छन्दसः प्रगाथेषु ४।२।५४ इत्यस्य 'स' इत्यस्य प्रथमोच्चरितत्वेन प्रथमान्तसमर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'तदस्यां प्रहरणमिति कीडायां णः' (४।२।५६) इत्यत्र तदित्यस्य प्रथमोच्चरितत्वेन प्रथमान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । "घञः सास्यां क्रियेति ञः" (४।२।५७) इत्यत्र 'सा' इत्यस्य प्रथमोच्चदितत्वेन प्रथमान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । न चात्र 'घञः' इति प्रथमोच्चरितत्वं न तु सा इति वाच्यम् तस्य सेत्यस्य विशेषणत्वात् । अत एव पञ्चम्यन्तप्रथमान्तयोरपि सामानाधिकरण्यात् घञन्तात् प्रथमान्तसमर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । "तदधीते तद्वेद (४।२।५२) इत्यत्र तदित्यस्य प्रथमोच्चरितत्वेन द्वितीयान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । "तदस्मिन्नस्तीति देशे तन्नाम्नि (४।२।६६) इत्यत्र तदित्यस्य प्रथमोच्चरितत्वेन प्रथमान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'तेन निर्वृत्तम्' (४।२।६७) इत्यत्र तेनेत्यस्य प्रथमोच्चरितत्वेन, तृतीयान्तसमर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तस्य निवासः ४।२।६८ इत्यत्र तस्येत्यस्य प्रथमोच्चरितत्वेन षष्ठ्यन्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तत्र जातः ४।३।२५ इत्यत्र 'तत्र' इत्यस्य प्रथमोच्चरितत्वेन प्रथमान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'तदस्य सोढम्' इत्यत्र तदित्यस्य प्रथमोच्चरितत्वेन प्रथमान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तत्र भवः (४।३।५३) इत्यत्र तत्रेत्यस्य प्रथमोच्चरितत्वेन सप्तम्यन्तात् प्रत्ययो भवतीत्यर्थो ज्ञातये । 'तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः' (४।३।६३) इत्यत्र तस्य इत्यस्य प्रथमोच्चरितत्वेन षष्ठ्यन्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'तत आगतः' ४।३।४७ इत्यत्र तत इत्यस्य प्रथमोच्चरितत्वेन पञ्चम्यन्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'तद् गच्छति पथिदूतयोः' ३।३।८५ इत्यत्र तदित्यस्य प्रथमोच्चरितत्वेन द्वितीयान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'सोऽस्य निवासः' ४।३।८९ इत्यत्र स इत्यस्य प्रथमोच्चरितत्वेन प्रथमान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तेन प्रोक्तम् ४।३।१०१ इत्यत्र तेनेत्यस्य प्रथमोच्चरितत्वेन तृतीयान्तसमर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'तेनैकदिक्' ४।३।११२ इत्यत्र तेनेत्यस्य प्रथमोच्चरितत्वेन तृतीयान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'तेन दीव्यति खनति जयति जितम्' ४।४।२ इत्यत्र तेनेत्यस्य प्रथमोच्चरितत्वेन तृतीयान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'शव्ददर्दुरं करोति' ४।४।३४, 'पक्षिमत्स्यमृगान् हन्ति' ४।४।३५, 'माथोत्तोरपदपदव्यनुपदं धावति' ४।४।३७, 'धर्मं चरति' ४।४।४१, 'समवायान् समवैति' ४।४।४२ इत्यत्र प्रथमोच्चरितत्वन तत्तत्प्रकृतिकद्वितीयान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'तस्य धर्म्यम्' ४।४।४७ इत्यत्र तस्येत्यस्य प्रथमोच्चरितत्वेन षष्ठ्यन्तसमर्थत्वात् प्रातिपदिकात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'तदस्य पण्यम्' ४।४।५१ इत्यत्र तदित्यस्य प्रथमोच्चरितत्वेन प्रथमान्तसमर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'तदस्मै दीयते नियुक्तम्' ४।४।६६ इत्यत्र तदित्यस्य प्रथमोच्चरितत्वेन प्रथमान्तसमर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तत्र नियुक्तः ४।४।६९ इत्यत्र तत्रेत्यस्य प्रथमोच्चरितत्वेन सप्तम्यन्तात् समर्थात् प्रातिपदिकात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'निकटे वसति' ४।४।७३ इत्यत्र 'निकटे' इत्यस्य प्रथमोच्चरितत्वेन निकटशव्दप्रकृतिकसप्तम्यन्तात् समर्थात् प्रतिपादिकात् प्रत्ययो भवतीत्यर्थो ज्ञायते । "तद् वहति रथयुगप्रासङ्गम्" ४।४।७६ इत्यत्र तदितस्य प्रथमोच्चरितत्वेन द्वितीयान्तसमर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'गृहपतिना संयुक्ते ञ्यः' ४।४।९०। इत्यत्र गृहपतीत्यस्य प्रथमोच्चरितत्वेन गृहपतिशव्दप्रकृतिकतृतीयान्तसमर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'धर्मपथ्यर्थन्यायादनपेते' ४।४।९२। इत्यत्र धर्मपथ्यर्थन्यायादित्यस्य प्रथमोच्चरितत्वेन धर्मादिप्रकृतिकपञ्चम्यन्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'हृदयस्य प्रियः' ४।४।९५। इत्यत्र हृदयस्येत्यत्र प्रथमोचरितत्वेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हृदयशब्दप्रकृतिकषष्ठ्यन्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'तत्र साधुः' ४।४।९८। इत्यत्र तत्रेत्यस्य प्रथमोच्चरितत्वेन सप्रम्यन्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'समानतीर्थे वासी' ४।४।१०७। इत्यत्र 'समानतीर्थ' इत्यस्य समानतीर्थप्रकृतिकसप्तम्यन्तात् समर्थात् प्रातिपदिकात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'समानोदरे शयित ओ चोदात्तः' ४।४।१०८। इत्यत्र समान उदर इत्यस्य च प्रथमोच्चरितत्वेन तत्तत्प्रकृतिकसप्तम्यन्तात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'बर्हिषि दत्तम्' ४।४।११९। इत्यत्र वर्हिषि इत्यस्य प्रथमोच्चरितत्वेन वर्हिश्शब्दप्रकृतिकसप्तम्यन्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'दूतस्य भागकर्मणी' ४।४।१२०। इत्यत्र दूतस्यत्यस्य प्रथमोच्चरितत्वेन दूतशव्दप्रकृतिकषष्ठ्न्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'रक्षोयातूनां हननी' ४।४।१२१। इत्यत्र रक्षोयातूनामित्यस्य 'असुरस्य स्वम्' ४।४।१२३। इत्यत्र असुरस्येत्यस्य च प्रथमोच्चरितत्वेन तत्तच्छव्दप्रकृतिकषष्ठ्यन्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । 'तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः' ४।४।१२५। इत्यत्र तद्वानित्यस्य प्रथमोच्चरितत्वेन मतुवन्तप्रकृतिकप्रथमान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । पूर्वैः कृतमिनयौ च ४।४।१३३। इत्यत्र पूर्वैः इत्यस्य "अद्भिः संस्कृतम् ४।४।१३४। इत्यत्र अद्भिरित्यस्य "सहस्रेण सम्मितौ घः ४।४।१३५। इत्यत्र सहस्रेणेत्यस्य प्रथमोच्चरितत्वेन तत्तत्प्रकृतिकतृतीयान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । सोममर्हति यः ४।४।१३७ इत्यत्र सोममित्यस्य प्रथमोच्चरितत्वेन सोमशव्दप्रकृतिकद्वितीयान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । शिवसमरिष्टस्य करे ४।४।१४३। इत्यत्र 'शिव शम् अरिष्ट' इत्येतेषां प्रथमोच्चरितत्वेन शिवादिप्रकृतिकषष्ठ्यन्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । कथं तर्हि ? शिवं करोति इति शिवतातिः इति करोतीति तिङन्तस्य कर्मणि द्वितीयाविधानात् सूत्रे षष्ठ्यन्तनिर्देशस्तु "कर" इति पचाद्यजन्तस्य निर्देशतया तत्र कर्मणि षष्ठ्या विधानात् । तथा चोपदिशति सूत्रकारः कर्तृकर्मणोः कृतिः २।३।६५। इति । तस्मै हितम् ५।१।५ इत्यत्र तस्मै इत्यस्य प्रथमोच्चरितत्वेन चतुर्थ्यन्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तदर्थं विकृतेः प्रकृतौ ५।१।१२ इत्यत्र तस्मै इदं तदर्थम् इति प्रथमोच्चरितत्वेन चतुर्थ्यन्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तदस्य तदस्मिन् स्यादिति ५।१।१६ इत्यत्र तदित्यस्य प्रथमोच्चरितत्वेन प्रथमान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तेन कृतम् ५।१।३६ इत्यत्र तेनेत्यस्य प्रथमोच्चरितत्वेन तृतीयान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तस्य निमित्तं संयोगोत्मातौ ५।१।३७ इत्यत्र तस्येश्वरः ५।१।४१ इत्यत्र च तस्येत्यस्य प्रथमोच्चरितत्वेन षष्ठ्यन्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तत्र विदित इति च ५।१।४२ इत्यत्र तदित्यस्य प्रथमोच्चरितत्वेन सप्तम्यन्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते ५।१।४६ तदित्यस्य प्रथमोच्चरितत्वेन प्रथमान्तात् समर्थात् प्रत्ययो भवतीत्यार्थो ज्ञायते । तद्धरति वहत्यावहति भाराद् वंशादिभ्यः ५।१।४९ इत्त तदित्यस्य प्रममोच्चरितत्वेन द्वितीयान्तसमर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । सोऽस्यांशवस्नभृतयः ५।१।५५ इत्यत्र "स" इत्यस्य प्रथमोच्चरितत्वेन प्रथमान्तात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तदस्य परिमाणम् ५।१।५६ इत्यत्र तदित्यस्य प्रथमोच्चरितत्वेन प्रथमान्तात् समर्थात् प्रत्ययो भवतीत्यार्थो ज्ञायते । "तर्दहति" ५।१।६२ इत्यत्र तदित्यस्य प्रथमोच्चरितत्वेन द्वितीयान्त समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । "तेन निर्वृत्तम् ५।१।७८ इत्यत्र तेनेत्यस्य प्रथमोच्चरितत्वेन तृतीयान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । "तमधीष्टो भृतो भूतो भावी ५।१।७९ इत्यत्र तमित्यस्य प्रथमोच्चरितत्वेन द्वितीयान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । "तेन परिजय्यलभ्यकार्यसुकरम् ५।१।९२ इत्यत्र तेनेत्यस्य प्रथमोच्चरितत्वेन तृतीयान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तस्य च दक्षिणा यज्ञाख्येभ्यः ५।१।९४ इत्यत्र तस्येत्यस्य प्रथमोच्चरितत्वेन षष्ठ्यन्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तत्र च दीयते कार्यं भववत् ५।१।९५ इत्यत्र तत्रेत्यस्य प्रथमोच्चरितत्वेन सप्तम्यन्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तेन यथाकथाचहस्ताभ्यां णयतौ ५।१।९७ इत्यत्र तेनेत्यस्य प्रथमोच्चरितत्वेन तृतीयान्तसमर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तस्मै प्रभवति सन्तापादिभ्यः ५।१।१०० इत्यत्र तस्मै इत्यस्य प्रथमोच्चरितत्वेन चतुर्थ्यन्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तेन तुल्यं किया चेद् वति ५।१।११४ इत्यत्र तेनेत्यस्य प्रथमोच्चरितत्वेन तृतीयान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तत्र तस्येव ५।१।११५ इत्यत्र तत्रेत्यस्य प्रथमोच्चरितत्वेन सप्तम्यन्तात् षष्ठ्यन्ताच्च समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तदर्हम् ५।१।११६ इत्यत्र तदित्यस्य प्रथमोच्चरितत्वेन द्वितीयान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तस्य भावस्त्वतलौ ५।१।११८ इत्यत्र तस्येत्यस्य प्रथमोच्चरितत्वेन षष्ठ्यन्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । धान्यानां भवने क्षेत्रे खञ् ५।२।१ इत्यत्र धान्यानामित्यस्य प्रथमोच्चरितत्वेन धान्यादिशब्दप्रकृतिकषष्ठ्यन्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । सर्वचर्मणः कृतः खखञौ ५।२।५ इत्यत्र सर्वचर्मण इत्यस्य प्रथमोच्चरितत्वेन सर्वचर्मन्प्रकृतिकसमर्थात् प्रत्ययो भवतीत्यर्थो जायते । तत्र कृत इत्यस्य कर्मणि क्तान्तत्वेन तद्योगे करणस्यानुक्तत्वेन तृतीयान्तात् इत्यर्थो ज्ञायते । यथा मुखसम्मुखस्य दर्शनः खः ५।२।६ तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति ५।२।७ इत्यत्र तदित्यस्य प्रथमोच्चरितत्वेन द्वितीयान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । आप्रपदं प्राप्नोति ५।२।८ इत्यत्र आप्रपदमित्यस्य प्रथमोच्चरितत्वेन आप्रपदप्रकृतिकद्वितीयान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु ५।२।९ इत्यत्र 'अनुपद, सर्वान्न, आयानय' इत्यस्य प्रथमोच्चरितत्वेन अनुपदादितत्तच्छब्दप्रकृतिकद्वितीयान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

gitization by eGangotri.Funding: MIDF

प्रथमोच्चरितत्वेन परोवरपरम्परपुत्रपौत्रमनुभवति ५।२।१० इत्यत्र परोवर, परम्पर, पुत्रपौत्र इति प्रथमोच्चरितत्वेन परादिशब्दप्रकृतिकद्वितीयान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । अवारपारात्यन्तानुकामं गामी ५।२।११ इत्यत्र अवार, पार, अत्यन्त, अनुकाममित्येतेषां प्रथमोच्चरितत्वेन अवारपारादितत्तच्छब्दप्रकृतिकद्वितीयान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । समांसमां विजायते ५।२।१२ इत्यत्र समांसमामित्यस्य प्रथमोच्चरितत्वेन समांसमांप्रकृतिकसप्तम्यान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । न तु द्वितीयान्तादिति भ्रमितव्यम् । कृत्स्नायाः समायाः वाय्त्यभावात् 'कालाध्वनोरत्यन्तसंयोगे २।३।५ इत्यस्याप्रवृत्तेः । विपूर्वकजन्धातोर्गर्भविमोचनार्थकत्वेन गर्भविमोचने च कृत्स्नायाः समायाः वाय्त्यभावात् 'कालाध्वनोरत्यन्तसंयोगे २।३।५ इत्यस्याप्रवृत्तेः । व्रातेन जीवति ५।२।२१ इत्यत्र व्रातेनेत्यस्य प्रथमोच्चरितत्वेन व्रातशब्दप्रकृतिकतृतीयान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ ५।२।२४ इत्यत्र तस्येत्यस्य प्रथमोच्चरितत्वेन षष्ठ्यन्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तेन वित्तश्चुञ्चुप्चणयौ ५।२।२६ इत्यत्र तेनेत्यस्य प्रथमोच्चरितत्वेन तृतीयान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तदस्य सञ्जातं तारकारिभ्य इतच् ५।२।३६ इत्यत्र तदित्यस्य प्रथमोच्चरितत्वेन प्रथमान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । तदस्मिन्नधिकमिति दशान्ताड्डः ५।२।४५ इत्यत्र तदित्यस्य प्रथमोच्चरितत्वेन प्रथमान्तात् सगर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते । सस्येन परिजातः ५।२।६८ इत्यत्र सस्येनः इत्यस्य प्रथमोच्चरितत्वेन सस्यशब्दप्रकृतिकतृतीयान्तात् समर्थात् प्रत्ययो भवतीत्यर्थो ज्ञायते ।

यदि 'समर्थानां प्रथमाद् वा' ४।१।८२ इति सूत्रात् 'प्रथमाद्' इति पदमधिकृतं नाभविष्यत् तर्हि पूर्वोक्तस्थलेषु सर्वत्र तत्तत्समर्थादित्यर्थप्रतिपादनाय यत्नान्तराण्याश्रयाणि स्युः । अत्रैव सूत्रे वेति पदमधिक्रियमाणप्रत्ययाः विकल्पेन भवन्तीति बोधयति । अन्यथा प्रत्यया नित्या एव स्युस्तथा च विग्रहवाक्यस्यापि साधुत्वाय सर्वत्र यत्नान्तरमाश्रयणीयं स्यादित्यलम् ।

सन्दर्भग्रन्थसूची

१. दीक्षितः, भट्टोजिः, (वैक्रमाब्दम्, २०३६) वैयाकरणसिद्धान्तकौमुदी (प्रथमो भागः) (अष्टमं संस्करणम्), वाराणसी : चौखम्वासंस्कृतसंस्थानम् ।

२. दीक्षितः, भट्टोजिः, (वैक्रमाब्दम्, २०२१), प्रौढमनोरमा (वैयाकरण सिद्धान्तकौमुदीव्याख्या) (सम्पा. श्रीसीताराम: शास्त्री), वाराणसी : काशी-हिन्दु-विश्वविद्यालयः ।

३. पाणिनि (ख्रैष्टाब्दम्, १९८७) अष्टाध्यायी, वाराणसी : चौखम्वासुरभारती प्रकाशनम् ।

४. भट्टः, नागेशः, (ख्रैष्टाब्दम्,१९५४) परिभाषेन्दुशेखरः, वाराणसी : चौखम्वासुरभारतीप्रकाशनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रमेयविषये न्यायमीमांसयोर्मतम्

अच्युतप्रसादलामिछाने:
सहप्राध्यापक:

"प्रेक्षणार्थकाद् दृश्धातोः ल्युटि कृते दर्शनशब्दो निष्पद्यते ।[1] 'दृशिर् प्रेक्षणे' इत्यस्माद्धातोर्निष्पद्यमानो दर्शनशब्दो हि नयने, स्वप्ने, बुद्धौ, धर्मे, उपलब्धौ, शास्त्रे, दर्पणे[2] च प्रवर्तत इत्यत्र नास्ति संशयः । निर्वर्णनन्तु निध्यानं दर्शनालोकनेक्षणम्[3] इत्यनुसारेण दर्शनशब्दस्यार्थो हि निर्वर्णनम्, निध्यानं, आलोकनम्, ईक्षणञ्च भवति ।

भारतीयचिन्तनधाराया विकासक्रमे दर्शनस्य स्थानं सर्वोपरि वर्तते । प्राच्यदर्शनपरम्परायामास्तिकनास्तिकभेदेन दर्शनानि द्विविधान्येव । तेष्वपि आस्तिकदर्शनानि न्यायवैशेषिकसांख्यायोगपूर्वोत्तरमीमांसाख्यानि षडेव सन्ति । अस्तिकदर्शनेष्वपि नितरामतिशयेन ईयते-अवगम्यते विवक्षितार्थसिद्धिरनेनेति[4] व्युत्पत्या न्यायशब्दस्य निष्पत्तिर्भवति । न्यायो हि प्रमाणशास्त्रम् । अत एवोक्तं 'प्रमाणैरर्थपरीक्षणं न्यायः' ।[5] अस्य शास्त्रस्य प्रवर्तको न्यायसूत्रकर्ता महर्षिर्गौतमः । अस्मिन् शास्त्रे महर्षिणा प्रमाणानां प्रमेयाणाञ्च विस्तारो विहितः ।

आस्तिकदर्शने न्यायदर्शनमिव मीमांसादर्शनमप्येकमन्यतमं वर्तते । मीमांसाशब्दो 'मानपूजायामि'त्यस्माद्धातोः 'मानेर्जिज्ञासायाम्'[6] इति वार्त्तिकेन जिज्ञासारूपेऽर्थे निष्पन्नः । प्रमाणशब्देन व्यवह्रियमाणस्य न्यायशास्त्रस्य सर्वविद्यानां प्रदीपत्वेन, सर्वकर्मणामुपायत्वेन, सर्वधर्माणामाश्रयत्वेन उपयोगो दृश्यते चेद् वाक्यशब्देन व्यवह्रियमाणस्य मीमांसादर्शनस्य वाक्यार्थनिर्णयेऽतितरामुपयोगो दृश्यते । मीमांसादर्शनेन सह न्यायदर्शनस्य प्रमाणविषये कीदृशो मतभेदः ? इति बहुत्र समुपलभ्यते । प्रमाणविषय इव प्रमेयविषयेऽपि न्यायमीमांसयोर्मतभेदो दृश्यते । मतभेदश्च कीदृशः ? इत्येतस्मिन् विषयेऽधः किञ्चिन्निरूप्यते–

न्यायमतम्

आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्[7] इति द्वादशविधं प्रमेयम् । तेषु प्रमेयेषु मध्ये इन्द्रियसन्निकर्षाऽयोग्यत्वाद् आत्मा प्रत्यक्षेण ग्रहीतुं न शक्यते । तर्हि आप्तोपदेशमात्रगम्य आत्मा उत अन्येन प्रमाणेनापि ग्रहीतुं शक्यते इति जिज्ञासायामुक्तं वर्तते-

"इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्"[8] । आत्मसत्त्वेऽनुमानं प्रमाणम् । इच्छादयः षट्पदार्था यत्रोत्पद्यन्ते स आत्मा । इच्छादयः शरीरादौ नोत्पद्यन्ते, यद्युत्पद्यते तर्हि मृतशरीरे व्यभिचारः स्यात् । अतः शरीराद्यतिरिक्त आत्मा सिद्ध्यति । स सर्वस्य द्रष्टा, सर्वस्य भोक्ता, सर्वज्ञ अर्थात् सर्वान्तर्यामी वर्तते ।

"आत्मनो भोगाधिष्ठानमेव शरीरम्" । यतो हि शरीर एव भोगसम्भवादन्यत्रासम्भवाच्च । पुनश्चेष्टेन्द्रियार्थाश्रयः शरीरम् ।[9] चेष्टायाः प्रवृत्तेरिन्द्रियाणामर्थानाम् - सुखदुःखादिभोगानां च य आश्रयस्तच्छरीरम् । सुखदुःखादिभोगसाधनानि त्विन्द्रियाणि । तच्च - "घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः" ।[10] तानि पञ्चज्ञानेन्द्रियाणि पृथिव्यादिमहाभूतानां यथसंख्यं कार्याणीति । अर्थाज्जिघ्रत्यनेनेति गन्धं गृह्णाति इति पृथिव्युत्पन्नस्य गन्धस्य कारणं पृथिवी, कार्यन्तु गन्धः । एवं पृथक्स्वभावानामप्तेजोवाय्वाकाशानां कार्याणि यथाक्रमं रसनचक्षुस्त्वक्श्रोत्राणि भवन्ति । अनया रीत्या घ्राणादीन्द्रियाणि पृथिव्यादिमहाभूतानां कार्याणि, पृथिव्यादिमहाभूतानि त्विन्द्रियाणां कारणानि सिद्ध्यन्ति । एवं "गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः"[11] इति सूत्रतो ज्ञायते यद् घ्राणस्य अर्थो (विषयः) गन्धः, रसनाया रसः, चक्षुषो रूपम्, त्वचः स्पर्शः, श्रोत्रस्य शब्दो बोध्यः ।

"बुद्धिरुपलब्धिज्ञानमित्यनर्थान्तरम्"[12] अर्थाद् बुद्धिज्ञानोपलब्धिशब्दानामेकार्थबोधकत्वात्तेषां चैतन्यमेवार्थः । तद्वान् चेतनोऽयमात्मा देहेन्द्रियादिव्यतिरिक्तः । इतः क्रमप्राप्तं मनो निरूपणं विधीयते - "सुखाद्युपलब्धिसाधनमिन्द्रियं मनः"[13] ज्ञानेच्छादीनामुपलब्धिरन्तरिन्द्रियं मनो विना न सम्भवति । स्मृतिर्हि आत्मन आन्तरज्ञानलक्षणा क्रिया, सा च क्रियेन्द्रियलक्षणं - करणं विना न सम्भवति । तस्मात् स्मृतेर्यदान्तरमिन्द्रियं करणं तदेव मनः । तत्सत्त्वे किं मानमिति चेदुच्यते -"युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्"[14] अर्थाद् रूपरसगन्धस्पर्शशब्दविषयकाण्यनेकानि ज्ञानानि युगपन्नोत्पद्यन्ते किन्तु यदेन्द्रियमनः संयोगो भवति, तदैवैकमेव ज्ञानं जायते । मनसोऽणुत्वात् सर्वविषयकाण्यनेकानि ज्ञानानि एकदा न सम्भवन्ति, यदि मनोऽणुर्न स्यात्तदा मनसि युगपज्ज्ञानानुत्पत्तिर्नोपपद्येत । अतो मनसि अणुत्वमेव सिद्ध्यति ।

---

१. शब्दकल्पद्रुमः (द्वितीयभागः) पृ.६८९ ।
२. सारस्वती सुषमा षड्वर्षे प्रथमोऽङ्कः, पृ.३ ।
३. अमरकोशः, तृतीयकाण्डम्, श्लो. ३१, सङ्कीर्णवर्गः ।
४. न्यायदर्शन कक्षा ९, अस्मादीयं कथनम् ।
५. न्यायभाष्यम् पृ.६ ।
६. सिद्धान्तकौमुदी, वार्तिकसंख्या ५३७ ।
७. न्यायभाष्यम्, पृ.२९ ।
८. पूर्ववत् पृ.३० ।
९. पूर्ववत् पृ.३२ ।
१०. पूर्ववत् पृ.३३ ।
११. पूर्ववत् पृ.३४ ।
१२. पूर्ववत् पृ.३४ ।
१३. तर्कसङ्ग्रहः (न्यायबोधिनीसहित पृ.११ ।
१४. न्यायभाष्यम् पृ.३४ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Digitization by eGangotri.Funding: MIDF

"प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इति"[१५] अर्थाद् वाग्बुद्धिशरीराणामारम्भश्चेष्टा - क्रिया प्रवृत्तिरित्युच्यते। प्रवृत्तिश्च धर्माधर्मात्मिका। हिंसास्तेयप्रतिषिद्धमैथुनानि, अनृतवचनानि, परद्रोहं, परद्रव्याभीप्सां, नास्तिक्यं चेति पापात्मिका प्रवृत्तिरधर्माय। दानं, परित्राणं, परिचरणं, सत्यं, हितं, प्रियं, स्वाध्यायं, दयामस्पृहां, श्रद्धाञ्चेति प्रवृत्तिर्धर्माय।[१६]

"प्रवर्तना लक्षणा दोषाः"[१७] प्रवर्तकत्वमेव लक्षणं स्वरूपं येषां ते प्रवर्तनालक्षणास्ते दोषाः - रागद्वेषमोहात्मकाः। यस्मिनात्मनि मिथ्याज्ञानं तत्रैव रागद्वेषमोहरूपा दोषा भवन्ति। मिथ्याज्ञानं चात्राविद्या। "अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्याः"[१८] रागद्वेषाश्च प्रत्यात्मवेदनीयाः।

"पुनरुत्पत्तिः प्रेत्यभावः"[१९] मृत्वा पुनरुत्पत्तिः प्रेत्यभावः। अर्थाद् देहेन्द्रियादिभिस्सहात्मनो यः पुनः सम्बन्धः, स एव प्रेत्यभावः।

"प्रवृत्तिर्जनितोऽर्थः फलम्"।[२०] सुखदुःखयोः संवेदनमेव प्रधानं फलम्। सुखदुःखयोः संवेदनन्तु देहेन्द्रियादिसत्त्व एव सम्भवति, नान्यथा।

"बाधनालक्षणं दुःखम्"।[२१] अत्र बाधना नाम पीडा, तयानुविद्धं सर्वमेव दुःखम्। "तदत्यन्तविमोक्षोऽपवर्गः"।[२२] दुःखेन जन्मना अत्यन्तविमुक्तिरपवर्गः। अर्थाज्जन्ममरणोच्छेद एवापवर्ग इति।

इत्थमुपरिचर्चितरीत्या न्यायमतेन द्वादशविधं प्रमेयं निरूपितम्। अधुना मीमांसामतेन प्रमेयं निरूप्यते -

अत्रापि प्रथमं तावत् कुमारिलभट्टमतेन प्रमेयं निरूप्यते –

"वयं तावत् प्रमेयन्तु द्रव्यं जातिगुणक्रियाः।

अभावश्चेति पञ्चैतान् पदार्थानाद्रियामहे"॥[२३]

कुमारिलमते द्रव्यं, जातिः, गुणः, क्रिया, अभावश्चेति पञ्चविधं प्रमेयम्। तन्मते परिमाणाधारत्वे सति गुणाधारत्वं द्रव्यत्वमिति द्रव्यस्य लक्षणं भवति। उक्तञ्च-

"परिमाणगुणाधारं द्रव्यं द्रव्यविदो विदुः"।[२४] तन्मते पृथिव्यप्तेजोवाय्वाकाशकालदिगात्मनःशब्दतमांसीतिभेदाद् [२५]द्रव्यमेकादशविधम्।

<u>प्रभाकरमते</u> द्रव्यगुणकर्मसामान्यसमवायशक्तिसंख्यासादृश्यभेदादष्टविधं प्रमेयम्। द्रव्यन्तु पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसिभेदात् नवविधम्।[२६] नैयायिकमतेऽपि द्रव्याणि नवैव। इत्थं नैयायिकमतेन सह प्रभाकरमतेऽपि द्रव्यस्य नाम संख्याविषये भेदो न दृश्यते। भट्टमते तु नवद्रव्यातिरिक्तशब्दस्य तमसश्च द्रव्यरूपेण स्वीकृतत्वादेकादशविधं द्रव्यम्। एवम्

"जातिर्व्यक्तिगता नित्या प्रत्यक्षज्ञानगोचरा।

भिन्नाभिन्ना च सा व्यक्तेः कुमारिलमते मता"॥[२७] अर्थाद् व्यक्त्याश्रिता जातिर्नित्यत्वे सति प्रत्यक्षज्ञानगोचरा भवति। जातेर्जातिमत्त्वस्य (व्यक्तेः) च भेदाभेदसमुच्चयो भवतीति मन्यन्ते भाट्टाः किन्तु

"जातिराश्रयतो भिन्ना प्रत्यक्षज्ञानगोचरा।

पूर्वाकारावमर्शेन प्रभाकरगुरोर्मता"॥[२८] शालिकनाथमिश्राः कथयन्ति - जातिराश्रयतो भिन्नत्वे सति प्रत्यक्षज्ञानगोचरा भवति। न्यायमतेऽपि जातिः प्रत्यक्षज्ञानगोचरा एव भवति। मुक्तावल्यनुसारेण नित्यत्वे सत्यनेकसमवेतत्वं सामान्यस्य(जातेः) लक्षणं भवति।[२९]

<u>भट्टमते –</u>

रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहबुद्धिसुखदुःखेच्छा-द्वेषप्रयत्न-संस्कारध्वनिप्राकट्यशक्तिभेदाच्चतुर्विंशतिगुणाः।[३०] न्यायमतेऽपि गुणाश्चतुर्विंशतिरेव किन्तु भाट्टा ध्वनिप्राकट्यशक्तीनां गुणरूपेण स्वीकुर्वन्ति चेन्नैयायिका धर्माधर्मयोः शब्दस्य च गुणत्वं स्वीकुर्वन्ति इति गुणस्य नामविषये तयोः कश्चिन्मतभेदो जातः। प्राभाकरास्तु संख्याया गुणरूपेण न स्वीकुर्वन्ति अतस्तन्मते संख्यां परित्यज्य रूपरसगन्धस्पर्शशब्दपरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहसंस्कारबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मास्त्रयोविंशतिरेव गुणाः।[३१]

इदानी क्रमप्राप्तं कर्मनिरूपणं विधीयते -

---

१५ पूर्ववत् पृ ३६।
१६ पूर्ववत् पृ १५।
१७ पूर्ववत् पृ ३६।
१८ पातञ्जलयोगदर्शनम्, (साधनपादे) पृ ६५।
१९ न्यायभाष्यम् पृ ३७।
२० पूर्ववत्, पृ ३८।
२१ पूर्ववत्।
२२ पूर्ववत्, पृ ३९।
२३ मानमेयोदयः, पृ १४२।
२४ पूर्ववत्।
२५ पूर्ववत्, पृ १४४।
२६ सारस्वती सुषमा, व १९, अ १, पृ १४।
२७ मानमेयोदयः, प २१८।
२८ प्रकरणपाञ्चिका, पृ ६४।
२९ मुक्तावली (दिनकरीरामरुद्रीयेषु) पृ ५५।
३० मानमेयोदय पृ १२७।
३१ मानमेयोदयपरिशिष्ट पृ २९३।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुमारिलमते –

अविभुद्रव्यमात्रस्थं प्रत्यक्षं चलनात्मकम् ।
वियोगयोगयोर्मूलं कर्म कर्मविदो विदुः ॥[३२]

अर्थाद् अविभुद्रव्यमात्रवृत्तित्वे सति प्रत्यक्षत्वं चलनात्मकत्वञ्च कर्म । एवं योगवियोगयोर्मूलमपि कर्म एव । तच्च उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनभेदात् पञ्चविधम् । न्यायमतेऽपि कर्माणि पञ्च एव– उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनभेदात् ।[३३] प्रभाकरमते कर्म एकमेव । अनेकविधत्वन्तु उपाधिभेदादेव ।

वैशिषिकमते द्रव्यगुणकर्मसामान्यविशेषसमवायाऽभावभेदात् सप्तपदार्थाः । वैशेषिकनये प्रसिद्धाश्चैते पदार्थाः नैयायिकानामप्यविरुद्धाः । वस्तुतो नैयायिकमते “प्रमाणप्रमेयसंशयप्रयोजन-दृष्टान्तसिद्धान्तावयव-तर्कनिर्णयवादजल्प-वितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निश्रेयसाधिगमः[३४] इति षोडशपदार्थाः । इत्थं पूर्वोक्तेषु द्रव्यजातिगुणक्रियारूपभावपदार्थेषु एव नैयायिकैः, वैशेषिकैर्वोक्तानां षोडशानां षण्णां वा भावपदार्थानां परस्परमन्तर्भावात्तेषां पदार्थरूपेण पृथगुल्लेखनमनावश्यकम् । एवं प्रभाकरैः स्वीकृतेषु भावपदार्थेषु मध्ये शक्तेः संख्यायाश्च कुमारिलमते गुणेऽन्तर्भावात् पदार्थरूपेण तयोरस्तित्वमपि भाट्टा न स्वीकुर्वन्ति । एवञ्च विशेषसमवायसादृश्यानाञ्च अस्तित्वमपि भाट्टा न स्वीकुर्वन्ति । अथ च नैयायिकैः, भाट्टैः स्वीकृतस्य अभावपदार्थस्यास्तित्वं प्राभाकरा न स्वीकुर्वन्ति । भट्टनैयायिकयोरुभयोरपि मतेऽभावो द्विविधः, संसर्गाभावोऽन्योन्याभावश्च । अन्योन्याभावस्यैकविधत्वात्तस्य विभागो नास्ति । संसर्गाभावस्तु– प्रागभावप्रध्वंसाभावात्यन्ताभावभेदेन त्रिविधः ।[३५]

तल्लक्षणोदाहरणं यथा –

अनादिः सान्तः प्रागभावः, यथा उत्पत्तेः पूर्वं कार्यस्य । सादिरनन्तः प्रध्वंसः, यथा उत्पत्त्यनन्तरं कार्यस्य ।
त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः यथा भूतले घटो नास्ति । तादात्म्यसम्वन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः, यथा घटः पटो नेति । अस्य स्पष्टीकरणं तु श्लोकवार्तिककारेण यथा विहितम् –

“क्षीरे दध्यादि यन्नास्ति प्रागभाव स उच्यते ।
नास्तिता पयसो दध्नि प्रध्वंसाभाव इष्यते ॥[३६]
गवि योऽश्वाद्यभावस्तु सोऽन्योन्याभाव उच्यते ।
शशशृङ्गादिरूपेण सोऽत्यन्ताभाव इष्यते ॥[३७]

एतावता प्रबन्धेन दर्शनस्य परिचयं दत्वा प्रमेयविषये न्यायमीमांसयोर्मतं मया संक्षेपेण निवेदितम् । अधुना अत्रैव विरम्यत इति ।

सन्दर्भग्रन्थसूची

१) अन्नं भट्टः — तर्कसंग्रहः (टीप्पणीकारः,सम्पादकश्च) आचार्यकेदारनाथत्रिपाठी,मोतीलालवनारसीदास वाराणसी, द्वि.सं.,१९८५ ।

२) कुमारिलभट्टः — श्लोकवार्तिकम्, संम्पादकः हरिदासशास्त्री, तारापब्लिकेशन, वाराणसी ई.१९७८ ।

३) कुलचन्द्रगौतमः — अमरकोशः, नारायणप्रसाद आचार्यः, यशोदापुस्तकालयः, वाराणसी, वि.सं २०१७ ।

४) ज.शि.सा.के.लि. — सानोठिमी भक्तपुर न्यायः(संस्कृतशास्त्रम्) कक्षा ९ र १० संयुक्त, प्र.सं.,वि.सं २०४० ।

५) नारायणपण्डितः — मानमेयोदयः, षट्दर्शनप्रकाशनप्रतिष्ठान, वाराणसी, ई.सं.१९७८ । नारायणभट्टः

६) भट्टोजिदीक्षितः — सिद्धान्तकौमुदी, (तत्त्वबोधिनीटीकासहिता) प्रकाशकः, खेमराज, श्रीकृष्णदासः बम्बई सम्वत् २०१५ ।

७) महर्षिपतञ्जलिः — योगसूत्रम्, चौखम्बा संस्कृत संस्थान्, वाराणसी, द्वि.सं., वि.सं २०३९ ।

८) स्यारराजा राधाकान्तदेववहादुरः — शब्दकल्पद्रुमः (द्वितीयभाग), चौखम्बा संस्कृत सिरिज, वाराणसी, पृष्ठ ६८९ ।

९) वात्स्यायनः — न्यायभाष्यम्, द्वारिकादासशास्त्री (सम्पादकः), सुधीप्रकाशन, वाराणसी, वि.सं.२०४३ ।

१०) विश्वनाथभट्टाचार्यः — न्यायसिद्धधान्तमुक्तावली, हरिरामशुक्लः (संपादकः), चौखम्बासंस्कृतसंस्थान, वाराणसी चतुर्थसंस्करण, वि.सं२०४५ ।

११) शालिकनाथमिश्रः — प्रकरणपञ्चिका प्रमाणपारायण, काशिविश्वविद्यालय वि.सं.२०१८ ।

१२) सुब्रह्मण्य अय्यरः — सारस्वतीसुषमा, काशिराजकीयमहाविद्यालय, षट्वर्षे प्रथमोऽङ्क, चैत्रपूर्णिमा, २००८ ।

१३) क्षेत्रेशचन्द्रचट्टोपाध्याय — सारस्वतीसुषमा, वाराणसेय-संस्कृतविश्वविद्यालयः, १९ वर्षे १अङ्क, सम्वत् २०२१ ।

---

३२. मानमेयोदय पूर्ववत् पृ.२६१ ।
३३. तर्कसङ्ग्रह (न्यायबोधिनीसहित) पृ.७३ ।
३४. न्यायभाष्यम् पृ.४ ।
३५. न्यायसिद्धान्तमुक्तावली पृ.७१ ।
३६. तर्कसङ्ग्रह पृ.१८१-१८२ ।
३७. श्लोकवार्तिकम्, ३३६ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

...main. Digitization by eGangotri.Funding: MIDF

कालिदासस्य सर्वस्वम् : अभिज्ञानशाकुन्तलम्

देवीप्रसादकाफ्ले:
उपप्राध्यापक:

काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला ।
तत्रापि चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम् ॥

१. काव्येषु नाटकं रम्यम् – शब्दार्थशरीरस्य काव्यस्य काव्यत्वाधायकम्, तस्यालौकिकत्वसम्पादकम्, लौकिकविज्ञापनादिमये शब्दार्थे काव्यत्वनिवारकम्, आलोचकलोचनोपलोचनभूतं सहृदयहृदयावर्जकं भवति किमपि विशिष्टं तत्त्वं काव्ये, येनाह्लादिता: सहृदया: अनन्यपरायणमानसीभूता: शब्दप्रधानवेदादिशास्त्रेभ्य:, अर्थतात्पर्यवत्पुराणेतिहासेभ्यश्च शब्दार्थोभयप्राधान्याऽप्राधान्याद् विलक्षणे रसतया कान्तांसम्मिततयोपदेशपरायणे, वेदव्याकरणन्यायादि कटुकौषधोपशमनीयस्य मोक्षप्राप्तिरूपरोगस्य सितशर्करावच्छामके काव्ये विगलितवेद्यान्तरमानन्दमनुभवन्ति । तथा काव्यस्य लक्षणञ्च – "वाक्यं रसात्मकं काव्यम् "[1] इति ।
अत एव काव्यस्य त्रिवर्गसाधनत्वम् – 'त्रिवर्गसाधनं नाट्यम्'[2] यद्वा पुरुषार्थचतुष्टयसम्पादनत्वञ्चेति स्पष्टम् -
चतुर्वर्गफलप्राप्ति: सुखादल्पधियामपि ।
काव्यादेव ... ॥[3]
किञ्च – "धर्मार्थकामोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम्"॥[4] इत्यादिकं काव्यप्रयोजनत्वेन प्रतिपादितमस्ति काव्यशास्त्रिभिरिति काव्यं सर्वथा ग्राह्यं परमावश्यकञ्च भवति । काव्यं नाम समाजोद्यानपुष्पमिति नापलापार्हमस्ति । यथा पुष्पोद्याने गुञ्जन्तो भ्रमरा: पुष्पपरागं पायं पायं
मत्ता भवन्ति, यथा स्वकीयस्य जीवनस्य सार्थकतां चानुभवन्ति, तथैव सामाजिकेन केनचित्कृतं काव्यम्, समाजस्यैव कृते तद् हृदयहार इव समर्पितम्, रमणीयार्थप्रतिपादकम्, समुचितललितपदसन्निवेशचारुकाव्यं स्वकीयैस्तैस्तै: गुणै: समाजोद्याने संभ्रममाणानां भौतिकवादघर्मसन्तप्तानां जनानां हृदये रसपरिषेकं समुपस्थापयन्, साहित्यापरपर्यायतया, साहित्यस्य च सकलशास्त्राणां समवायरूपत्वात्, विविधज्ञानपरिवर्धनाच्च परिमार्जनेन मानवजीवनस्य सार्थकतां प्रतिपादयति । अत एव 'रामादिवद् वर्तितव्यं न रावणादिवदि'ति[5] कृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेशकारि इत्युच्यते ।

समाजे पितृ-पुत्रयो:, मातृ-पुत्रयो:, भ्रात्रो:, भ्रातृ-भगिन्यो:, मित्रयोश्च सम्बन्ध: कथं स्यात्, गुरो: शिष्योपरि, शिष्यस्य गुरोरुपरि, परिजनानां प्रभुं प्रति, प्रभो: परिजनान्प्रति, राज्ञ: प्रजा: प्रति, प्रजानां राजानं प्रति कथं व्यवहार: स्यादिति सर्वेषां सम्बन्धानां व्यवहाराणाञ्चाकरो भवति कव्यमिति । काव्ये सामाजिकव्यवस्थातिरिक्तं किमपि न भवति । यद्यत्समाजे जायते तस्य तस्य प्रकृष्टं प्रष्टं च प्रतिपादनं काव्ये जायत इति सुष्पष्टमेव काव्यमहत्त्वमिति साहित्यस्य समाजादर्शत्वं प्रतिपादितमस्ति ।

काव्यं धृतराजरूपमात्तदण्डं सत् क्वचित् कुमार्गप्रस्थितान् नियमयति, क्वचिद् विवादं प्रशमयति, सदुपदेशै: क्वचिद् रक्षणाय कल्पते, अविनीतान् विनीतान् करोति, उत्साहयति निरुत्साहान्, द्रढयति भीरुकाश्च । किं वहुना यद्यत् असत्यम्, अशिवम्, असुन्दरञ्च भवति तत्तत् सर्वं सत्यं, शिवं, सुन्दरं कल्पते इति - 'सत्यं शिवं सुन्दरं' इति भूत्वा 'रसो वै स:' इति रूपेण व्रह्मणो रसरूपत्वेन काव्यस्य रसात्मकत्वेन च काव्यमपि व्रह्मरूपतां व्यापकतां याति । एवञ्च काव्यं लौकिकवस्त्वपेक्षया विशिष्टं महत्त्वपूर्णञ्च भवति ।

तदिदं काव्यं दृश्यं श्रव्यञ्चेति द्विधा विभक्तमस्ति काव्यशास्त्रिभि: । चक्षुरिन्द्रियग्राह्यं काव्यं दृश्यं श्रोत्रेन्द्रियग्राह्यं काव्यं श्रव्यमित्युच्यते । अर्थात् यत्र नटै: रङ्गमञ्चे उपस्थाप्यमानं रूपं दर्शं दर्शं रसमनुभवन्ति रसिकास्तद् दृश्यम् । यत्र तु श्रवणाभ्यां श्रावं श्रावमेव किमप्याह्लादमनुभवन्ति सहृदयास्तत् काव्य श्रव्यमिति । अस्य नायं भाव: यद् दृश्यकाव्ये केवलं चक्षुरिन्द्रियोपयोगो जायते तथा च श्रव्ये केवलं श्रोत्रेन्द्रियस्यैवेति परन्तु दृश्ये कथोपकथनगीतादीनां श्रवणार्थं श्रवणेन्द्रियस्य एवञ्च श्रव्ये पुस्तकस्य पठनार्थं चक्षुरिन्द्रियस्याप्युपयोगित्वमिति । अपि तु 'प्राधान्येन व्यपदेशा भवन्ति' इति सिध्दान्तं ध्यायं ध्यायं यत्र यस्य प्राधान्यं भवति तत्र तत् काव्यत्वमिति ।

अनयोर्दृश्यश्रव्यभेदयोर्दृश्यं काव्यमधिकं रमणीयतरमिति आलोचका: वदन्ति – 'काव्येषु नाटकं रम्यम्' इति । अत्र नाटकपदेन दृश्यं काव्यमभीष्टमस्ति । यद्यपि दृश्यस्य रूपकोपरूपकत्वेन रूपकस्य च नाटकप्रकरणादिदशभेदेषु, उपरूपकस्य तु नाटिकाद्यष्टादशभेदेषु विभक्तत्वात्[6]२ नाटकं दृश्यकाव्यस्यान्यतमभेदोऽस्ति, तथापि एषु सकलेष्वपि भेदेषु नाटकं प्रधानम् । अतएव 'काव्येषु नाटकं रम्यम्' इत्यत्र नाटकमेवोक्तम् । अस्येदं कारणं श्रव्यकाव्ये ऐतिहासिका: घटना:

---

१. साहित्यदर्पण
२. नाट्य शास्त्र
३. साहित्यदर्पण. ।
४. „ „ ।
५. „ „ ।
६. सा.द.६प. ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

केवलं श्रूयन्ते दृश्ये धृतरामादिरूपैर्नटैर्मञ्चे उपस्थापिता: सकला: घटना: दृष्ट्वानुभूत्वा च सहृदयमनसि रसपरिपाकोऽपि समुचितरूपेण जायत इति उचितमेवोक्तम् – 'काव्येषु नाटकं रम्यम्' इति

२.अभिज्ञानशाकुन्तलस्य रम्यता

(क) शब्दार्थ योजना__- रमणीयार्थप्रतिपादकशब्द: काव्यमिति काव्यस्य सामान्यलक्षणम् ।[७] रमणीयता च लोकोत्तराह्लादजनकतेति । एवञ्च यत्र यत्र लोकोत्तरजनकत्वं तत्र तत्र काव्यत्वमिति व्याप्त्या लोकोत्तराह्लादजनकत्वं काव्यजीवभूतमिति काव्यनिर्माणपरायणा: कवय: सर्वथा प्रयतन्ते स्वकीये काव्ये आह्लादजनकतामाधातुम् । तदेव काव्यं काव्यं भवति यत् सहृदयहृदये कमपि प्रभावं स्थापयेत् । स्वकीये काव्ये प्रभावोत्पादकतामाधातुं कवि: काव्यस्य प्रत्येकस्मिन्नप्यंशे सावधानो भवति । काव्यशरीरभूतौ शब्दार्थौ, आत्मभूतो रस:, उत्कर्षाधायका: गुणा अलङ्काराश्चावयवसंस्थानभूता: रीतय इति काव्यांशा: सन्ति । यदुक्तं राजशेखरेण - "शब्दार्थौ ते शरीरम्, रसादिश्चात्मा, गुणा: शौर्यादिवत्, अलङ्कारा: कटककुण्डलादिवत्, रीतयोऽवयवसंस्थानविशेषवद्"इति ।[८]

लौकिके विज्ञापनादावपि शव्दोऽर्थश्च भवत: । परन्तु रमणीयार्थप्रतिपादकशव्दत्वं रसात्मकं वाक्यत्वं वा काव्यत्वमिति रमणीयस्यार्थस्य प्रतिपादनसामर्थ्यशालिनां शव्दानाम्, विषयानुकूलानाञ्चार्थानां योजना कविकाव्यकुशलतानिकषायमाणा तिष्ठति । अर्थस्य रमणीयतायां सहृदयहृदय एव प्रमाणमस्ति । वाच्यार्थापेक्षया व्यङ्ग्यार्थ एव सहृदयजनसंवेद्य इति प्रत्यक्षमेवाऽस्ति ।

इदमेव च काव्यस्य काव्येतरशव्दार्थाद् भेदकमस्ति । यथोक्तं वाग्देवतावतारेण मम्मटेन -

"रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत्काव्यम्"इति ।[९] यद्वा -

"प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।
यत्तत्प्रसिध्दावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु"॥[१०]

अर्थानुकूलशव्दयोजना तथा कविविवक्षानुकूलार्थयोजनैव कस्यापि कवे: महाकवित्वलाभाय भवति - सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शव्दश्च कश्चन ।

यत्नत: प्रत्यभिज्ञेयौ तौ शव्दार्थौ महाकवे: ॥[११]

एवं शव्दार्थयोजनायां महाकवि: कालिदासोऽतीव निपुणोऽस्ति । काव्ये शव्दार्थयो: सैव स्थिति: कवेरभिमताऽस्ति या परस्परं संपृक्तयो: पार्वतीपरमेश्वरयोरस्ति । अभिज्ञानशाकुन्तले एवंभूतयो: शव्दार्थयो: प्रशस्यतर: प्रयोगोऽस्ति । प्रमाणरूपेणैकं लघुतरं वाक्यमुपस्थाप्यते यल्लताकुञ्जे वर्तमानयो: शकुन्तलादुष्यन्तयोर्गौतमीसमागमनसूचकं सखीभ्यामुक्तम् -

"चक्रवाकवधू ! आमन्त्रयस्व सहचरं ननु ऊपस्थिता रजनी" ।[१२]४

अत्र 'चक्रवाकवधू'रित्यनेन शकुन्तला सम्वुध्यते, सहचरपदेन दुष्यन्त:, रजनीपदेन च गौतमी उक्ताऽस्ति

अत्रेदमभिव्यज्यते यच्छकुन्तलादुष्यन्तयो: प्रेम सम्प्रति चक्रवाकपक्षियुगलमिवाऽस्ति । दुष्यन्तस्तु क्षणं क्षणं शकुन्तलामेवानुवर्तते, कदाचित् साक्षात् कर्मणा कदाचिच्च भावनयेति सहचरपदाभिव्यक्ति: । यथा समागतायां रजन्यां चक्रवाकयो: वियोगो जायते तथैव गौतम्यां समागतायां शकुन्तलादुष्यन्तयोरपि पार्थक्यं भविष्यतीति गौतम्या: प्रतिपादने रजनीपदं कियत्सामर्थ्यमस्तीति सहृदया एव विभावयन्तु ।

एतेषां पदानामभिव्यञ्जना शकुन्तलया झटित्येव गृहीतम्, तथा च दुष्यन्तो लतास्वन्तरित इति । पुनश्च गौतम्या सहोटजं गच्छन्त्या शकुन्तलया दुष्यन्त: सम्वोधित: यथा –

"लतागृह ! सन्तापहर ! आमन्त्रयामि त्वां पुनरपि परिभोगार्थम् "।[१३]

सामान्येऽपि स्थले लघुतरैरपि वाक्यै: श्लोकै: वा एवंभूतशव्दार्थयोजना प्रतिपादिताऽस्ति कविना । यथा- "धूमोपरुध्ददृष्टेरपि यजमानस्य पावकमुख एवाहुतिर्निपतिता" वत्से सुशिष्यपरिदत्ता विद्येवाशोचनीयासि संवृत्ता ।[१४] मनोभावनादशावर्णने कालिदासोऽतीव निपुणोऽस्ति । यथा -

गच्छति पुर: शरीरं धावति पश्चादसंस्तुतं चेत: ।
चीनांशुकमिव केतो: प्रतिवातं नीयमानस्य ॥[१५]

अत्र गच्छति, धावति इतिक्रियापदम्, असंस्तुतमिति चेतोविशेषणम्, प्रतिवातं नीयमानेन चीनांशुकेनोपमाविधानं चातीव विषयानुकूलमस्ति । अत एव केनचित्प्रशंसितोऽस्ति कालिदास: । यथा - निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु ।

प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते ॥ इति,

---

७. रसगङ्गाधर: ।
८. सा.द.१, ५. ।
९. का.प्र. ।
१०. ध्वन्यालोक प्र.उ.,४का. ।
११. सा.द. ।
१२. शाकुन्तलम् ।
१३. " " ।
१४. " " ।
१५. " " प्रथमोऽङ्क ३६तम: श्लोक: ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ख) रसयोजना - रसोऽस्ति काव्यस्यात्मा । उक्तञ्च - "वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्"इति ।[१६] 'एक एव भवेदङ्गी श्रृङ्गारो वीर एव वा' ।[१७] इति नाट्यशास्त्रानुसारेणात्राभिज्ञानशाकुन्तलेऽङ्गीरसः संयोगश्रृङ्गारोऽस्ति । अन्ये विप्रलम्भ-श्रृङ्गार-हास्य-करुण-वीर-भयानकाऽद्भूत-वात्सल्यादयो रसाश्चाङ्गरूपेणोपनिवध्दाः सन्ति ।

महाकविः कालिदासो रससिध्दः कवीश्वरोऽस्ति । अत एव रसपरिपाकेऽनेनातीव साफल्यमाप्तमस्ति । यस्य रसस्य योजना कविना कृतास्ति स रसः साक्षादेव तत्रोपस्थितोऽस्ति । संयोगश्रृङ्गारे श्रृङ्गारोऽपि श्रैङ्गारिकतामनुभवति । यथा –

किं शीकरैः क्लमविमर्दिभिरार्द्रवातं
सञ्चालयामि नलिनीदलतालवृन्तम् ।
अङ्के निधाय चरणावुत पद्मताम्रौ
संवाहयामि करभोरु ! यथा सुखं ते ॥[१८] पुष्पशैय्याया एकभागोपविष्टेन राज्ञा दुष्यन्तेन प्रियासमागमसुखमनुभवता यत्कैङ्कर्यमाचरितं तत्तु श्रीकैङ्कर्यमिव सर्वथा पूरयति मनोरथान् सहृदयानाम् । वियुक्तयोः तयोः वियोगोऽपि विमनायमानतां याति

अनेन लीलाभरणेन ते प्रिये ! विहाय कान्तं भुजमत्र तिष्ठता ।
जनः समाश्वासित एष दुःखभागचेतनेनापि सता न तु त्वया ॥[१९]

इति राज्ञा शकुन्तलानिन्दामुखेन कविः सर्वथा निन्दयति कामिजनमर्जनायानलायमानं वियोगमिति ।
शकुन्तलावियोगानलेन दन्दह्यमानहृदयो राजा दुष्यन्तो यथा यथा व्याकुलतामनुभवति तथा तथा सहृयानां हृदयमपि तथा ग्लानिमनुभवति यथा दिवसेन शशाङ्को ग्लापितो जायते -

तपति तनुगात्रि ! मदनस्त्वामनिशं मां पुनर्दहत्येव ।
ग्लपयति यथा शशाङ्कं न तथा हि कुमुद्वत दिवसः ॥[२०]

श्रृङ्गारातिरिक्तः करुणो रसोऽभिज्ञानशाकुन्तलेऽतीव प्रवलोऽस्ति । चतुर्थेऽङ्के करुणरसः साकारतां गतोऽस्ति । आश्रमललामभूता, कण्वस्य द्वितीयोच्छ्वास इव वर्तमाना प्रकृतिपुत्री शकुन्तला पतिगृहं यातीति । अनेन न हि केवलं महर्षिः कण्व एव दुःखितोऽस्ति, अपि तु आश्रमस्य कणं कणमपि दुःखसागरे निमग्नमस्ति -

यास्यत्यद्य शकुन्तलेति हृदयं संस्पष्टमुत्कण्ठया
कण्ठस्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनया विश्लेषदुःखैर्नवैः ॥[२१]

क्वचित् मृगी अर्द्धचर्वितमपि दर्भकवलं शकुन्तलागमनवृतान्तेन दुःखिता सती उद्गिरति, मयूरा नर्तनं परित्यजन्ति, लताः पाण्डुपत्ररूपेणाश्रुपातं कुर्वन्ति –

उद्गीर्णदर्भकवला मृगी परित्यक्तनर्तना मयूरी ।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रु इव लताः ॥ [२२]

मृगपोतो भूयो भूयः शकुन्तलायाः पटान्ते सज्जते, न च तन्मार्गं जहाति –

यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे ।
श्यामाकमुष्टिपरिवर्धितको जहाति ।
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥[२३]

आश्रमपदे कोऽप्येवं नास्ति यः खलु शकुन्तलावियोगेन दुखितो नास्ति । यथाऽनसूया कथयति–
सखि ! आश्रमपदे नास्ति कोऽपि चित्तवान्, यस्त्वया विरह्यमाणो न ताम्यति । प्रेक्षस्व तावद् –

पुटकिनीपत्रान्तरितां व्याहृतोऽपि न खलु व्याहरति प्रियाम् ।
मुख उद्व्युढमृणालस्त्वयि दृष्टिं ददाति चकवाकः ॥[२४]

एवमेवान्येऽपि रसाः परिपाकतां गताः सन्ति ।

(ग) अलङ्कारयोजना – महाकविना कालिदासेनाभिज्ञानशाकुन्तले रसानुगतप्रकृष्टन्यासरूपाः अलङ्काराः अनुप्रासाऽनुपमोउपमानुत्प्रेक्षावती-उत्प्रेक्षासमासोक्ति-अर्थान्तरन्यास-काव्यलिङ्ग-विभावना-विशे

---

१६. अग्निपुराणम् ।
१७. सा.द. ।
१८. शाकुन्तलम् ।
१९. ,, ,, ।
२०. ,, ,, ।
२१. ,, ,, ।
२२. ,, ,, ।
२३. ,, ,, ।
२४. " ", ४१८ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षोक्ति-विरोधाभास-रूपक-दीपक-तुल्ययोगितादयः सूपनिबद्धाः सन्ति, यैः कालिदासस्य कवितावनिताऽतीव समलङ्कृताऽस्ति । तथाप्यस्योपमा सहृदयहृदये किमपि विशेषं वैशिष्ट्यमुपस्थापयति ।

यथा - अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम् ।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
नजाने भोक्तारं कमिह समुपस्थास्यति भुवि ॥[२५]

अत्र इवशब्दस्य पुष्पमित्यादेः सर्वत्र योजनात्, -मालोपमा । अखण्डमिति विशेषणेन च फलस्य खण्डत्वे तद्भोक्तुर्भोगांशे वैकल्यं स्यादिति तत्प्रत्याख्यायते । अत एवात्र परिकरोऽलङ्कारश्चापि स्पष्ट एव ।

कठिनमपि मृगाक्ष्याः वल्कलं कान्तरुपं
न मनसि रुचिभङ्गं स्वल्पमप्यादधाति ।
विकचसरसिजायाः स्तोकनिर्मुक्तकण्ठं
निजमिव कमलिन्याः कर्कशः वृन्तजालम् ॥[२६]

अत्र श्रौतोपमाऽलङ्कारः ।

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥[२७]

अत्रोपमानोपमेययोरेकस्यापि सौन्दर्यरूपसमानधर्मस्य वाक्यभेदेन पृथङ्निर्देशात्प्रतिवस्तूपमा, चतुर्थचरणे सामान्येन विशेषस्य समर्थनरूपोऽर्थान्तरन्यासोऽलङ्कार इत्यनयोः संसृष्टिः ।

इदं किलाव्यजमनोहरं वपु-
तपःक्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति ॥[२८]

अत्र सुकुमारवपुषा तपःक्षमसाधनवाञ्छा नीलोत्पलपत्रधारया शमीलताच्छेदनवाञ्छावदिति विम्वप्रतिविम्वभावत्वादसम्भववस्तुसम्वधरूपो निदर्शनालङ्कारः ।

अधरः किशलयरागः कोमलविटपानुकारिणौ वाहू ।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥[२९]

अत्रोपमालङ्कारः । एवमन्येषामप्यलङ्काराणां सुयोजनाऽत्र दृश्यते ।

(घ) गुण-रीतियोजना - काव्ये गुणाः शौर्यादिवदुत्कर्षाधायकाः रीतयश्चावयवसंस्थानवदित्यभिमताः सन्ति । समासाऽसमासत्वमादाय प्रायो गुणानां रीतीनाञ्च समाना स्थितिरस्ति । यथाऽसमासोऽल्पसमासो वा माधुर्यं गुण इति कथ्यते तथैव वैदर्भी रीतिरपि ।३ कालिदासेनाभिज्ञानशकुन्तले क्वाप्योजोगुणस्य, शव्दाडम्वरस्य, दीर्घसमासस्य४च योजना नैव कृताऽस्तीति सर्वत्र प्रसादस्य माधुर्यस्य च गुणस्य वैदर्भीरीते श्च साम्राज्यमस्ति । पदशैय्या सर्वत्र सरला, मधुरा, मनोहरा चास्तीति महद्वैशिष्ट्यमस्त्यस्य शाकुन्तलनाटकस्य ।

(ङ) प्रकृतिवर्णनम् - अभिज्ञानशाकुन्तले प्रकृतेः आलम्वनमुद्दीपनञ्चेत्युभयमपि रूपं सुस्पष्टतया उपनिबद्धमस्ति । प्रकृतेः आलम्वनरूपेणाऽस्ति शकुन्तला, 'शकुन्तैः पक्षिभिः लालितेति शुकन्तला' इति व्युत्पत्त्या प्रकृतिपुत्रीत्वाद् उद्दीपनरूपमस्ति लतापुञ्जादिकम् । अभिज्ञानशाकुन्तलीयप्रकृतिवर्णनस्य वैशिष्ट्यमस्ति यदत्र प्रकृतिर्नैव केवलं वर्णिताऽस्ति, अपि तु स्वयं पात्रवदाचरति । यथा -

१ - 'एष वातेरितपल्लवाङ्गुलिभिः मां व्याहरतीव चूतवृक्षः' ।[३०]
२ - 'अनुमतगमना शकुन्तला तरुभिरियं वनवासवन्धुभिः'[३१] इत्यादि ।

(च) सौन्दर्यवर्णनम् - नायिकायाः सौन्दर्यवर्णने नाटकमिदं कस्यापि काव्यस्य पश्चाद्वर्ति नास्ति । यथा - अधरः किशलयरागः कोमलविटपानुकारिणौवाहू ।

कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥[३२]
'सरसिजमनुविद्धं शैवलेनापि रम्यम्' इत्यादि ॥[३३]

---

२५. " ", २।११ ।
२६. " ", १।२१ ।
२७. " ", १।२० ।
२८. " ", १।१८ ।
२९. " ", १।२२ ।
३०. शाकुन्तलम् ।
३१. शाकुन्तलम्, ४।१३ र
३२. पूर्ववत्, १।२२ ।
३३. पूर्ववत्, २० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'अनाघ्रातं पुष्पं किसलयमलूनं कररुहैः' इत्यादि।
एवमेभिर्विशेषणैः नाटकमिदं न हि केवलं कालिदासकाव्येष्वेव -'कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्' इति प्रशंसितमस्ति अपि तु सम्पूर्णेऽपि संस्कृतसाहित्ये शीर्षस्थानभूतं शिरोरत्नत्वेन च ख्यातख्यातमस्ति-

"काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला"। इति।

(ज) नाट्यदृटष्या अभिज्ञानशाकुन्तलम् -

एकस्य तिष्ठति कवेगृह एव काव्यं–
मन्यस्य गच्छति सुहृद्भवानि यावत्।
न्यस्यविदग्धवदनेषु पदानि शाश्वत्
कस्यापि सञ्चरति विश्वकुतुहलीव ॥ इति राजशेखरोक्तिदिशा

समुचितललितसन्निवेशचारुकाव्यं सकलेषु भुवनेषु तदा सञ्चारमाप्नोति यदा तद् आलोचकभावयित्री भावना निकषोपलकषितं सत् स्वकीयमुत्कृष्टत्वं ख्यापयेत्। यद्यपि कविताविलासो महाकविः कालिदासः स्वयं नाट्यविधानप्रयोगनिपुणोऽस्ति, यथा नटी कथयति -'सुविहितप्रयोगतयाऽऽर्यस्य न किमपि परिहास्यते'।४ तथापि यावद्विदुषां परितोषो न स्यात्तदा प्रयोगविज्ञानं विज्ञानं नैव भवति - आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्।

वलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥[३४]

इति सूत्रधारोक्त्या सुष्पष्टमस्ति। अभिज्ञानशाकुन्तलमेकं नाटकमस्ति। अस्य उत्कृष्टता तदा सेत्स्यति यदा नाट्यशास्त्रदृटचेदमुत्कृष्टं स्यात्।

नाटकं ख्यातवृत्तं स्यात्पञ्चसन्धिसमन्वितम्।
विलासद्धर्यादिगुणवद्युक्तं नानाविभूतिभिः॥
सुखदुःखसमुद्भूतिनानारसनिरन्तरम्।
पञ्चाधिका दशपरास्तत्राङ्काः परिकीर्तिताः॥
........................बन्धनं तस्य कीर्तितम्॥[३५]

एतल्लक्षणानुसारेण नाटके मुख्यरूपेण येषां तत्त्वानां समावेशो भवति तानि सन्ति - (अ) कथानकम् (आ) पञ्चसन्धिसन्निवेश (इ) अङ्काः (ई) नायकाः (उ) अङ्गीरसः (ऊ) पात्राणि।

(अ) कथानकम् - अभिज्ञानशाकुन्तलस्य कथानकमितिहासप्रसिद्धं महाभरताद् गृहीतमस्ति। यद्यपि दुर्वाससः शापादिकं मूलकथानके नास्ति तथापि यथा चित्रकारेण रेखां कृत्वा रङ्गैः रञ्जयित्वा चित्रं हृद्यं करोति तथैव कविरपि इतिहासप्रसिद्धं कथानकमादाय रसरङ्गैः रञ्जयित्वा सहृयहृदयास्वाद्यं करोति काव्यम्। कथावस्तुदृष्ट्याऽभिज्ञानशाकुन्तलं नाटकमतीवोदात्तमस्ति।

(आ) <u>सन्धयः</u> - पञ्चसन्धिसमन्वितत्वं नाटकस्यान्यतमं तत्त्वमस्ति। अभिज्ञानशाकुन्तले मुख-प्रतिमुख-गर्भविमर्श-निर्वहणसन्धयः समुचितरूपेणोपनिवद्धाः सन्ति। प्रथमादङ्कादारभ्य द्वितीयाङ्कस्य 'उभौ परिक्रम्योपविष्टौ' इति यावत् मुखसन्धिरस्ति। द्वितीयाङ्कस्य 'सखे! माधव्य! अनाप्तचक्षुःफलोसि'। इत्यतः प्रारभ्य तृतीयाङ्कं यावत् प्रतिमुखसन्धिरस्ति। चतुर्थाङ्कतः प्रारभ्य पञ्चमाङ्के गौतम्युक्तिं यावद् गर्भसन्धिरस्ति। पञ्चमाङ्के 'राजा शकुन्तलां निर्वर्ण्य आत्मगतमित्यत आरभ्य षष्ठाङ्कान्तं यावन्निर्वहणसन्धिरस्ति। केषञ्चिन्मतानु
सारेण तु प्रथमाङ्के मुखसन्धिः, द्वितीयतृतीययोः प्रतिमुखसन्धिः, चतुर्थपञ्चमाङ्कयोः गर्भसन्धिः, पञ्चमाङ्कस्या ङ्कावतारे षष्ठाङ्के च अवमर्शसन्धिः, सप्तमाङ्के च निर्वहणसन्धिरस्ति।

(इ) अङ्काः - नाकटं पञ्चाङ्कान्न्यूनं दशाङ्कादधिकं न भवति। अभिज्ञानशाकुन्तले सप्ताङ्काः सन्ति। एवं नाटकमिदं नातिसंक्षिप्तं नातिविस्तृतञ्चास्ति। नाटकमिदं समस्याप्रधानं नाटकमस्ति। अस्य समस्याऽभिज्ञानभूतमङ्गुलीयकमस्ति। पञ्चमाङ्कान्ते राजपुरुषैः धीवरहस्ते प्रप्तमिदमङ्गुलीयकं राज्ञः समक्षमुपस्थापितम्। एवं राज्ञा प्राप्तेऽङ्गुलीयके तत्रैव नाटकस्य समाप्तिरुचिता तथापि षष्ठसप्तमाङ्कयोः कथानकं कविना पौरस्त्यनाट्यसिद्धान्तदृष्ट्या सुखान्ते समापयितुं विहितमस्ति।

(ई) नायकः - पौरस्यनाट्यसिद्धान्तानुसारेण नाटकस्य नायकः प्रख्यातवंशीः, राजर्षिः, धीरोदात्तगुणान्वितो दिव्यो वा भवति।[३६] अभिज्ञानशाकुन्तलस्य नायको दुष्यन्तः प्रख्यातपुरुवंशे उत्पन्नोऽस्ति - 'जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव'[३७] इति। तथा च रजर्षिः धीरोदात्तश्चास्ति। यतो हि धीरोदात्तनायकस्य सर्वे गुणाः दुष्यन्ते दृश्यन्ते।[३८] एवञ्च नायकदृष्ट्यापि नाटकमिदं प्रशस्यतरमस्ति।

(उ) अङ्गीरसः - नाट्यशास्त्रदृशाऽभिज्ञानशाकुन्तले सम्भोगश्रृङ्गारोऽङ्गीरसोऽस्ति।[३९] अन्ये रसा अङ्गभूताः सन्ति।

---

३४. " "

३५. सा.द. ६/७/८/९/१०/११/

३६. सा.द., षष्ठपरिच्छेदे- प्रख्यातवंशो रजर्षिः धीरोदात्तः प्रतापवान्।
दिव्योक ध दियादिव्यो वा गुणवान्नायको मतः॥२॥ इति।

३७. शाकुन्तलम्, १/२२/

३८. सा.द., षष्ठपरिच्छेदे- महासत्वोक तिगम्भीरः क्षमावानविकत्थनः।
स्थिरो निगुढाहङ्कारो धीरोदात्तो दृढव्रतः॥

३९. सा.द., एक एव भवेदङ्गी श्रृङ्गारो वीर एव वा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ऊ) *पात्राणि* - पात्राण्यपि लक्षणनुसारेणैव सन्ति तत्र दुष्यन्तः, कण्वः, विदुषकश्चेति त्रीणि पुरु पात्राणि, शकुन्तला, गौतमी, अनसूया, प्रियम्वदा चेति चत्वारि स्त्रीपात्राणि च प्रमुखानि सन्ति । अतः पात्राणां न्यूनत्वेन नाटकमिदमभिनेयमस्ति ।

(ऋ) नाटचावस्था - पञ्चानामपि नाट्यावस्थानां समुचितप्रयोगोऽभिज्ञानशाकुन्तले दृश्यते । एषु 'फलसिद्धय औत्सुक्यारम्भः, फलप्राप्तये कृतः प्रयत्नः यत्नः, फलप्राप्तौ सन्दिग्धावस्था प्राप्त्याशा, फलसिद्धौ विघ्नविनाशः फलप्राप्तिनिश्चिन्तता च नियताप्तिः, समग्रफलप्राप्तिश्च फलागम इत्युच्यते ।

अभिज्ञानशाकुन्तलस्य प्रथमाङ्के 'अपि नाम कुलपतेरसवर्णक्षेत्रसम्भवा भवेत्' इति दुष्यन्ते शकुन्तलाप्राप्त्यौसुक्याद् आरम्भः, द्वितीयाङ्कतस्तृतीयाङ्कपर्यन्तं यावदुभाभ्यां पक्षाभ्यामुभयोः प्राप्तये प्रयत्नः क्रियत इति यत्नः, चतुर्थेऽङ्के दुर्वाससः शापात् शकुन्तलप्राप्तये विघ्नस्य सद्भावात् संन्दिग्धावस्थया प्राप्त्याशा, पञ्चमाङ्कस्याङ्कावतारे अङ्गुलीयकप्राप्त्या शकुन्तलायाः प्राप्तौ निश्चयान्नियताप्तिः, सप्तमाङ्कान्ते च सपुत्राया शकुन्तलायाः प्राप्त्या फलागम इति पञ्चानामवस्थानां समुचितविधानमस्ति ।

(ॠ) अर्थप्रकृतयः - अर्थप्रकृतिर्नाटकस्य महत्त्वपूर्णं तत्त्वमस्ति । अस्य पञ्च भेदाः[४०] सन्ति । 'अर्थप्रकृतयः प्रयोजनसिद्धिरेव' इत्युच्यते । तेषां सन्निवेशो यथा - प्रथमाङ्के 'इदानीमेव...सेमतीथंगतः' इति वैखानसोक्तिः शाकुन्तलस्य बीजमस्ति । द्वितीयाङ्के- 'सखे ! माधव्य ! अनाप्तचक्षुःफलोऽसि' इत्यतः 'सर्वं खलु कान्तमात्मानं पश्यति' इति विदुषकोक्तिं यावत् विन्दुरस्ति । विदुषकवृत्तान्तं पताकाऽस्ति । यतो हि विदुषकः क्वापि फलप्राप्तौ राज्ञः सहायं न करोति । अथवा शापवृत्तान्तं वा अङ्गुलीयकवृत्तान्तं पताकेति । इन्द्रसारथेर्मातलेः वृत्तान्तं प्रकटयति । सप्तमाङ्के दुष्यन्तशकुन्तलयोः पुनर्मिलनं मुख्यं कार्यमस्ति । एवं नाट्यतत्त्वदृशा अभिज्ञानशाकुन्तलमेकं प्रशस्तं नाटकमस्ति ।

३. तत्रापि चतुर्थोऽङ्कः - कवितावनिताविलासेन महाकविना कालिदासेन विरचितमभिज्ञानशाकुन्तलं देशेषु विदेशेषु च समधिकं ख्यातं संस्कृतसाहित्यललामभूतञ्चास्ति । इदन्तु निश्चितं यत् काव्यं कविकर्म । यथा तस्मै रोचते तथैव काव्यं करोति । अत एव - अपारे काव्यसंसारे कविरेव प्रजापतिः ॥

यथास्मै रोचते विश्वं तथैव परिवर्तते ॥

इति वदन्तो व्यासमहोदयाः सङ्गच्छन्ते । स्वकर्मभूतकाव्ये कुत्रापि कस्यचित्पात्रस्य क रूपेण कविः स्वयमेवोपस्थितो भवति तथा च महत्वपूर्णानां सिद्धान्तानां विवेचनां करोति । एवञ्च काव्यं काव्यप्रयोजनानां पारं प्रापयति चतुर्वर्गफलप्रदायकत्वेन, त्रिवर्गसाधनत्वेन, कीर्तिप्रीतिप्रतिपादकत्वेन वा ।

काव्यस्य यस्मिन्नंशे कविः स्वयमेवोपस्थितः सन् सिद्धान्तानां प्रतिपादनं करोति स एवांशस्तस्य काव्यस्य हृद्यं भवति । महाकवेः कालिदासस्य सर्वस्वभूतस्याऽभिज्ञानशाकुन्तलस्य३ चतुर्थेऽङ्के कविः स्वयं महर्षि कण्वरूपेणोपस्थितोऽस्ति । केवलमस्मिन्नेवाऽङ्के महर्षिकण्वस्य दर्शनं जायतें । अत एव चतुर्थमङ्कं शा
कुन्तलं हृद्यतमं रमणीयतरञ्च मत्वाऽलोचकैः -

काव्येषु नाटकं रम्यं तत्र रम्या शकुनतला ।
तत्रापि चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम् ॥

इत्येकस्वरेण स्वीकृतमस्ति । अभिज्ञानशाकुन्तलस्य चतुर्थेऽङ्के लौकिकताऽलौकिकतयोः, प्रकृतिमानवयोः विलक्षणं सम्मिश्रणमस्ति । यद्यपि काव्यवस्तु लौकिकमेव भवति तत्रालौकिकस्य रसस्य धारां प्रवाहयित्वा कविस्तत् हृद्यमास्वाद्यञ्च सम्पादयति । सर्वत्रैव काव्ये लौकिकताऽलौकिकतयोः सम्मिश्रणं भवत्येव तथापि शाकुन्तले 'वनौकसोऽपि वयं लौकिकज्ञा एव' इति महर्षेः कण्वस्योद्घोषो लौकिकताऽलौकिकतयोः संमिश्रणेन चतुर्थाङ्कस्य वैशिष्टयं द्विगुणयति । शकुन्तलादुष्यन्तयोः प्रणयप्रसङ्गे 'दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः[४१] 'इत्याकाशवाग्दिशा राज्ञः दुष्यन्तस्य तेजेद्वहन्त्याः अरण्यवासिन्याः शकुन्तलायाः पतिगृहं हस्तिनापुरं प्रति गमनेन च अरण्यराजप्रसादयोः कमपि विशिष्टं विलक्षणं घनिष्ठतरं च सम्बन्धं प्रतिपादयति चतुर्थोऽङ्कः । दुर्वाससः शापः, आकाशवणी, शकुन्तलायाः पतिगृहगमनम्, वनस्पतिभ्यः शकुन्तलायै आभूषणप्रदानम्,
कोकिलरवेण शकुन्तलायाः पतिगृहगमनाय वनस्पतीनां स्वीकृतिः, मृगपोतेन शकुन्तलामार्गावरोधः, शकु
न्तलायाः प्रस्थानञ्चेति चतुर्थाङ्कस्य महत्त्वपूर्णाः घटनाः सन्ति । दुर्वाससः शापस्य घटना यद्यपि मूलकथा नके नास्ति तथाप्यौचित्यदृष्ट्या कविना स्वप्रतिभयाऽस्या :घटनायाः समावेशः कृतोऽस्ति - अग्रे दुष्यन्तः शकुन्तलायाः परित्यागं करिष्यति, स्वपत्नीत्वेन तां न स्वीकरिष्यति निश्चितमेवास्ति । किन्तु एवमेव दुष्यन्तेन शकुन्तलायाःअनादरे विरसतापातः स्यात्, येन निखिलस्यापि काव्यस्य सौन्दर्यमकिञ्चित्करं स्यात् । अत एवाभिज्ञानशाकुन्तलस्य चमत्कारो दुर्वाससः शापघटनायामाश्रितोऽस्तीति शापस्य चतुर्थाऽङ्के प्रतिपादनाच्चतुर्थोऽङ्को विशिष्टं स्थानं विभर्ति । शकुन्तलादुष्यन्तयोः परस्परं प्रेम सञ्जातम्, तत्प्रेम कथमपि बान्धवकृतं नास्ति । अनेन प्रणयप्रसङ्गेन सह न तु दुष्यन्तैव बान्धवा अभिज्ञाः सन्ति न तु शकुन्तलावन्धवा एव । यथा कण्ववचनेन ज्ञायते - 'त्वय्यस्याः कथमप्यवान्धवकृतां स्नेहप्रवृतिं च ताम्' इति । यद्याकाशवाणी नस्यात्तदाऽस्योद्घाटनमेव न स्यात् । आकाशवाचा -

दुष्यन्तेनाहितं तेजो दधानं भूतये भूवः ।
अवेहि तनयां ब्रह्मन् अग्निगर्भां शमीमिव ॥[४२]

---

४०. „ „ पष्ठपरिच्छेदे - बीज बिन्दू पताका च प्रकरी कार्यमेव च । इति
४१. शाकुन्तलम्, ४।६ ।
४२. शाकुन्तलम्, ४।६ ।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति श्रुत्वैव ज्ञातसकलवृत्तन्तः महर्षिः कण्वः शकुन्तलायाः कौतुकप्रस्थानं सम्पादितम् । तेन तस्याः पति गृहगमनाय 'सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्' इति सर्वैः वनवासिवन्धुभिः तरुभिः सहानुमतिः प्रार्थना च संविहिता । प्रार्थितैश्च तैः कोकिलरवेणानुमतिर्प्रदत्ता[४३] आभूषप्रदानञ्चकृतम्४ यदा शकुन्तला पतिगृहं प्रति प्रस्थानं करोति तदा तस्याः कृतकपुत्रेण मृगशावकेन मार्गावरोधं करोति[४४] इतीदं किमपि विशिष्टं रमणीयं मानवजीवनेन सह प्रकृतितादात्म्यात्मकञ्चास्ति । मानवजीवनेन सह प्रकृतितादात्म्यादभिज्ञानशाकुनतलस्य चतुर्थोऽङ्क किमपि विशिष्टमेव चमत्कारं धारयति । अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्य वैशिष्टयं प्रतिपादनाऽवसरेऽस्य धार्मिकं सामाजिकञ्च· महत्त्वं नैव विष्मरणीयम् । धर्मशास्त्रदृष्टयास्य किमपि वैशिष्टयं वरीवर्ति । 'अतः समीपे परिणेतुरिष्यते । प्रियाऽप्रिया वा प्रमदास्ववन्धुभिः' इति धर्मशास्त्रस्य रक्षणार्थमेव अकाशवाचा शकुतलाविवाहवार्तां ज्ञात्वा तत्कालमेव कण्वेनशकुन्तलायाः पतिगृहप्रेषणस्य व्यवस्था कृता । 'ओदकान्तं सिग्धोऽनुगम्यते'।[४५] इत्यस्यापि व्याख्यानं कण्वशिष्यमुखेनोपस्थाप्य शाकुन्तलस्य चतुर्थाङ्के धर्मशास्त्रस्य रक्षा कृताऽस्ति ।

अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्य परं वैशिष्टयमस्ति सामाजिकता । काव्यं नाम समाजोद्यानपुष्पमितिसामाजिकतया काव्यं परां कोटिमधिगच्छति । महर्षिणा कण्वेन दुष्यन्ताय शकुन्तलायै च कृतोपदेशः शाश्वतिकः, समाजे वर्तमानस्य सर्वस्यापि कृते महते उपयोगायास्ति । यतो हि महर्षिणा कण्वेन दुष्यन्ताय कृतोपदेशः[४६] प्रत्येकस्यापि पुरुषस्य कृते उपयोगी आवश्यकश्चास्ति । एवं शकुन्तलाऽपि तथैव शिक्षिताऽस्ति, या शिक्षा सकलानां बधूनां कृते उपयोगी आवश्यकश्चास्ति । शुश्रुषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने ।

भर्तुविप्रकृतापि रोषणतया मास्म प्रतीपं गमः ॥

भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी ।

यान्त्येवं गृहिणीपदं युवतयो वामा कुलस्याधयः ॥ इत्येवं प्रकारेण अभिज्ञानशकुन्तलस्य चतुर्थोऽङ्क व्यावहारिकः, सामाजिकः, धार्मिकः, सांस्कृतिकश्चेति पुष्यति ।

सन्दर्भग्रन्थसूची

आनन्दवर्धनः, ध्वन्यालोकः (तृ.सं.), वाराणसी : ज्ञानमण्डल लिमिटेड, २०४२ ।

कालिदासः, अभिज्ञानशाकुन्तलम्, दिल्ली : भारतीयविद्याप्रकानम्, सन् १९९५ ।

कुन्तकः, वक्रोक्तिजीवितम् (द्वि.सं.), वाराणसी : चौखम्वा सुरभारती सदन, सन् १९९४ ।

क्षेमेन्द्रः, औचित्यविचारचर्चा, वाराणसी : चौखम्वा विद्याभवन, सन् १९६४ ।

जगक ाथः,पण्डितराजः,रसगङ्गाधरः (द्वितीयो भागः), व्याख्याकारः मदनमोहन झा, वाराणसी : चौखम्वा विद्याभवन, २०१४ ।

दण्डी, काव्यादर्शः (द्वि.सं.), वाराणसी : चौखम्वा विद्याभवन, सन् १९६० ।

नगेन्द्रः (डा.), रस-सिद्धान्त (तृ.सं.) दिल्ली : नेशनल पव्लिसिङ्ग हाउस, सन् १९७४ ।

भरतः, नाट्यशास्त्रम्, नई दिल्ली : भारतीय विद्या प्रकाशन, सन् २००३।

भामहः, काव्यालङ्कारः (द्वि.सं.) भाष्यकार देवेन्द्रनाथ शर्मा, पटना : विहार राष्ट्रभाषा परिषद्, २०२४ ।

मम्मटः, काव्यप्रकाशः (अ.सं.), हिन्दी व्याख्याता : विश्वेश्वर, वाराणसी : ज्ञानमण्डल लिमिटेड, २०४१ ।

रुय्यकः, अलङ्कारसर्वस्वम् (द्वि.सं.), वाराणसी : चौखम्वा सुरभारती प्रकाशन, ई. २००१ ।

वामनः, काव्यालङ्कारसूत्राणि, हिन्दी व्याख्याकार : पं. श्री हरगोविन्दशास्त्री, वाराणसी : चौखम्वा सुरभारती प्रकाशन, ई. २००५ ।

विश्वनाथः, साहित्यदर्पणः (ष.सं.), वाराणसी : चौखम्वा संस्कृत संस्थान, वि.सं.२०५८ ।

हेमचन्द्रः, काव्यानुशासनम्, हिन्दी व्याख्याकार : डा. रामानन्द शर्मा, वाराणसी : कृष्णदास अकादमी चौखम्वा प्रेस, वि.सं. २०५६ ।

---

४३. „ „, ४/१३ - अनुमतिगमनाय शकुन्तला तरुभिरियं वनवासवन्धुभिः ।
परभृतविरुतं कलं यतः प्रतिवचनीकृतमेभिरात्मनः ॥

४४. „ „ ४/१६, श्यामाकमुष्टिपरिवर्द्धितको जहाति सोक यं नः पुत्रकृतकः पदवीं मृगस्ते ।

४५. „ „ „ ४/२९१ पृ. १ पंक्ति ।

४६. „ „ „ ४/ १९ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदागमपरिभाषायां तत्र भूतिविजययोश्च किञ्चिद् विवेचनीयम्

केशवशरणोपाध्यायः
सहप्राध्यापकः

१. विषयप्रवेशः

अस्मिन् व्याकरणशास्त्रे "परिभाषा" इति पदेन कस्य वोधः, कः परिभाषापदार्थ इति जिज्ञासायां "अनियमे नियमकारिणीत्वं परिभाषात्वम्" इत्युक्ते सति कैश्चिदुच्यते 'इदं तु न पर्याप्तम्' इति । यद्यप्येतच्छव्दसाधुत्वबोधकविधिसूत्राणां प्रवृत्तिविषये किं स्यात् किन्न स्यादित्यवस्थायां मार्गनिर्देशनमेव परिभाषायाः कार्यमित्यभिप्रायकं तल्लक्षणम्, तथापि ततोऽधिकं परिभाषाणां किं कार्यमिति विचारविषय एव, येन विद्वद्भिः "अप्रामाण्यज्ञानानास्कन्दितसाधुत्वप्रकारकवोधोपयोगि-बोधजनकत्वम्" इति परिभाषालक्षणं विहितम् ।

२. परिभाषालक्षणविचारः

'स्कदिर्' धातोर्गतिः शोषणञ्चार्थः । तत्र "अर्थः प्रकरणं लिङ्गम्" इत्यादिहेतुकशक्तिग्रहस्य स्वीकारादत्रानास्कन्दितशव्दस्य गतिरहितम् स्थिरमित्यर्थः । अथवा आस्कन्दनम् सर्वतः क्षरणम्, तद्रहितमनास्कन्दनम् । तेनानास्कन्दितम् निश्चितमार्गेण प्रवाहितमिति भवति । तथा चाप्रामाण्यं यज्ज्ञानं तेनानास्कन्दितः स्थिरो यो शव्दसाधुत्वप्रकारकवोधस्तदुपयोगिवोधजनकत्वमित्यभिप्रायः । लक्षणञ्च तदेव वरं यदव्याप्त्यतिव्याप्त्यसम्भवदोषत्रयशून्यं भवति, एतच्च संज्ञासूत्रादावप्यतिव्याप्नोति, तत्रापि पूर्वोक्तबोधजनकत्वस्य विद्यमानत्वात् ।

एवञ्च प्रामाण्यज्ञानप्रवाहपूरणप्रयोजनेऽस्मिन् व्याकरणशास्त्रेऽप्रामाण्यज्ञान-प्रवेशाप्रकरणत्वाज्ज्ञानमात्रस्य प्रमाणसापेक्षत्वाच्चाप्रामाण्यज्ञानस्योपस्थितिः कथं सम्भाव्यत इत्यपि विचारणीयम् । तस्मादाधुनिकपठनपाठनसन्दर्भे शास्त्रार्थपरम्पराया अप्रासङ्गिकत्वात् सरलवोधविषयस्य दुरूहत्वप्रतिपादनस्यान्या यत्वाच्चात्र शास्त्रे "अनियमे नियमकारिणीत्वम्" इत्येव परिभाषालक्षणं न्या यम् ।

नियमो निश्चयः, अथवा निपूर्वकाद् 'यम उपरमे' इत्यस्माद् "यमः समुपनिविषु" इति 'अप्' प्रत्ययेन निष्पन्नस्य नियमशव्दस्य प्रतिज्ञानिश्चयोऽर्थः, 'नियमो यन्त्रणायाञ्च प्रतिज्ञानिश्चये व्रते' इति कोषात् । प्रतिज्ञाशव्दस्यासन्दिग्धकथनमित्यर्थः, यथा- 'पर्वतो व नमान्' इति प्रतिज्ञावाक्यम् । अतस्तत्र तत्र शास्त्रे सन्दिग्धोक्तिषु प्रतीयमानेषु सन्देहनिर्वतनेन शास्त्रप्रक्रियानिर्वहणमेव परिभाषाकार्यमिति फलितम् ।

३. परिभाषावतरणम्

यदागमपरिभाषाविषये "दाधा–" इति सूत्रेण दा-धारूपस्य विधीयमाना घुसंज्ञा पुगागमविशिष्टस्य न स्यात्, तत्र सूत्रे दाधेति विशिष्टरूपोपादानादर्थवत्परिभाषयाऽर्थवतोरेव तयोर्ग्रहणान्नत्वनर्थकयोर्दाधोः, "समुदायो यर्थवान् तस्यैकदेशोऽनर्थकः" इति न्यायेन दाब्घटकदाशव्दस्यानर्थकत्वाद् दाप्शव्दस्य च आगमसमभिव्याहारे "आगमविशिष्टस्यैव ग्रहणम्" इति न्यायेनार्थवत्त्ववोधनादवतरणस्य सङ्गतिः ।

अत्रेदं सम्भाव्यते– कार्यकालपक्षे "पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेन" इति भाष्योक्त्या 'प्रनि+दा' इत्यवस्थायां णिज्विधानात्पूर्वमेव घुसंज्ञायां णत्वे सति ततः पुगागमादिना रूपसिद्धिः स्यात् । अथवा "पूर्वं धातुः साधनेन" इति मतेऽपि पुको व वपेक्षत्वरूपवहिरङ्गत्वेनासिद्धत्वाद् दाशव्दस्यैवार्थवत्त्वेनाल्पापेक्षत्वरूपान्तरङ्गत्वेन च घुसंज्ञा भवेदेव । यथोद्देशपक्षेऽपि दारूपस्यैव विहितां घुसंज्ञामादाय णत्वं स्यादेव तत्कथमवतरणसङ्गतिरिति ? भूतिकृता पक्षमिममुद्भाव्य "पूर्वं धातुरुपसर्गेण" इति पक्षे प्राचीनमते– पुगागमे कृते घुसंज्ञानिमित्तस्य दारूपस्य विनाशसम्भवाद् अकृतव्यूहपरिभाषया घुसंज्ञाया अप्राप्तिः, नवीनमते– हेतुद्वयोपादानेऽपि द्वितीयहेतुना संज्ञाशास्त्राणां विधिनिमित्तनिमित्तकत्वेन घुसंज्ञाया अनन्तरङ्गत्वं वक्तुं शक्यमिति समाहितम् । किन्तु कार्यकाले संज्ञासूत्राणां सर्वत्रैव विध्युद्देश्येन प्रवृत्तिर्भवति न तु निमित्तत्वेन । तेनात्र घुसंज्ञायां विधिनिमित्तनिमित्तत्वमपेक्षत इत्यसङ्गतम्, दारूपमुद्दिश्यैव घुसंज्ञाप्रवृत्तौ बाधकाभावात् । प्राचीनमते– अकृतव्यूहपरिभाषया घुसंज्ञाया अप्राप्तिरित्यप्यसङ्गतम्, पुगागमेनापि घुसंज्ञोद्देश्यस्य दारूपस्य तादवस्थ्यात्, तत्र दारूपं सम्मृद्य पुग्विधानाभावाच्च । वस्तुतस्तु– प्रणिदापयतीत्यत्र घुसंज्ञायाः फलं णत्वं न तु पुगागमस्तस्मादपि तच्चिन्त्यम् ।

४. परिभाषार्थः

यस्य आगमा यदागमाः, षष्ठ्या उद्देश्यत्वमर्थः, तस्य गुणास्तद्गुणाः, अतद्गुणास्तद्गुणाः सम्पन्ना इति तद्गुणीभूताः, गुणशव्दस्यावयवत्वमर्थः । गृ यतेऽनेनेति ग्रहणम्, तस्य ग्रहणं तद्ग्रहणम्, तेन तद्बोधकेन, गृ यते बोध्यत इत्यर्थः । यदागमाः' इत्यंशस्तद्गुणीभूता इत्यंशे हेतुः, 'तद्गुणीभूता' इत्यंशश्च 'तद्ग्रहणेन गृ यन्ते' इत्यत्र हेतुरिति बोध्यम् । तेन यतो यदागमास्ततस्तद्गुणीभूताः, यतस्तद्गुणीभूता अतस्तद्ग्रहणेन गृ यन्ते इति बोधः ।

पूर्वोक्तः परिभाषार्थो विजयासम्मतो भूत्यविरुद्धश्च । किन्तु 'यमुद्दिश्य आगमो विहितः' इत्यत्रागमपदेनैव विधानार्थस्य लाभाद् विहितपदस्य व्यर्थत्वं स्वीकृतं भूत्याम् । "विहितपदमधिकमिति गुरुचरणा" इत्युक्त्वा तस्यानावश्यकत्वं सूचितं विजयायामपि । वस्तुतस्तु– विहित इति स्पष्टार्थबोधनायैव सन्निविष्टः प्रतीयते, यमुद्दिश्य विधिसूत्रेण विहितस्तस्यैवावयवत्वेन ग्रहणम्, न तु प्राप्तस्य सम्भावितस्यापि वा । यथा "स्वरति–" इतीड्विकल्पेन 'गूहिता', 'गोढा' इति च रूपद्वयम् । तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इडागमपक्षे 'गुह्+इता' इत्यत्र इडागमसहितस्य 'तास्' इत्यस्याजादित्वमिटः प्रत्ययत्वञ्च यदागमपरिभाषया बोध्यते । अन्यथा प्राप्तस्य सम्भावितस्यापीडागमस्य तदवयवत्वेन बोधने 'गुह्+ता' इति स्थितेऽपि "ऊदुपधाया–" इति ऊत्वमेव स्यात् ।

"यमुद्दिश्य आगमो विहित" इत्युक्तेः "प्रनिदारयतीत्यादौ न दारित्यस्य घुत्वम्" इति कथनस्याभिप्रायस्तु यथा दाधातुमुद्दिश्य पुगागमे सति 'दाप्' इत्यस्यानया परिभाषया ग्रहणं तथैव 'दार्' इत्यस्य दाधातो रेफागमाभावान्नेति बोधः । किन्तु अवयवावयवः समुदायावयवो भवतीति लोकन्यायेन दार्शब्दावयवस्य रेफस्य दाग्रहणेन ग्रहणं देवदत्तस्याङ्गुल्यादीनां तद्धस्तावयवत्वेऽपि देवदत्ताङ्गत्वेनैव यथा बोधस्तत्केन वार्यते ? अत्र दात्वं दकारोत्तरवर्त्याकारवत्वम्, 'आर्' इत्यत्र च यदागमपरिभाषया आत्वमायाति, दकारोत्तरवर्तित्वमाकारस्य स्वतःसिद्धमेव । एवं दार्शब्दे दात्वसिद्धेस्तत्र घुसंज्ञाया दुर्वारत्वाद् "आने मुक्" इति मुगागमविधानसामर्थ्यादेषानित्या इत्युच्यत इति विजयाभूत्योरभिप्रायः ।

अत्रेदं वक्तव्यम्– यथा 'दाप्' इत्यत्र पकारस्यावयवत्वं तथा 'दार्' इत्यत्र रेफस्य न सिद्धयति । आकारान्तस्य दाशब्दस्यान्तावयवत्वेन विधीयमानस्य पुगागमस्यानया परिभाषया दाग्रहणेन ग्रहणं सुतरां सिद्धयति, तथा दृशब्दावयवस्य ऋकारस्य स्थाने विहितस्यादेशरूपस्य 'आर्' इत्यस्य न, तस्य दृशब्दस्थानापन्न- दार्शब्दावयवत्वात् । अस्तु तर्हि रेफस्याकारावयवत्वं स्यादिति चेत् तत्तु "उरण् रपरः" इति सूत्रेणैवावयवत्वेन बोधितत्वाद् "ऋकारस्य गुणवृद्धी अरारावेव" इति भाष्येणापि तथैव समर्थितत्वाददतिदेशं विनैव सिद्धम् । यथा रेफस्याकारावयवत्वं तथैवाकारस्य दाशब्दावयवत्वम्, तेनावयवावयवन्यायेन रेफेऽपि दाशब्दावयवत्वे सिद्धे परिभाषायाः प्रवृत्तिः स्यादेव, तद्वारणाय 'यमुद्दिश्य आगमो विहित' इति व्याख्यानस्यावश्यकत्वमिति चेत्तदपि न, "ऋकारस्थाने विहितोऽण् रपरः सन्नेव प्रवर्तते" इति नियमसम्पादनेन "उरण् रपरः" इत्यस्य परिभाषासूत्रत्वात् । तेषाञ्च यथोद्देशपक्षे कार्यकालपक्षे च विधिसूत्रेण सहैकवाक्यतैवार्थबोधनेन प्रक्रियावस्थायां विधिसूत्राणामेव लक्ष्येषु प्रवृत्तिर्न तु परिभाषाणाम् । एतच्च परिभाषाणां यथोद्देशकार्यकालपक्षयोर्विचारे नागेशेनैव समर्थितम् । तत्र "यथोद्देशे परिभाषादेशे... तैरेकवाक्यता परिभाषाणाम्" इति, "कार्यकाले तु तत्तद्विधिप्रदेशे परिभाषाबुद्धचैकवाक्यतेति" इत्युक्तम् । तेनोभयोः पक्षयोर्विधिसूत्रोपकारकत्वं परिभाषाणां सिद्धयति, न तु स्वातन्त्र्येण लक्ष्यप्रवृत्तित्वम् ।

एवञ्च "अवयवावयव–" इति लौकिकन्यायस्य शास्त्रेऽप्यवश्यमेव प्रवृत्तिरित्यत्र प्रमाणाभावात्तत्प्रवृत्तौ फलाभावाच्चात्र न प्रवर्तत इति वक्तुं शक्यते । अत एव अवयवावयवन्यायाश्रयणादेव झप्रत्ययावयवस्यादित्यस्य विहितोऽपि रुट् प्रत्ययावयवत्वेन गृ यतेऽतो "शीङः सार्वधातुके" इति गुणः सिद्धयतीति यद्विजयायामुक्तं तदपि "सार्वधातुके–" इत्यत्र विषयसप्तम्याश्रयणेन समाहितं भूयाम् । किन्तु यदुच्यते– यदागमपरिभाषया तु न निर्वाहः, रुटोऽतेशब्दमुद्दिश्य विहितत्वाभावादिति तच्चिन्त्यम् । झप्रत्ययावयवस्य विहितोऽप्यदादेशः कार्यकालपक्षेऽकारेण संयुक्तः सन्नेव सार्वधातुकसंज्ञां लभते, स्थान्यर्थाभिधानसमर्थस्यैवादेशत्वात् स्थानिवत्त्वेन 'अत्' इति, 'अ' इति च स्वतस्तिङोऽवयवत्वेन तिङ्रूपवत्वात् । यथोद्देशपक्षेऽपि 'झ' इत्यस्य सार्वधातुकत्वमादेशेऽवतरद् 'अते' इत्यत्रापि स्थास्यतीत्यदोषात् । एवञ्च टचुटचुलोष्टित्वमपिशास्त्रेऽवयवावयवन्यायानाश्रयणे लिङ्गम् । अन्यथा तुटष्टित्त्वेनैव निर्वाहे प्रत्यययोष्टित्करणमनर्थकं स्यात् ।

अत एव 'केचित्तु–' इत्यादिना 'यमुद्दिश्य' इत्यत्रोद्देश्यतापर्याप्तापि गृ यते इत्यादिकथनैः यदागमपरिभाषयैव गुणसिद्धिः स्वीकृता भूतिकृद्भिरिति प्रतीयते । भाष्येऽपि "समानशब्दानां प्रतिषेधो वक्तव्य" इत्युक्त्वान्यथा 'प्रनिदारयति', 'प्रनिधारयति' इत्यादौ 'दा-धा' इति समानशब्दत्वाद् घुसंज्ञा प्राप्नोतीति पूर्वपक्षं समुपस्थाप्य तत्रार्थवतोर्दाधोर्ग्रहणान्नभवति, "न चैतावर्थवन्तौ" इति समाहितम् । तत्र प्रदीपकृतैव पश्चात्तु रपरत्वमित्युक्त्वा रेफस्यागमत्वमुक्तम् । परिभाषासूत्राणां विधिसूत्रेण सहैकवाक्यतायाम् ऋकारस्य स्थाने विहितः सर्वोऽप्यण् रेफविशिष्टस्तत्स्थानापन्नत्वादादेशत्वेनैव ग्रा यो नवेति विचारयन्तु सुधियः ।

५. परिभाषाया अनित्यत्वम्

पच्धातोः शानचि तस्य सार्वधातुकत्वेन शपि च 'पच+आन' इति स्थिते "आने मुक्" इति मुगागमो विधीयते, तेन 'पचमान' इति रूपसिद्धिः । अत्राप्यस्याः प्रवृत्तौ तु मुगागमसहितस्य 'मान' इत्यस्यापि 'आन'बुद्धया "अकः सवर्णे–" इति दीर्घे 'पचान' इत्यनिष्टापत्त्या मुगागमो व्यर्थः स्यात् । एवञ्च मुग्विधेः सार्थक्याय तत्सामर्थ्यादेषा अनित्येति ज्ञाप्यते । अस्या अनित्यत्वज्ञापनफलन्तु 'दिदीये' इति 'जहार' इति च । दीङ्धातोर्लिटि प्रथमपुरुषैकवचने एशादेशे द्वित्वादौ 'दिदी+ए' इति स्थिते "दीङो युडचि–" इति युडागमेऽनया परिभाषया युडागमविशिष्टस्य 'ये' इत्यस्याजादित्वं मत्वा "एरनेकाच–" इति यणादिर्न । एवञ्च हृधातोर्लिटि णलि द्वित्वादौ "अचो ञ्णिति" इति वृद्धौ रपरत्वे रेफविशिष्टस्य 'आर्' इत्यस्य आत्वमाश्रित्य ततः परस्य णलोऽकारस्य "आत औ णलः" इति औत्त्वञ्च न भवति । यद्यपि 'दिदीये' इत्यत्र युड्विधानसामर्थ्यादेव यणादिर्न प्राप्नोतीति वक्तुं शक्यते, तथापि "वुग्युटौ–" इति वार्तिकारम्भसामर्थ्यात्तदप्रवृत्तिरिति सम्भाव्य परिभाषाया अनित्यत्वे 'जहार' इत्यादौ "आत औ णलः" इति च न इत्युक्तम् । 'जहारेत्यादौ–' इत्यत्रादिना भवेयुरित्यस्य सङ्ग्रहः इति भूयाम् । तत्र भूधातोर्विध्यादौ लिङि 'यास्' इत्यस्य "अतो येयः" इति इयादेशे झेर्जुसि 'भव+इय्+उस्' इत्यवस्थायामनया परिभाषया इय्विशिष्टस्य 'इयुस्' इत्यस्य उस्ग्रहणेन ग्रहणाद् "उस्य पदान्तात्" इति पररूपापत्त्या परिभाषाया अनित्यत्वज्ञापनमावश्यकमित्युक्तम् ।

६. वर्णग्रहणे प्रवृत्त्यप्रवृत्तिविचारः

अस्या अनित्यत्वज्ञापनमनपेक्ष्य 'मुग्विधानसामर्थ्याद् वर्णग्रहणे परिभाषैषा न प्रवर्तते' इति ज्ञापनन्तु भाष्यविरोधान्न क्रि... । "आने मुक्" इति सूत्रे भाष्ये सूत्रार्थविचारप्रसङ्गेऽङ्गावयवस्याकारस्य मुगित्यर्थे 'पचमान' इत्यत्र "तास्यनुदात्तेत्–" इत्यादिना स्वरो नस्यादित्याशङ्क्य 'अदुपदेशभक्तस्तद्ग्रहणेन ग्रहीष्यते' इत्युक्तम् । अस्यायमाशयः– 'शप्' इत्यत्रानुबन्धविनिर्मुक्तो योऽकारोपदिष्टस्तस्यावयवत्वेन बोधितस्य मुको मकारस्यापि यदागमपरिभाषया बोधनादागमविशिष्टस्य 'अम्' इत्यस्य अकारग्रहणेन ग्रहणादभीष्टसिद्धिरिति, तेन वर्णग्रहणेऽस्याः प्रवृत्तिः सिद्धा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र 'वर्णग्रहणे' इत्यनेन वर्णमात्रवृत्तिधर्मातिदेशे वर्णमात्रवृत्तिधर्मघटितधर्मातिदेशे चैषा परिभाषा प्रवर्तत इति बोध्यम् । तत्र 'पचमान' इत्यत्राभीष्टस्वरसिद्धयेऽनया वर्णमात्रवृत्तिधर्मघटितधर्मस्यातिदेशः । तदित्थम्–वर्णमात्रवृत्तिधर्मश्चात्र अत्वम् तद्घटितधर्मश्चादन्तोपदिश्यमानत्वम् उपदेशेऽदन्तत्वमित्यर्थः, अकारेऽदन्तत्वं तु व्यपदेशिवद्भावेन सिद्धयति । एवञ्च वर्णमात्रवृत्तिधर्मातिदेशस्योदाहरणम् 'कुर्वन्नास्ते' इति । 'कुर्वन्+आस्ते' इति स्थिते ङमन्तपदावयवस्य ह्रस्वात्परस्य ङमो ङमुडित्यर्थकेन "ङमो ह्रस्वाद्–" इति सूत्रेण पदान्तनकारात्पूर्वं नुडागमे 'कुर्वन्+न्' इत्यत्र "अट्कुप्वाङ्–" इति प्राप्तं णत्वं परनकारस्य "पदान्तस्य" इत्यनेन निषेधेऽपि पूर्वनकारस्य प्रवृत्तिमर्हति, तद्वारणाय पूर्वनकारेऽनया परिभाषया वर्णमात्रवृत्तिधर्मस्य पदान्तनत्वस्यातिदेशात्तत्रापि णत्ववारणं सम्भवतीत्याशयकं ङमुट्सूत्रस्थभाष्यम् । तेन यदागमपरिभाषयाऽऽगमानामागमिधर्मवैशिष्ट्यमपिबोध्यत इति नागेशाशयः । भूतिकृता च 'रामाणां' सर्वेषाम्' इत्यादौ नुट्सुडागमयोः कृतयोराम्वृत्तिपदान्तत्वस्य 'नाम्', 'साम्' इत्यादावतिदेशात्तत्र तत्र णत्वषत्वयोरनापत्तेरागमानामागमिधर्मबोधने मानाभावात्, फलाभावाच्च तच्चिन्त्यमित्युक्तम् । विजयाकारेणाऽपि पदान्तत्वस्य वर्णसमुदायेऽपि सत्वेन तस्य वर्णमात्रवृत्तिधर्मत्वाभावान्नागेशोक्तं न युक्तमित्युक्तम् । वस्तुतस्तु ङमो ङमुडिति व्याख्यानं नागेशसम्मतं भाष्यादौ पाक्षिकं वेति नावलोकितं मया, किन्तु तस्मात्परस्याचो ङमुडिति भट्टोजिदीक्षितसम्मतव्याख्याने तु 'कुर्वन्नास्ते' इत्यादौ न कोऽपि विवादः ।

७. परिभाषायाः ज्ञापकसिद्धत्वम्

यद्यपि लौकिकन्यायेनैवेयं सिद्धा, तथापि "नेटि", "णेरनिटि" इति सूत्राभ्यां व्याकरणशास्त्रेऽप्यस्याश्रयणं ज्ञाप्यते । यतो हि परिभाषास्वीकारादेव 'अगोपीत्' इत्यत्रेडागमसहितस्य सिचः परत्वेऽपि प्राप्ताया हलन्तलक्षणाया वृद्धेर्निषेधेन "नेटि" इत्यस्य, 'कारयिता' इत्यत्रेडागमसहितस्य तृच आर्धधातुकत्वेन णिलोपव्यावृत्त्यर्थम् अनिटि इत्यस्य च सार्थकत्वम् । अन्यथा प्राप्तौ सत्यामेव निषेधस्यौचित्यात्तयोर्वैयर्थ्यं स्यात् । न च 'अनागमकानां सागमका आदेशा' इति भाष्येण कल्पितस्थान्यादेशभावस्वीकाराद् इड्रहितसिचः स्थाने इट्सहितसिजादेशे, तत्र स्थानिवद्भावादेव सेटः सिच आर्द्धधातुकत्वात् प्राप्ताया वृद्धेः प्रतिषेधार्थं "नेटि" सूत्रस्य चारितार्थ्येन कथं परिभाषाया ज्ञापकत्वमिति चेन्न, नित्येषु शब्देष्वागमविधानस्यानुचितत्वादर्थापत्तिमूलकवाक्यान्तरकल्पनेन समाधानार्थं तथोक्तत्वात् । यथा आदेशेषु बुद्धिविपरिणामस्तथैवागमेष्वपि, तेन न शब्दनित्यत्वहानिरिति तस्याशयः ।

अस्तु तर्हि कल्पितस्थान्यादेशभावादावपि स्थानिवत्सूत्रेणैवातिदेशे यदागमपरिभाषाया नास्ति प्रयोजनमिति चेत्तदपि न, साक्षादष्टाध्यायीबोधितस्थान्यादेशभावेचरितार्थत्वात्तत्रसूत्रे ऽर्थापत्तिमूलकवाक्यादिपरिकल्पितस्थान्यादेशभावस्याग्रहणात् । तत्कथं ज्ञायत इति चेदुच्यते– 'तिसृणाम्' इत्यत्र परत्वात् "त्रिचतुरोः–" इति तिस्रादेशेऽपि तस्य स्थानिवद्भावेन "त्रेस्त्रयः" इति त्रयादेशमाशङ्क्य "सकृद्गतौ विप्रतिषेधे–". इति परिभाषया भाष्ये समाधानेन स्थानिवद्भावविषये निर्दिश्यमानपरिभाषाया अप्रवृत्तिबोधनात्, पाधातोर्लुङि अडागमे 'अपा' इत्यस्यानुमानिकस्थान्यादेशभावे पावुद्धचैव (स्थानिवुद्धचैव) पिबादेशापत्तौ 'लावस्थामट्' इति भाष्यसिद्धान्तासङ्गतिः स्यात् । न च कल्पितस्थान्यादेशभावस्य स्थानिवत्सूत्रेऽग्रहणेन "एरुः" इति विहितस्य उकारस्य एरिति स्थानषष्ठ्या स्थान्यादेशभावबोधनेऽपि इकारस्य तिङ्त्वाभावाद् 'भवतु' इत्यत्र पदत्वं न सिद्धयतीति वाच्यम्, कल्पितस्थान्यादेशभाव इत्यनेन अर्थापत्तिमूलकवाक्यान्तरकल्पितस्यैव तत्राग्रहणात् । अष्टाध्यायीबोधितस्थान्यादेशे तु कल्पितस्यानुमानिकस्यापि ग्रहणं भवति, तत्र आदेशग्रहणसामर्थ्यात् । अन्यथा "स्थानिवदनल्विधौ" इत्येतावन्मात्रेणापि स्थानिशब्देनैवादेशस्याक्षेपान्निर्वाहे आदेशग्रहणमनर्थकं स्यात् । तेनानुमानिका अपि शास्त्रबोधिता गृ यन्ते इति तदाशयः । विजयायाम्– श्रौतानुमानिकयोः प्रथमोपस्थितश्रौतस्थान्यादेशभावमादाय 'रामाय' इत्यादौ चरितार्थस्य स्थानिवत्सूत्रस्य लक्षणादिलब्धानुमानिकस्थान्यादेशभावेऽपि प्रवृत्तिरित्यत्र किं मानमिति चेद् आदेशग्रहणसामर्थ्यात् । यथा 'पितृवदधीते' इत्यत्र पितृवदित्यनेनैव पुत्रस्याक्षेपस्तथैव स्थानिवदित्यनेनैवादेशार्थलाभसम्भवे पुनरादेशग्रहणमादेशमात्रग्रहणार्थम्, तेनाष्टाध्यायीबोधितस्यानुमानिकस्यापि ग्रहणम्, अर्थापत्तिमूलकवाक्यान्तरकल्पितस्य तु अतिविलम्बोपस्थितिकत्वादप्रधानत्वाच्च न ग्रहणमित्युक्तम् ।

८. श्रौतानुमानिकयोः स्थान्यादेशभावयोर्विचारः

अत्रानुमानिकस्थान्यादेशभावकल्पनेऽपि श्रौतस्य न त्यागः, तस्माद् "अचः परस्मिन्–" इत्यादेः सङ्गतिरिति नागेशाशयः । अत्र भूतिकृता– आनुमानिकादेशकल्पने पटयतीत्यत्र टिलोपस्य अजादेशाभावेन स्थानिवत्त्वं न स्यादित्याशङ्क्य, "अचः परस्मिन्–" इति सूत्रारम्भसामर्थ्यादजादेशविधायकसूत्राणां श्रौतानुमानिकार्थयोः पाणिनितात्पर्यं बोध्यमिति समाहितम् । अन्यथा पटुमाचष्टे इत्यर्थे पटुशब्दात् "प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च" इति णिचि तस्येष्ठवद्भावे च कृते "टेः" इति टिलोपः, परत्वाद् वृद्धौ सत्यां टिलोप इति पक्षे "अचो ञ्णिति" इति उकारस्य वृद्धौ 'पटौ+इ' इति स्थिते औकारस्य लोपः, ततः 'पट्+इ' इति जाते उपधावृद्धौ प्राप्तायां टिलोपस्यात्राजादेशत्वाद् "अचः परस्मिन्–" इति स्थानिवद्भावेनादुपधत्वाभावाद् वृद्धिर्न भवति । आनुमानिकादेशपक्षे तु 'पटु' इत्यस्य 'पट्' इति अज्झलादेशो भवति, तस्मादजादेशत्वाभावेन स्थानिवत्त्वाभावाद् वृद्धौ कृतायां 'पाटयति' इति स्यात्, 'पटयति' इत्यभीष्टं रूपं न स्यात् । तेनात्रानुमानिकः स्थान्यादेशभावो न गृ यत इति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९. निष्कर्षः

अत्रेदं वक्तव्यम्– "अनागमकानां सागमका–" इत्यादिभाष्यं शब्दानित्यत्वपरिहारार्थम्, शास्त्रप्रक्रियानिर्वाहार्थं तु श्रौतस्थान्यादेशभावस्यैव व्यवहारो भवति । नागेशादिभिर्वैयाकरणैरपि शास्त्रप्रक्रियानिर्वाहकस्य वर्णस्फोटस्यानित्यत्वं स्वीकृतमेव । भाष्यदृष्ट्या वर्णेनाप्यनर्थकेन न भाव्यमिति चेज्जातिपक्षे "न क्वचिदुपरतेति कृत्वा सर्वत्रोपरता भवति, द्रव्यान्तरस्था तूपलभ्यते" इति भाष्यात् स्थान्यादेशरूपेषु वर्णेष्वपि नित्यत्वं सिद्धम् । अथवा इकारोच्चारणप्रसङ्गे उकारोच्चारणं स्यादित्यर्थेनापि वर्णनित्यत्वनिर्वाहः । यत्तु "सर्वे सर्वपदादेशा–" इत्यस्य व्याख्यानप्रसङ्गे "इङ्भवतीत्येतद्द्वारेण तव्यस्येतव्यादेशः क्रियते" इति प्रदीपकृतोक्तं तत्तु चिन्त्यम्, सूत्रोपात्तस्य तव्यस्येतव्यविधाने इकारस्योपजनत्वबोधनात् । तस्माद् 'भवतु' इत्यादीनां "पदत्वायानुमानिकः स्थान्यादेशः स्वीकर्तव्यः" इति कथनं नोचितम् । किमर्थं पदत्वम् ? तातङि कर्तव्ये तु पदसंज्ञा नापेक्षिता भवति । "अपदं न प्रयुञ्जीत" इति वचनात्तस्य पदत्वं विना प्रयोगानर्हत्वात्तत्र पदसंज्ञाया आवश्यकत्वमिति चेत् संज्ञाविषये यथोद्देशपक्षमङ्गीकृत्य भूतपूर्वसंज्ञायास्तत्रावतरणं "सोऽयं देवदत्तः" इति न्यायेन सम्भवति । कार्यकालपक्षे तु "यदा कार्यं तदा संज्ञा" इति कथनेन विधिशास्त्रमुद्दिश्यैव संज्ञाशास्त्रप्रवृत्तिबोधनान्नभवति पदसंज्ञा । यदि च पदसंज्ञा एव कार्यं तर्हि "एरुः" इत्यत्र तदन्तविधिना लोट इकारान्तस्य उत्वं स्यादित्यर्थलाभे "अलोऽन्त्यस्य" इति इकारस्योत्वम्, स च उकारः स्थान्यर्थाभिधानसमर्थस्यैवादेशत्वादिकारे सति योऽर्थः स्यात् तिङ्त्वावच्छिन्नः, तं कथं न वदेत् ? अथवा "तत्स्थानापन्नस्तद्धर्मं लभते" इति वचनादेव तिप्प्रत्ययावयवस्येकारस्य स्थाने विहित उकार स्थानिवद्भावेन तिबवयवत्वं लभेदेव । यथा भिन्ने ताम्रघटे योजितमपि त्रपु घटावयवत्वं लभते तथैवात्रापि बोध्यम् । एवमन्यत्रापि श्रौतस्थान्यादेशेनैव निर्वाहे आनुमानिकस्थान्यादेशभावकल्पनं गौरवावहं मन्ये । विजयायान्तु "यदागमपरिभाषा च न मन्यते, स्थानिवत्सूत्रे च सर्वेषामादेशानां ग्रहणं क्रियते, अपि तु यस्य निर्दिश्यमानत्वं तस्यादेशो भविष्यति, निर्दिश्यमानत्वञ्च षष्ठीप्रकृतिविशिष्टत्वम्" इत्याद्युक्त्वा अस्य निष्फलत्वं प्रतिपादितम । किन्तु प्रक्रियायामागमादेशयोर्भेददर्शनात् स्थानिवत्सूत्रे आदेशशब्दोपादानाच्च यत्रादेशेषु स्थानिधर्मातिदेशस्तत्रैव तत्प्रवृत्तिः । यदागमपरिभाषा चागमसहिते आगमिधर्मातिदेशे कर्तव्ये सति प्रवर्तत इति सरलबुद्धिग्राह्यविषयः । तेन स्थानिवत्सूत्रेण यदागमपरिभाषा गतार्थेत्यपास्तमिति नागेशोक्तिः सङ्गच्छते । तथा च यदागमपरिभाषयोपस्थितस्य निमित्ततया बोधः प्रक्रियायाम्, निर्दिश्यमानपरिभाषयोपस्थितस्य च कार्यित्वेन बोधः । तेनोभयोरुत्सर्गापवादत्वमपि न सम्भवति । भिन्नविषयप्रतिपादनाय समुपस्थितयोः परिभाषयोर्द्वयोरेव साफल्यं यथा स्यात्तथा विचारयन्तु विद्वांसः ।

सन्दर्भसूची

१. मिश्रः, श्रीकृष्णः (सम्पा. १९४२ इ.), **परिभाषेन्दुशेखरः** (विजयाटीकापरिष्कृतः), दरभङ्गा : चन्द्रधारी- मिथिला-कलेज ।

२. वासुदेवो बालकृष्णः (सम्पा. २०३९), **परिभाषेन्दुशेखरः** (भूतितिलकभूषितः), वाराणसी : राजराजेश्वरी प्रेस-पुस्तकालयः ।

३. शर्मा, गिरिधरः, शर्मा, परमेश्वरानन्दः (सम्पा. १९८६ इ.), **वैयाकरणसिद्धान्तकौमुदी** (प्रथमभागः, बालमनोरमातत्त्वबोधिनीटीकासहिता), दिल्ली : मोतीलाल-बनारसीदासः ।

४. दीक्षितः, भट्टोजिः (सम्पा. २००५ इ.), **वैयाकरणसिद्धान्तकौमुदी** (तृतीयभागः, बालमनोरमा- तत्त्वबोधिनीटीकासहिता), दिल्ली : मोतीलाल-बनारसीदासः ।

५. शास्त्री, भार्गव (सम्पा. २००४ इ.), **व्याकरणमहाभाष्यम्** (भाष्यप्रदीपयुक्तं प्रथमखण्डम्), दिल्ली : चौखम्बा-विद्या-भवनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आशौचस्वरूपं कालश्च

माधवप्रसादलामिछाने:
उपप्राध्यापक:

१. विषयप्रवेश:

श्रुतिस्मृतिपुराणादिप्राच्यधर्मग्रन्थेषु मानवजीवनसम्वद्धा: आचार-व्यवहार-प्रायश्चित्तसम्वद्धा: व्यवस्था: सम्यङ् निरूपिता: सन्ति । व्यवस्थास्वेतासु आशौचसम्वद्धा व्यवस्थान्यतमा । पुनश्चाशौचं योगीश्वरेण याज्ञवल्क्येन प्रायश्चित्ताध्यायस्य प्रारम्भ एव व्यवस्थापितं दृश्यते । गौतम-आपस्तम्वप्रभृतिषु सूत्रग्रन्थेषु, मनुस्मृति-याज्ञवल्क्यस्मृति-पराशरस्मृत्यादिस्मृतिग्रन्थेषु तथा पद्म-गरुडपुराणादिपौराणिकग्रन्थेषु च आशौचव्यवस्थासम्वद्धा: विषया: सविशदं निरूपिता: सन्ति । उपर्युल्लिखितान् विविधानाधारग्रन्थानाश्रित्य विरचितेषु पश्चात्तनीन-निर्णयसिन्धु-धर्मसिन्धु-षडशीत्यादिष्वनेकेषु ग्रन्थेषु आशौचविषयका: अनेके ऊहापोहा: दृग्गोचरीभवन्ति ।

२. किं नामाशौचम् ?

शौचं नाम निर्मलम्, शुद्धं पवित्रं वा । न शौचमित्यशौचम् । अशौचमेवाऽऽशौचम् । श्रुतिस्मृत्यादिशास्त्रज्ञापित: कर्मफलप्रतिवन्धकीभूत: जन्ममरणजन्य: कर्तृनिष्ठोऽघविशेष आशौचमिति वदन्ति शास्त्रवेत्तार: । तादृशस्याघविशेषस्य प्रभावेण सम्वद्धजनानामात्मनि शरीरे च दोषोत्पत्तिर्जायते । तद्दोषपरिहारार्थं जन्ममरणनिमित्तभूता: शास्त्रोक्ता: कालस्नानादिनियमा: परिपालनीया इति ज्ञातव्यो विषय: । आशौचकाले सर्वे सम्वन्धिन अशुद्धा भवन्तीति हेतोस्तदा निश्चितकालावधिपर्यन्तं दानहोमार्चनाद्या: सर्वा: क्रिया: निषिद्धा: । आशौचिनां दानादिनिषेधदर्शनादाशौचकाले व्यक्ते: कर्मानधिकारमात्रं विनिश्चितमिति मा शङ्कनीयम्, आशौचे पिण्डोदकादिक्रियाणां युगपद्विधानात् । अत एवाशौचस्वरूपं विज्ञापयति विज्ञानेश्वर:- "आशौचशव्देन कालस्नानाद्यपनोद्य: पिण्डोदकदानादिविधे: अध्ययनादिपर्युदासस्य च निमित्तभूत: पुरुषगत: कश्चनातिशय: कथ्यते, न कर्मानधिकारमात्रम्"[१] इति ।

३. अस्पृश्यत्वम्

आशौचदशायां सम्वन्धिनो वान्धवा अशुद्धा भवन्ति । अत एव तेऽस्पृश्याश्च भवन्ति । आशौचभेदात् स्पर्शास्पर्शविषयेऽप्यस्ति पार्थक्यम् । जन्माशौचमरणाशौचभेदादाशौचमपि द्विधा भिद्यते । मरणाशौचे सम्वन्धिन: सर्वे सपिण्डा अस्पृश्या भवन्ति चेत् जन्माशौचे पितरावेवास्पृश्यौ भवत: । जननाशौचे पिताऽपि स्नानात्प्रागेवास्पृश्यो भवति, विहिते स्नाने तु सोऽपि नैवास्पृश्य:, इति शास्त्रकारैरुक्तम् ।[२] अतो जननाशौचे विशेषत: मातर्येव पूर्णकालिकमाशौचं विद्यते । तन्निमित्तकं पूर्णकालावधिकमस्पृश्यत्वमपि मातर्येव प्रवर्तते न तु पितरि, न वाऽन्येषु सपिण्डवान्धवादिषु ।[३] एतादृश्यां पूर्णकालिकाशौचदशायां मातर्येव विद्यमानमस्पृश्यत्वनिमित्तमाशौचमपि, अपत्यानां नालच्छेदात्पूर्वं नैवोत्पद्यते । अर्थात् जातकर्मसंस्कारविधानार्थं नालच्छेदात्पूर्वं प्रसूतिनिमित्तमाशौचं नोत्पद्यते, नालच्छेदादुत्तरमेवोत्पद्यते, इति वदन्ति शास्त्रवेत्तार: । आशौचकाले आशौचिभिरन्यैरनाशौचिभिस्सह, अनाशौचिभि: पुनराशौचिभिश्च सह सम्पर्क: यत्नतो वर्जनीय:, सम्पर्कस्य दोषजनकत्वात् ।[४]

अग्निहोत्रिणो गृहस्था मृतकस्य दाहसंस्कारं विधाय तदनन्तरमाशौचभागिनो भवन्ति चेद् अनग्निहोत्रिणस्तु (साधारणगृहस्थास्तु) मरणकालात् सद्यमेवाशौचभागिनो भवन्तीति शास्त्रमर्यादाऽस्ति ।[५]

४. आशौचसम्वद्धा ऊहापोहा:

विविधै: प्राच्यधर्मशास्त्रीयग्रन्थकारै: सूतकाशौचस्य मृतकाशौचस्य च कालावधे: सूक्ष्मविवेचनं विधाय मतमतान्तराणि प्रस्तुतानि सन्ति । मनुस्मृति:[६], पराशरस्मृति:[७], याज्ञवल्क्यस्मृति:[८] इत्यादिभि: विविधै: धर्मशास्त्रै: व्राह्मणादीनां वर्णजात्यनुरूपं यथाक्रमं व्राह्मणानां दशदिनानि, क्षत्रियाणां द्वादशदिनानि, वैश्यानां पञ्चदशदिनानि, शूद्राणां

---

[१] मिताक्षरा, पृ. २९४

[२] सर्वेषां शावमाशौचं मातापित्रोस्तु सूतकम् । सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचि: ॥ मनुस्मृति: ५।६२

[३] सर्वेषां शावमाशौचं मातापित्रोस्तु सूतकम् । सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचि: ॥ मनुस्मृति: ५।६२

[४] सम्पर्काज्जायते दोषो नान्यो दोषोक स्ति वै द्विजे । तस्मात्सर्वप्रयत्नेन सम्पर्कं वर्जयेद् वुध: ॥ पराशरस्मृति: ३।२७

[५] आशौचविवेचन, पृ.२०

[६] *शुद्ध्येद् विप्रो दशाहेन द्वादशाहेन भूमिप: । वैश्य: पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति ॥ मनुस्मृति: ५।८३*

[७] *जातौ विप्रो दशाहेन द्वादशाहेन भूमिप: । वैश्य: पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति ॥ पराशरस्मृति ३।४*

[८] *क्षत्रस्य द्वादशाहानि विश: पञ्चदशैव तु । त्रिंशद्दिनानि शूद्रस्य तदर्धं न्यायवर्तिन: ॥ याज्ञवल्क्यस्मृति: ३।२२*

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तु त्रिंशद्दिनानि पूर्णाशौचम् (सपिण्डाशौचम्) प्रोक्तम् । न्यायवर्ती शूद्रस्तु पञ्चदशदिनैरेव शुद्ध्यतीति [९]याज्ञवल्क्यवचनेन सच्छूद्रस्य पञ्चदशदिनात्मकमाशौचमुक्तम् ।

एवमुपर्युक्तानां शास्त्रकाराणां वचनेषु समीक्ष्यमाणेषु सत्सु आशौचव्यवस्थायां जात्यनुरूपं पार्थक्यं प्राप्यत एव । यद्यपि जात्यनुरूपमाशौचं विविधैः शास्त्रकारैर्निर्दिष्टम्, तथापि तस्य युगान्तरीयविषयत्वात् सूतकात्मकं मृतकात्मकं च पूर्णाशौचं सर्वेषां वर्णानां कृते दिनदशात्मकमेव भवतीति सत्यापयति महामुनिरङ्गिरा । अतः सम्प्रति सर्वैः दशदिनात्मिक्येवाशौचव्यवस्थावलम्वनीया ।

पराशरेण नरपर्यायभेदेनापि (पुरुषसंख्याभेदतश्च) आशौचव्यवस्थायां वैविध्यं दर्शितम् । मूलपुरुषाच्चतुर्थपुरुषपर्यन्तं पूर्णं दशदिनात्मकमाशौचम्, मूलपुरुषात्पञ्चमपुरुषपर्यन्तं परस्परं षड्दिनात्मकम्, षष्ठस्य परस्परं चतुर्दिनात्मकम्, सप्तमे पुनः दिनत्रयात्मकमाशौचं निर्दिष्टं तेन ।[१०] परन्तु सापिण्ड्यसम्वन्धस्य सप्तमपुरुषपर्यन्तं विद्यमानत्वात्[११] पुनः सर्वेषां सपिण्डानामाशौचमप्यविशेषेण दिनदशात्मकमेव भवतीति मनूक्तेः[१२] सपिण्डाशौचस्य संख्याभेदादाशौचदिनभेदो नोचितः । अर्थात् मूलपुरुषात्सप्तमपुरुषं यावत् यदाशौचमापतति तत्पूर्णैः दशभिरेव दिनैः समाप्यत इति ज्ञातव्यम् । पारस्करेण मुख्यकल्पे दिनत्रयात्मकं शावाशौचं प्रोक्तम् ।[१३] योगीश्वरेणैकस्मिन् स्थाने दिनत्रयात्मकस्य दिनदशात्मकस्य वेति पूर्णाशौचस्य वैकल्पिकी व्यवस्था दर्शिता ।[१४] पराशरेणापि मरणाशौचे व्राह्मणानां कृते दिनत्रयात्मिक्याशौचव्यवस्थैव प्रोक्ता ।[१५] एवं प्रोक्तानां विविधानां ऋषिवचनानां स्थूलरूपेणावलोकने भवत्येव काठिन्यं पूर्णाशौचस्य दिनसङ्ख्यानिर्णये । परन्तु सूक्ष्मेक्षिकयाऽवलोकने तु ज्ञायत एव यत् पूर्वोक्तं मतवैविध्यमस्ति, तत्सर्वं कर्तृनिष्ठगुणानुरूपमेव । एतद्विषये पराशरेण स्पष्टतयोक्तम् - वेदयुक्तोऽग्निहोत्रिव्राह्मणः एकाहेन, अनग्निरपि नित्यवेदपाठी व्राह्मणः त्रिभिर्दिनैः, अग्निवेदाभ्यां रहितो विप्रः पूर्णैः दशभिरेव दिनैः शुद्ध्यति इति ।[१६] यथोपरि जातिभेदादाशौचभेदो निराकृतस्तथात्रापि गुणसहितगुणरहितादिकर्तृभेदादाशौचभेदः निराकरणीयः, युगान्तरीयविषयत्वात् ।[१७] अतो व्यक्तिनिष्ठगुणाधारेणाप्याशौचस्य युगान्तरीयविषयत्वात् कलौ सर्वेषां कृते पूर्णं सपिण्डाशौचमिति सिद्धान्तितम् ।

५. आशौचभेदाः

जननमरणनिमित्तभेदादाशौचमपि द्विविधं वर्तते- जननाशौचं मरणाशौचं च ।[१८] शव्दान्तरे जननाशौचं सूतकमिति नाम्नाभिधीयते चेत् मरणाशौचं मृतकशव्देनोच्यते । अस्माकं नेपालीसमाजे जननाशौचस्य सुत्केरो, मरणाशौचस्य जूठो इत्यप्युच्यते । आशौचद्वयमपि दीर्घाशौचाल्पाशौचभेदेन पुनः द्विविधम् । दशद्वादशदिनात्मकं दीर्घाशौचं भवति चेत् ततोऽल्पदिनसाध्यमाशौचं स्वल्पाशौचमिति कथ्यते ।

५.१ जन्माशौचम्

गर्भस्य संस्रवणम्, गर्भस्य पतनम्, मातृगर्भाद् वालोत्पत्तिश्चेति जननाशौचोत्पत्तेः कारणानि सन्ति । चतुर्थमासपर्यन्तं मातृसकाशाद् गर्भस्य स्रवणं नाम गर्भस्रावलक्षणम्, पञ्चमासिकस्य षण्मासिकस्य वा गर्भस्य पतनं गर्भपातलक्षणम्, सप्तममासादूर्ध्वं मातृसकाशाद् वालोपत्तिः प्रसूतिशव्देनोच्यते ।[१९]

---

[९] पूर्ववत् याज्ञवल्क्यस्मृतिः ३।२२

[१०] चतुर्थे दशरात्रं स्यात् षण्निशाः पुंसि पञ्चमे ।
षष्ठे चतुरहाच्छुद्धिः सप्तमे तु दिनत्रयात् ॥ पराशरस्मृति ३।९

[११] सपिण्डता तु पुरुषे सप्तमे विनिवर्तते ॥ मनुस्मृतिः ५।६०

[१२] दशाहं शावमाशौचं सपिण्डेषु विधीयते मनुस्मृतिः ५।५९

[१३] त्रिरात्रं शावमाशौचम् । पारस्करगृह्यसूत्रम् ३।१०।२९

[१४] त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते ।
ऊनद्विवर्षमुभयोः सूतकं मातुरेव हि ॥ याज्ञवल्क्यस्मृतिः३।१८

[१५] दिनत्रयेण शुद्ध्यन्ति व्राह्मणाः प्रेतसूतके । पराशरस्मृतिः ३।१

[१६] एकाहाच्छुच्छुद्ध्यते विप्रो योक ग्निवेदसमन्वितः ।
त्र्यहात् केवलवेदस्तु द्विहीनो दशभिर्दिनैः ॥ पराशरस्मृति ३।५

[१७] वृत्तस्वाध्यायसापेक्षमघसङ्कोचनं तथा । कलौ युगे त्विमान् धर्मान् वर्ज्यानाहुर्मनीषिणः ॥
शुद्धिचन्द्रिका, पृ.७

[१८] आशौचं विविधं प्रोक्तं सूतकं मृतकं तथा । षडशीति, श्लोक २

[१९] आचतुर्थात् भवेत्स्रवः पातः पञ्चमषष्ठयोः ।
प्रसूतिः सप्तमान्मासादूर्ध्वं गर्भस्य निर्गमः ॥ नि.सि.सा.सं. पृ.३७२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गर्भस्रावे यावान्मासिकस्य गर्भस्य संस्रवणं भवति तावद्दिनपर्यन्तमाशौचं भवतीति याज्ञवल्क्यस्य मतम् ।[२०] पाञ्चमासिकस्य गर्भस्य पतननिमित्तात् पञ्चदिनात्मकम्, षाण्मासिकस्य वा गर्भस्य पतननिमित्तात् षड्दिनात्मकमाशौचं मातर्युत्पद्यते चेत् पित्रादिसपिण्डेषु तु पाते दिनत्रयात्मकमेवाशौचं भवतीति शास्त्रवचनानि प्राप्यन्ते ।[२१]

प्रसूतिनिमित्तकं यत् पूर्णाशौचं वर्तते, तत् मात्रतिरित्तपित्रादिसपिण्डानां कृते स्वजात्यनुरूपं पृथक्पृथक्दिनसाध्यं भवति चेत् प्रसूतीनां कृते तु जातिनिरपेक्षरूपेण सर्वासां कृते दशदिनमेव साध्यं भवति ॥[२२] पराशरस्मृतौ जननाशौचे ब्राह्मणाः दशभिर्दिनैः, क्षत्रियाः द्वादशभिर्दिनैः, वैश्याः, पञ्चदशभिर्दिनैः, शूद्रास्तु मासमेकेन शुद्ध्यन्तीत्युक्तम् ।[२३] परन्तु देवलेन[२४] अङ्गिरसा[२५] चाभेदेनैव सर्वेषां कृते स्पष्टरूपेण दिनदशात्मकमेव पूर्णाशौचमुक्तम् । अतः कलिकाले निर्वाधरूपेण दशदिनात्मकमेव पूर्णाशौचमवलम्वनीयम् इति सिद्धान्तः पक्षः ।

५.२ मृताशौचम्

मरणाशौचं मृताशौचम्, शावाशौचम्, मृतकम्, प्रेताशौचञ्चेत्यादिभिर्नामभिश्चाभिधीयते । जननाशौचतो मरणाशौचसम्वद्धा नियमा गभीरतरा कठिनतरा वानुभूयन्ते । अनेकेषु धर्मशास्त्रीयग्रन्थेषु मरणाशौचसम्वद्धा विषयाः सम्यगुपस्थापिताः सन्ति । मरणाशौचस्य सम्यङ्निर्णयार्थं विविधा धर्मशास्त्रीयसूत्रग्रन्थाः, स्मृतिग्रन्थाः, निवन्धग्रन्थाश्चावलोकनीयाः । विविधैः शास्त्रकारैर्मरणाशौचस्य विषये तत्तत् स्थाने यदुक्तम्, तत् संक्षेपेणाधः प्रस्तुतम् :

५.२.१ दशाहाशौचम्

एतद्दशदिनसाध्यमाशौचम् । दशाहाशौचस्य जनकः मुख्यतः सापिण्ड्यसम्वन्ध एव ।[२६] मूलपुरुषतः सप्तमपुरुषपर्यन्तं सपिण्डता प्रवर्तते ।[२७] अतः पित्रोः, पितुरग्रजस्यानुजस्य तेषां पत्नीनां वा, स्वाग्रजाणाम्, स्वानुजानाम्, तेषां पत्नीनाम् वा, पौत्राणाम्, प्रपौत्राणाम्, तेषां पत्नीनाम्, एवंविधानामन्येषां सापिण्ड्यसम्वद्धानां जनानामपि निधने दशदिनसाध्यमाशौचमनुष्ठेयम् । एतादृशी सामान्या व्यवस्था वर्तते । विशेषतः स्वपित्रोः, पत्युः, सोदरभ्रातृणाम्, तथैवान्येषां त्रिपुरुषपार्यन्तिकानां सपिण्डभ्रातृणां, पितृव्यादीनां तेषां सर्वेषां पत्नीनां च निधने द्वादशदिनसाध्यमाशौचमनुष्ठेयमिति शास्त्रकाराणां मतम् ।[२८] एतादृशो नियमः उपनीतानां जनानां कृतेऽस्ति ।[२९] विवहितानां सम्वद्धानां स्त्रीणां कृतेऽप्येतादृश एव नियमः ।[३०]

५.२.२ त्र्यहाशौचम्

दिनत्रयसाध्यमाशौचमेवंविधं वर्तते - सप्तमपुरुषाच्चतुर्दशपुरुषपार्यन्तिकानां सोदकवन्धूनाम्[३१], अनुपनीतपुत्राणां[३२] च मरणे दिनत्रयात्मकमाशौचमनुष्ठेयम् । एवं मातुलस्य, मातुलान्याः, उपनीतस्य भागिनेयस्य, स्वभगिनीनां च मरणे, परिणितायाः पुत्र्याः, जामातृश्वशुरयोः, उपनीतदौहित्रमातामहयोः, वाग्दत्तायाः कन्यायाः पतिपक्षे पितृपक्षे च परस्परं दिनत्रयात्मकमाशौचं भवति । मरणेऽप्युभयत्र दिनत्रयात्मकमेवाशौचम् । असगोत्रधर्मपुत्रस्योभयत्र परस्परम्, साङ्गवेदशास्त्राध्यापकस्य गुरोश्च दिनत्रयात्मकमाशौचं भवति ।[३३] सगोत्रधर्मपुत्रस्य तूभयत्र पूर्णाशौचमनुष्ठेयम् ।

---

[२०] गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणम् ॥ याज्ञवल्क्यस्मृति ३।२०

[२१] पञ्चमे पञ्च षष्ठे षट् दिवसाः पातसूतकम् ।
मातुरिष्टमतोक न्येषां पितुश्च त्रिदिनं समम् ॥ षडशीति, श्लोक १०

[२२] पित्रादीनां वर्णभेदादस्त्याशौचं पृथक्पृथक् ।
सूतिका सर्ववर्णानां दशरात्रेण शुद्ध्यति ॥ नि.सि.सा.सं., पृ.३७३,

[२३] पूर्ववत् ३।४

[२४] आशौचं दशरात्रं तु सर्वेषामपरे विदुः ।
निधने प्रशवे चैव पश्यन्तः कर्मणः फलम् ॥ शुद्धिचन्द्रिका, पृ. १६

[२५] सर्वेषामेव वर्णानां सूतके मृतके तथा ।
दशाहाच्छुद्धिरथवा इति शातातपोक व्रवीत् ॥ शुद्धिचन्द्रिका, पृ. १७

[२६] दशाहं शावमाशौचं सपिण्डेषु विधीयते ।
अर्वाक् सञ्चयनादस्थ्नां त्र्यहमेकाहमेव वा ॥ मनुस्मृतिः ५।५९

[२७] सपिण्डता तु पुरुषे सप्तमे विनिवर्तते ।
समानोदकभावे तु निवर्तेत चतुर्दशात् ॥ निर्णयसिन्धु, पृ.७८९

[२८] आशौच दिग्दर्शन, पृ.४१

[२९] ....दशरात्रमतः परम् ॥ याज्ञवल्क्यस्मृतिः ३।२३

[३०] वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः।
पतिसेवा गुरौ वासो गृह्यार्थो ग्निपरिक्रिया ॥ मनुस्मृतिः २।६७

[३१] एकोदकानां तु त्र्यहः गोत्रजानामहं स्मृतम् । सत्कर्मरत्नावली, पृ.:६०१

[३२] त्रिरात्रमाव्रतादेशात्............ । पूर्ववत् ३।२३

[३३] आशौच दिग्दर्शन, पृ.४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५.२.३ पक्षिण्याशौचम्

पक्षिणीशब्दस्य त्रिविधोऽर्थ: विमृष्ट: मनीषिभि: - (क) दिनद्वयस्यैकरात्रस्य च पूर्णकाल:, (ख) रात्रिद्वयदिनैकस्य च पूर्णकाल:, (ग) ३६ घण्टायुक्त: पूर्णकालश्चेति त्रिविधो पन्था: पक्षिणीशब्दस्य । उपर्युक्त: पदत्रयद्योत्य: समय: एक एवेति पक्षिणीशब्दप्रयोगोऽत्रौचित्यं साधयति । अनुपनीतदौहित्रस्य, भागिनेयस्य, पितुर्भगिन्या:, मातुलपुत्रस्य, मातुर्भगिनीपुत्रस्य, पितुर्भगिनीपुत्रस्य च निधने सम्वद्धजनानां कृते पक्षिण्याशौचं भवति । पक्षिण्याशौचं नाम ३६ घण्टापर्यन्तमाशौचम् । अर्थात् बन्धुत्रयाणां निधने सम्वद्धा: जना: पक्षिण्याशौचेन विशुद्धा भवन्तीति प्रतिपादितं शास्त्रकारै: ।[३४]

५.२.४ एकाहाशौचम्

आशौचे प्रयुक्त अहशव्द अहोरात्रिपर: । रात्रिदिवसयो: समष्टिरथवा चतुर्विंशतिघण्टायुक्त: कालविशेष: एवाहोरात्रिशव्देनोच्यते । मातुलस्य, ऊढानामनूढानां वा पित्रृश्वसृपुत्रीणाम्, स्वपत्न्या: भ्रातृणाम्, भगिनीपत्यु:, पत्न्या: भगिनीनाम्, पुरोहितस्य, गुरुपुत्रस्य, वेदाध्यापकस्य गुरो: शिष्यस्य च निधननिमित्ते सम्वद्धेषु जनेष्वेकाहाशौचं प्रवर्तते ।[३५] नामकरणसंस्कारेण संस्कृताना परन्त्वकृतचूडानां जनानां निधने चैकाहाशौचं भवतीति निर्णीतम् ।[३६]

५.२.५ सज्योतिराशौचम्

दिवामरणे तद्दिवसपर्यन्तम्, रात्रौ मरणे सम्वद्धरात्रिपर्यन्तमेव यदाशौचं प्रवर्तते तादृशं सज्योतिराशौचमित्यभिधीयते । देशाधिपते: ग्रामाधिपतेर्वा मरणे सम्वद्धेषु जनेषु सज्योतिराशौचं प्रवर्तत इत्येतादृशी व्यवस्था प्राप्यते ।[३७] त्रिंशत्श्लोक्यामप्येतादृशी व्यवस्थैव प्राप्यते ।[३८]

५.२.६ सद्य: शौचम्

पञ्चमे मासे षण्मासे वा स्त्रीणां गर्भपतने सर्वे सपिण्डा: स्नानादेव शुद्ध्यन्ति । नवममासपश्चात् श्रुतं दशाहाशौचमपि स्नानाद् गच्छति । एवमेव पितृव्यपुत्रीणां मरणे, मातु: भगिनीपुत्रीणां मरणे, मातुलकन्यामरणे, पितुर्भगिनीपुत्रीणां मरणे, पत्न्या: भ्रातृपुत्राणां मरणे च स्नानशुद्धिर्विधीयत इति वदन्ति शास्त्रकारा: । याज्ञवल्क्येन राज्ञाम्, विद्युत्पाताहतानाम्, गोब्राह्मणार्थं युद्धे हतानाम्, यज्ञदीक्षया दीक्षितानाम्, दातृणाम्, व्रतिनाम्, ब्रह्मचारिणाम्, तत्त्वज्ञानाम् कृते सद्यस्नानं विधीयत इत्युक्तम् । तथैव तेन दानादिकार्ये, विवाहे, राष्ट्रविप्लवे, कष्टावस्थायाम्, आपदि च सम्वद्धा: जना: सद्य: स्नानेन शुद्ध्यन्तीति चोक्तम् ।[३९]

एवं कमेणाशौचकालनिर्णये शास्त्रोक्तदेशकालादिनियमोऽपि विचारयितव्य: । एकस्यां परिस्थितौ विहितो निर्णय: पृथक् परिस्थितौ समीचीनोऽपि न स्यात् । तर्ह्यपि सामान्यावस्थायां विहितो निर्णय: विशेषकालादन्यत्रानिवार्यरूपेण परिपालयितव्येति सिद्धान्तपक्ष: ।

६. *अतिकान्ताशौचम्*

अतिकान्ताशौचं नाम व्यतीताशौचम् । कालात्यये श्रुतमाशौचमतिकान्ताशौचमुच्यते, अर्थात्- आशौचदिनेषु गतेषु श्रुतमाशौचमेवातिकान्ताशौचम् । शास्त्रप्रयोजकै: मरणनिमित्तस्य एवातिकान्ताशौचस्य व्यवस्था कृतास्ति । दशाहादिदिनेषु व्यतीतेषु श्रुतस्यातिकान्तस्य जननाशौचस्याशुचित्वं नास्ति, प्रसवेऽतिकान्ताशौचस्य शास्त्रकारै: प्रत्याख्यानात् ।[४०] जनकस्तु पुन: दूरदेशस्थ: दशाहानन्तरेऽपि पुत्रजननं श्रुत्वा सचैलस्नानं विधायैव विशुद्ध्यतीति शास्त्रमर्यादाऽस्ति ।[४१] मरणाशौचे देशान्तरस्था दशाहा: सण्डिा दशाहाभ्यन्तरे एव मरणाशौचस्य सूचनां प्राप्नुवन्ति चेत्तर्हि

---

[३४] *दशश्लोकी, पृ.२७*

[३५] *आशौच दिग्दर्शन, पृ.४३*

[३६] *नृणामकृतचूडानां विशुद्धिर्नैशिकी स्मृता । मनुस्मृति: ५।६७*

[३७] *प्रेते राजनि सज्ज्योतिर्यस्य स्याद्विषये स्थिति: । सत्कर्मरत्नावली, पृ.६०२*

[३८] *..चाथो सज्ज्योतिरेव स्वविषयनृपतौ ग्रामनाथे च नष्टे ॥ त्रिंशच्छ्लोकी, श्लोक ८*

[३९] *महीपतीनां नाशौचं हतानां विद्युता तथा ।*
गोब्राह्मणार्थं संग्रामे यस्य चेच्छति भूमिप: ॥
ऋत्विजां दीक्षितानाञ्च यज्ञीयं कर्मकुर्वताम् ।
सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा ॥
दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ।
आपद्यपि हि कष्टायां सद्य:शौचं विधीयते ॥ याज्ञवल्क्यस्मृति: ३।२७-२९

[४०] *नाशुद्धि: प्रशवाशौचे व्यतीतें पि दिनेष्वपि ॥ सत्कर्मरत्नावली, पृ.६०३*

[४१] *निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च ।*
सवासा जलमाप्लुत्य शुद्धो भवति मानव: ॥ मनुस्मृति: ५। ७७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ते दिनशेषेणाशौचाद् विशुद्धयन्तीति व्यवस्था वर्तते मानवधर्मशास्त्रस्य ।[४२] मरणाशौचस्यातिकान्ते दशाहे तत्र सपिण्डाः दिनत्रयेण शुद्धयन्ति, व्यतीते संवत्सरे तु ते स्नानेनैव विशुद्धा भवन्तीति व्यवस्थापि विद्यते ।[४३] परन्तु पित्रोः विषये तु नैवास्ति तादृशनियमस्यावसर । मातापित्रोर्मरणे तु श्रवणदिनादेव पूर्णाशौचं भवति । तत्रातिकान्ताशौचस्य व्यवस्थैव नास्ति ।[४४] दशाहेषु सपिण्डवान्धवेष्वेवातिकान्ताशौचस्य नियमो प्रवर्तते, त्र्यहाद्याशौचिनां कृते तु व्यवस्थैषा नैवावश्यकीति वदन्ति विद्वांसः ।[४५] एकाहाशौचस्यापरस्मिन् दिने श्रुतस्याशौचस्य शुद्धिः स्नानेनैव जायते ।

७. सम्पाताशौचम्

आशौचमध्ये आशौचान्तरपात एव आशौचसम्पातः । आशौचस्य सम्पातः सम्पाताशौचम् वेत्यभिधीयते । एकस्याशौचस्य प्रवृत्तिदशायां तत्सदृशस्यापरस्याशौचस्य पाते पूर्वाशौचवलेन द्वितीयमाशौचं स्वतः निवर्तते । अर्थात्- पश्चात्पतितमाशौचं पूर्वाशौचानुष्ठानेन परिसमाप्यते ।[४६] परन्त्वल्पदिनसाध्याशौचस्य प्रवृत्तिदशायामधिकदिनसाध्यस्याशौचस्य पाते तु पूर्वाशौचानुष्ठानेनाधिकदिवसात्मकं पश्चात्पतितमाशौचं नैव निवर्तते । तत् स्वकालेनैव निवर्तत इति शास्त्रप्रयोजकाभिमतम् ।[४७] समदिवसात्मकं द्वितीयाशौचं पूर्वाशौचेन गच्छतीति यदुक्तं तदपि सर्वत्र न । एकस्य जननाशौचस्य प्रवृत्तिदशायां समदिवसात्मकस्य द्वितीयस्य जनाशौचस्य पात एव पूर्वाशौचशेषेण द्वितीयं निवर्तते, नान्यथा । अर्थात्- जननाशौचस्य प्रवृत्तिदशायां तत्समदिवसात्मकस्य मरणाशौचस्य पाते न पूर्वाशौचशेषेण शुद्धिः । तत्र मरणाशौचस्य निवर्तनादेव पूर्वपतितस्य जननाशौचस्यापि निवृत्तिर्जायते । मरणाशौचे तादृशं द्वितीयं मरणाशौचं तु पूर्वाशौचशेषेण गच्छत्येव । तर्ह्यपि वहुदिनसाध्यस्य जननाशौचस्य प्रवृत्तिदशायामल्पदिनसाध्यं मरणाशौचं स्वभावतः गच्छतीति वदन्ति शास्त्रवेत्तारः ।[४८]

८. शवनिर्हाराशौचम्

ये शवनिर्हरणं कुर्वन्ति तेऽप्याशौचभागिनो भवन्ति । ये स्नेहेन स्वजातीयशवनिर्हरणं कुर्वन्ति ते यदि मृतकगृहे वसन्ति खादन्त्यपि चेत् दशाहाशौचभागिनो भवन्ति । ये मृतकगृहान्नं न खादन्ति, तत्र निवासमात्रं कुर्वन्ति चेत् ते दिनत्रयेण शुद्धयन्ति । ये पुनः तद्गृहान्नं खादन्ति तेऽहोरात्रपर्यन्तमशुद्धाः भवन्तीति मतं स्थापयति सिन्धुकारः ।[४९] ये विजातीयशवनिर्वहणं कुर्वन्ति शवदहनं वा कुर्वन्ति तेऽधिकदिवसपर्यन्तमशुचिनो भवन्तीति शास्त्रकाराणां सम्मतिरिति ।

१.१.८ आशौचापवादः

व्रह्मचारिणः पतिताश्च जनाः आशौचभागिनो न भवन्तीति शास्त्रमर्यादा ।[५०] शास्त्रनिर्दिष्टाचाराणामननुष्ठानात्, निन्दितकार्याणां सेवनाच्च पतितानां जनानां कृतेऽप्याशौचोदकादिकिया न कर्तव्येति वा ज्ञातव्या । स्वपितुः मातुः गुरोश्च मरणे व्रह्मचारिभिरप्याशौचानुष्ठानम्, उदकादिकिया च कर्तव्येव । पाखण्डि-व्रह्मघाति-सुवर्णचौर-वर्णाश्रमधर्मच्युत-आत्मघाति-सुरापि-पतिघातिन्यादीनां मरणेऽप्याशौचोदकादिकिया न कर्तव्येति वदन्ति शास्त्रप्रयोजकाः ।[५१] जननाशौचमरणाशौचयोः श्रवणात् प्राक् प्रारव्धानां व्रत-यज्ञ-विवाह-श्राद्ध-होम-जपार्चनादिकर्मणां समापनेऽप्याशौचदोषो नास्ति, परन्त्वनारव्धानि पूर्वोक्तकर्माणि तु न कदाचिदपि कर्तव्यान्याशौचकाले ।[५२] एवमाशौचनियमानां परिपालनकार्येऽपि व्यक्तेः गुणदोषतश्चाधिकारानधिकारौ निर्दिष्टौ शास्त्रप्रयोजकैः ।

---

[४२] *विगतन्तु विदेशस्थं श्रृणुयाद् यो ह्यनिर्दशम् ।*
यच्छेशं दशरात्रस्य तावदेवाशुचिर्भवेत् ॥

[४३] *अतिकान्ते दशाहे च त्रिरात्रमशुचिर्भवेत् ।*
संवत्सरे व्यतीते तु स्पृद्वैवापो विशुद्धयति ॥ मनुस्मृतिः ५।७६

[४४] *पितरौ चेन्मृतौ स्यातां दूरस्थोक पि हि पुत्रकः ।*
श्रुत्वा तद्दिनमारभ्य तावदेवाशुचिर्भवेत् ॥ निर्णयसिन्धुसारसंग्रहः , पृ.३८८

[४५] *आशौचदिग्दर्शन, पृ. २३*

[४६] *अन्तरा जन्ममरणे शेषाहोभिर्विशुद्धयति ।*
याज्ञवल्क्यस्मृतिः, ३।२०

[४७] *समानं खल्वशौचं तु प्रथमेन समापयेत् ।*
असमानं द्वितीयेन धर्मराजवचो यथा ॥ शंखस्मृति १५।१०, पृ.३३०

[४८] *- शावेन शुद्धयते सूतिः न सूतिः शावशोधिनी ।*
स्वभाववद्सूतिस्तु न्यूनशावविशोधिनी ॥ निर्णयसिन्धुसारसंग्रहः , पृ.३७३,

[४९] *निर्णयसिन्धुः, पञ्चम परिच्छेद, पृ. ८०३*

[५०] *न व्रह्मचारिणः कुर्युरुदकं पतितास्तथा ॥ याज्ञवल्क्यस्मृति ३।५*

[५१] *पाखण्ड्यनाश्रिताः स्तेना भर्तृघ्न्यः कामगादिकाः ।*
सुराप्य आत्मत्यागिन्यः नाशौचोदकभाजनाः ॥ याज्ञवल्क्यस्मृतिः ३।२४

[५२] *व्रतयज्ञविवाहेषु श्राद्धे होमेक र्चने जपे ।*
आरब्धे सूतकं न स्यादनारब्धेस्तु सूतकम् ॥ आशौच विवेचन, पृ.८१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१.१.९ उपसंहृतिः

१. शास्त्रोक्तमाशौचानुष्ठानमप्येको धर्मः । धर्मानुष्ठानं नाम स्वकर्तव्यपालनम् । आशौचानुष्ठानरूपेण धर्मेण जननमरणनिमित्तकमतिशयद्वयं पूर्णरूपेण निवर्तते । अपत्योत्पत्तेः कारणात् सम्बद्धेषु मनुष्येषु हर्षातिशयजातं नाम मलमुत्पद्यते । मरणोत्पत्तेः कारणात् पुनः शोकातिशयजातं नाम मलमुत्पद्यते । एवमुभयाभ्यामतिशयाभ्यां मनुष्याणां शरीरं मनश्चाशुचित्वं यातः । आशौचानुष्ठानरूपेण धर्मेणोभयोरेव शुद्धिर्जायते ।

२.हर्षातिशयशोकातिशययोः प्रभावेण मनुष्यः स्वस्यैव जीवनमार्गे विचलितो भवति । परन्त्वाशौचनियमान् परिपाल्य स्वयमेव कर्तव्यपरायणः,आत्मसंयमी, अनुशिष्टश्च जायते ।

३.आशौचादिधर्मशास्त्रीयसामाजिकनियमान् परिपाल्य जनः स्वात्मानम्, स्वपितॄन्, स्वसंस्कारांश्च रक्षितुं प्रभवति ।

४.आशौचप्रभृतयः धर्मशास्त्रीयनियमाः नश्वरशरीरमवलम्व्य शोकमोहेषु निमग्नान् जनान् ततः निवार्य ईश्वरतत्त्वस्यान्वेषणे जनान् प्रेरयन्ति ।

अन्ततो विश्वस्मिन् विश्वे कस्मिंश्चदपि समाजे जन्ममरणसम्वद्धाः संस्काराः प्रायेणावलम्व्यमानाः विलोक्यन्ते परं हिन्दुसनातनधर्मस्य गर्भाधानतः मृत्युपार्यन्तिकाः संस्काराः समग्रमानवजीवनस्य सारवस्तुरूपा भवन्तीति विषये परसहस्रं ग्रन्थरत्नानि प्रमाणभूतानि सन्ति । तेषु ग्रन्थेषु व्यवस्थितेषु विविधविषयेष्वन्यतमा वर्तते आशौचव्यवस्था । व्यवस्थेयमापाततः सामान्येवानुभूताऽपि नितरां महत्त्वपूर्णा जटिलतरा च वर्तत इति हेतोः अस्याः व्यवस्थाया अपि वैज्ञानिकाध्ययनमद्यतन्यावश्यकतास्तीति सदार्ढ्यं वक्तुं पार्यते ।

सन्दर्भग्रन्थाः

१. आप्टे, वामन शिवराम, संस्कृत हिन्दीकोश, दिल्ली : मोतीलाल बनारसीदास, १९६६ ।
२. आचार्य, आदित्य, षडशीति (शुद्धिचन्द्रिकायुता), बनारस : चौखम्वा संस्कृत सिरिज, १९२८ ।
३. आचार्य, पं. यदुनाथ, आशौचदिग्दर्शन, काठमाडौँ : लुष प्रेस, विं.स.२०५२ ।
४. गौतम, रामचन्द्र, आशौच-विवेचन, काठमाड़ौँ : गीता प्रिन्टिङ् प्रेस, २०५३ ।
५. चौबे, अर्जुन, धर्मशास्त्र का इतिहास (द्वितीय भाग), लखनऊ : हिन्दी समिति, १९६५ ।
६. पण्डित, जुनाथ, निर्णयसिन्धुसारसंग्रहः, काठमाडौँ : लुष प्रेस,२०४९ ।
७. पराशरस्मृतिः, बनारस : चौखम्वा संस्कृत सिरिज, १९२९ ।
८. पारस्करगृह्यसूत्रम्, वाराणसी : भारतीय विद्याप्रकाशन, १९९९ ।
९. भट्ट, कमलाकर, निर्णयसिन्धुः, वाराणसी : बम्वई बुक डिपो १९१० ।
१०. भट्ट, नागेश, त्रिंशत्श्लोकी, बनारस : विद्याविलास प्रेस, १९१० ।
११. मनुस्मृतिः, दिल्ली : मोतीलाल बनारसी दास, १९८३ ।
१२. याज्ञवल्क्यस्मृतिः, दिल्ली : मोतीलाल बनारसी दास १९९७ ।
१३. शाह, गीर्वाणयुद्ध विक्रम, सत्कर्मरत्नावली, काठमाडौँ : रामशाहपथ , ख्रै.२०२६ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालद्योतकानां लकाराणां परिचयस्तेषामर्थनिर्धारणं प्रयोगाश्च

मोहनप्रसादपोखेल:
उपप्राध्यापक:

१. विषयप्रवेश:

कालशब्द: समयवाचकोऽस्ति । कालसमयवेलासु तुमुन्[1] इत्यत एतदर्थोऽनुमीयते । कालश्च द्विविधोऽद्यतनानद्यतनभेदेन । अद्यतनो व्यतीतायाः रात्रेनिशीथकालादर्धरात्रेरितोऽऽगामी रात्रेर्मध्यरात्रितः पूर्वं यावान् कालः सः । तस्माद् भिन्नकालोऽनद्यतनः ।[2] अनद्यतनोऽपि भूतानद्यतनभविष्यदनद्यतनेति भेदेन द्विधा विभज्यते । भूतानद्यतनोऽपि परोक्षापरोक्षभेदेन पुनर्द्विधा विभज्यते । एतादृशं विहितं विविधभेदमाश्रित्य कालस्य विविधस्वरूपमुपस्थापयितुं शक्यते । लोके तु भूतवर्तमानभविष्यद्भेदन त्रिविधः काल इति लोकाः कथयन्ति । विविधासु भाषासु विविधसङ्केतेन जनितोऽयं कालस्य भेदः संस्कृतभाषायां पाणिनिना दशलकारेण ज्ञापितः । क्रियामाश्रित्य कालो निर्धायते । अतः कालविभागस्य आधारः क्रिया एव ।

२. लकाराणां परिचय:

लट्,लिट्,लुट्,लृट्,लेट्,लोट्,लङ्,लिङ्,लुङ,लृङ्[3] एते दशलकाराः कालद्योतकाः सन्ति । एषां मध्ये आद्यषड्टिल्लकाराः अन्त्यश्चत्वारो ङिल्लकाराः सन्ति ।

२.१ लट् लकार:

वर्तमानकालद्योतकोऽयं लट्लकारः । भवति, गच्छति इत्यादि कथनेन वर्तमानः समयो बुध्यते । किं नाम वर्तमानत्वमिति जिज्ञासायामुच्यते- प्रारब्धापरिसमाप्तत्वं, भूतभविष्यद्भिन्नत्वं[4] वा, इदन्तु कौण्डभट्टकृन्मतम् । अत्र विषये नागेशः - प्रारब्धापरिसमाप्तक्रियोपलक्षिततत्वम्[5] इति लिखति । क्रियायाः प्रारम्भात् फलोत्पत्तिपर्यन्तः क्रियात्मकः कालो वर्तमानकालः[6] अत्र वर्तमानकालोपस्थापनाय पाणिनिना वर्तमाने लट्[7] इति विधिसूत्रं लिखितम् । रामो गच्छति, रामो गच्छन्नस्ति इत्यादि वाक्यानि वर्तमानकालाज्जायन्ते । अत्र प्रथमवाक्यस्थया गच्छति क्रियया सामान्यवर्तमानं प्रतीयते, परं द्वितीयवाक्यस्थया 'गच्छन्' क्रियया कार्यारम्भस्य सङ्केतो जायते । अत्र द्वितीये गम् धातोर्लट् विधानानन्तरं शतृप्रत्ययो विहितो दृश्यते । वर्तमानकालिकक्रियायां कार्यारम्भस्यावस्थाद्योतनाय लस्य स्थाने परस्मैपदिनो धातोः शानच्[8] प्रत्ययस्य च व्यवस्था सूत्रकारेण विहिता । एतदतिरिक्तं कुत्र कुत्र लट्लकार भवतीति पाणिनेः सूत्रमाश्रित्येदानीं विचार्यते ।

- स्म[9] शब्दस्य यत्र योगस्तत्र लिटं प्रबाध्य लट् लकारस्यैव प्रयोगो भवति । यथा - यजति स्म युधिष्ठिरः ।
- स्म योगे भूतानद्यतनेऽपरोक्षेर्थेऽपि[10] लट् भवति । यथा - एवं स्म पिता ब्रवीति ।
- ननौ पृष्टप्रतिवचने[11] भूतेऽपि लट् भवति । यथा - अकार्षीः किम् ? इति पृष्टे सति ननु करोमि भोः इति लट्प्रयोग एव ।
- पुरा शब्दस्य योगे भूतार्थे स्मशब्दयोगाभावेऽपि पुरि लुङ् चास्मेति[12] लट् एव प्रयोगः । यथा - वसन्तीह पुरा छात्राः ।
- निश्चयार्थद्योतकौ यावत्पुरानिपातौ यत्रभवतस्तत्रापि यावत्पुरानिपातयोर्लट्[13] इति लट् लकारस्यैव प्रयोगः । यथा- यावद् भुङ्क्ते, पुरा भुङ्क्ते ।
- कदा कर्हि शब्दयोर्योगे भविष्यत्यर्थे विभाषया विभाषा कदा कर्ह्योरिति[14] लट् एव । यथा - कदा कर्हि वा भुङ्क्ते । अत्र विभाषाभावे तु भोक्ष्यते भोक्ता वा इति प्रयोगः ।
- किं वृत्यर्थकलिप्सायां[15] लिप्यस्यमानसिद्धौ[16] सत्यां च भविष्यत्यर्थे लट् भवति । यथा- कं कतरं कतमं भोजयसि इति आद्यस्य, योऽन्नं ददाति स स्वर्गं याति इति अन्त्यस्योदाहरणम् ।
- लोडर्थलक्ष्णे भविष्यत्यर्थेऽपि लोडर्थलक्षणेचेति[17] लट्लकारस्यैव प्रयोगः । यथा- कृष्णश्चेद् भुङ्क्ते त्वं गाश्चारय । लोडर्थलक्षणाभावे तु भोक्ता, भोक्ष्यते इति प्रयोगः ।

---

[1] पा. सू. ३।३।१६७
[2] वैयाकरण भूषणसार प्रभाकरीय टीकायां पृ. १८४
[3] भट्टोजिदीक्षित सिद्धान्तकौमुदी मूलमात्रम् - ....
[4] भूषणसार - पूर्ववत् , पृ १७३
[5] नागेश भट्ट ,परमलघुमञ्जुषा, पृ. १५१
[6] भूषणसार प्रभाकरीय टीकायां - पृ. १७१
[7] पा. सू. ३।२।१२३
[8] पा. सू. ३।२।१२४
[9] पा. सू. ३।२।११८
[10] पा. सू. ३।२।११९
[11] पा. सू. ३।२।१२०
[12] पा. सू. ३।२।१२२
[13] पा. सू. ३।३।४
[14] पा. सू. ३।३।५
[15] पा. सू. ३।३।६
[16] पा. सू. ३।३।७
[17] पा. सू. ३।३।८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

- ऊर्ध्वमौहूर्तिके भविष्यत्यर्थे लोडर्थलक्षणे[18]ऽपि लट् भवति । यथा- मुहूर्तादुपरि उपाध्याय आगच्छति चेत् त्वं छन्दोऽधीष्व । अत्र लङभावपक्षे तु आगच्छेत् , आगमिष्यति , आगन्ता इत्यादि प्रयोगः ।
- वर्तमानसमीपस्थे भूतार्थे भविष्यत्यर्थे च लट्प्रयोगः[19] । यथा - वर्तमानसमीपे भूते- कदा आगतोऽसि ? अयमागच्छामि । वर्तमानसमीपे भविष्यत्यर्थे - कदा गमिष्यसि ? एष गच्छामि ।
- आशंसायां भविष्यतिकाले भूतवद्[20] वर्तमानवच्च प्रत्यया जायन्ते । यथा- देवश्चेदवर्षीत् वर्षति वर्षिष्यति ।
- अपिजातुशब्दयोः प्रयोगे गहार्थे कालत्रये लट्[21]लकारस्य प्रयोगो भवति । यथा- अपि जायां त्यजसि । जातु गणिकायामाधत्से ।
- कथं शब्दयोगे गहार्थे लिङभावपक्षे लट्[22] भवति । यथा- कथं धर्मं त्यजसि । लिङ्पक्षे तु कथं धर्मं त्यजेत् इति प्रयोगः ।
- इच्छार्थे विभाषाया लिङ्भावपक्षे लट्[23] भवति । यथा- इच्छति, कामयते । लिङ् पक्षे तु इच्छेत्, कामयेत् ।

२.२ लिट्लकारः

परोक्षभूतकालद्योतकोऽयं लिट् लकारः । पराक्षे लिट्[24] इति सूत्रस्थ परोक्षपदस्यार्थस्तु एतादृशो वर्तते । इन्द्रियजन्यं ज्ञानं प्रत्यक्षं तद्भिन्नं परोक्षम् वा क्रियाया अद्यतनभूतार्थत्वे कर्तृविशिष्टप्रत्यक्षाविषयत्वं परोक्षत्वम्[25], अथवा साक्षात्कृतमित्येतादृशविषयशालीज्ञानाविषयत्वं[26] परोक्षत्वमिति । अत्र लिड्विधौ अनद्यतनत्वं भूतत्वं परोक्षत्वञ्चेति त्रित्वं बीजम् । तस्माद् कारणात् केवलानद्यतने भूते लङ्लकारस्यैव प्रयोगेन लिट् अनद्यतने लङ्[27] इति सूत्र विधानात् । एवं चानद्यतने भविष्यत्काले लुट् विषयेऽपि न लिट्सूत्रे परोक्षशब्दोच्चारणेन अपरोक्षसामान्यभूते लुङ् विषयेऽपि न लिट्लकारस्य प्रयोगः । अतो लिड्विधायके सूत्रेऽनद्यतनपरोक्षभूतार्थवृत्तौ धातोर्लिट्स्यादिति[28] उक्तम् । जगाद, चकार, तेपे इत्यादीन्युदाहरणानि । अत्र पाणिनेः सूत्रमाश्रित्य लिट्लकारस्य प्रयोगस्थलं विचार्यते ।

- अनद्यतनपरोक्षभूतार्थवृत्तेर्लिड् भवति । यथा - चकार, बभूव, जगाद ।
- उत्तमपुरुषे चित्तविक्षेपादिप्रयोगे परोक्षत्वस्यैव[29] प्रयोगः । यथा सुप्तोऽहं किल विललाप । बहु जगाद पुरस्तात्तस्य भत्ता किलाहम् ।
- अत्यन्तापहनवेऽर्थेऽपि लिड्[30] भवति । यथा- कलिङ्गेष्ववात्सीः इति प्रश्ने नाहं कलिङ्गाञ्जगाम ।
- हशश्वतोर्लङ्[31] चेति सूत्रस्थचकारबलादेकपक्षे लिडपि भवति । यथा- ह चकार, शश्वत् चकार ।
- आसन्नकाले पृच्छ्यमानेऽर्थेऽपि लङभावविषये[32] लिड् भवति । यथा- जगाम किम् ? बभूव किम् । अत्र अगच्छत् किम् इति प्रयोगस्थले जगाम किम् इति प्रयुज्यते ।

२.३ लुट्लकारः

अनद्यतनकालद्योतकोऽयं लुट्लकारः[33] । अनेन लकारेण श्वोभाविनी क्रियायाः कालो बोध्यते । कति समयोऽनद्यतनभविष्यत्काल इति विषयेऽत्र समयो निर्धार्यते - फलसिद्धचर्थमागम्यर्धरात्र्यनन्तरं या भाविनी क्रिया तदात्मकः कालोऽनद्यतनभविष्यत्कालः[34] इति कथ्यते । तत्रैव लुट् विधीयते । यथा -भविता, गन्ता, अध्येता, याता इत्यादीन्युदाहरणानि । अनद्यतने भविष्यद्दिने कार्यस्य समयो मासदिवसादितिथयश्च यदा निश्चीयन्ते तत्र लुट्लकारस्यैव प्रयोगो भवति । परन्तु भविष्यत्काले विधीयमानस्य कार्यस्य निश्चयो वर्तते अपि समयस्य वा मासदिवसादितिथयश्चानिश्चीयमाने सति न तत्र लुट्प्रयोगः, अपि तु तादृशस्थले लृडेव प्रयोगः इत्यवधेयम् । अत्र पाणिनेः सूत्रान्नाधृत्य लुट्लकारस्य प्रयोगस्थलं विचार्यते -

- कदाकर्हि[35] शब्दयोर्योगे लुट्लकारस्य प्रयोगो भवति । यथा - कदा कर्हि वा भोक्ता ।
- लिप्स्यमानसिद्धौ चेति[36] सूत्रस्य प्रयोगः स्थलेऽपि लुट्लकारस्य प्रयोगोपलभ्यते । यथा- योऽन्नं दाता स स्वर्गं याता ।

---

[18] पा. सू. ३।३।९
[19] पा. सू. ३।३।१३१
[20] पा. सू. ३।३।१३२
[21] पा. सू. ३।३।१४२
[22] पा. सू. ३।३।१४३
[23] पा. सू. ३।३।१६०
[24] पा. सू. ३।२।११५
[25] वैयाकरण भूषणसार प्रभाकरीय टीका पृ.१७१
[26] परमलघुमञ्जुषा पृ. १५२
[27] पा. सू. ३।२।१११
[28] सिद्धान्तकौमुदी मूलमात्रम् - पा. सू. ३।२।११५
[29] सिद्धान्तकौमुदी मूलमात्रम् पृ.२७२
[30] सिद्धान्तकौमुदी पूर्ववत्
[31] पा. सू. ३।२।११६
[32] पा. सू. ३।२।११७
[33] पा. सू. ३।२।१५
[34] भूषणसार पूर्ववत् प्रभाकरीय टीका पृ. १७१
[35] पा. सू. ३।३।५
[36] पा. सू. ३।३।७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

- ऊर्ध्वमौहूर्तिकेऽर्थेऽपि[३७] लुट्लकारस्यैव प्रयोगः । यथा- उपाध्यायश्चेदागन्ता त्वं छन्दोऽधीष्व ।
- परस्मिन् विभाषा[३८] इति सूत्रस्योदाहरणेऽपि लुट्प्रयोगः । यथा- योऽयं संवत्सर आगामी तस्य यत्परमाग्रहायण्यास्तत्राध्येतास्महे ।
- धातुसम्बन्धे प्रत्ययाः[३९] इति सूत्रस्य प्रयोगेऽपि लुट्लकारस्य प्रयोगो दृश्यते । यथा- सोमयाजस्य पुत्रो जनिता ।

२.४ लृट्लकारः

सामान्यभविष्यत्कालद्योतकोऽयं लृट्लकारः । लकारोऽयं सामान्यभविष्यत्कालिकी या क्रिया तद्वाचकाद् धातोर्भवति । अत्र सामान्यत्वन्तु अद्यतनानद्यतनोपाधिभेदशून्यकालबोधविषयत्वमिति[४०] ज्ञेयम् । लृट् शेषे च[४१] इति सूत्रस्थशेषशब्दस्यार्थस्तु उक्तादन्यः शेष इति बोध्यम् । अत्र अनद्यतनविषयेतूक्तमेव तद् भिन्नोऽद्यतनभविष्यत्काल एव शेषशब्दस्यार्थः । भविष्यति, गदिष्यति, गमिष्यति इत्यादीन्युदाहरणानि लृट् लकारस्य । अत्र पाणिनेः सूत्रान्नाधारीकृत्य कुत्र कुत्र लृट् लकारो भवतीति विषये विचार्यते ।

- अभिज्ञावचने लृट्[४२] इति सूत्रेण ज्ञापितत्वात् स्मृतिबोधिन्युपपदे लृट् भवति । यथा- स्मरसि कृष्ण गोकुले वस्यामः । स्मरसि चेतयसे बुध्यसे इत्यादीनि स्मृतिबोधीनि पदानि सन्ति ।
- स्मृतिबोधविषये लक्ष्यलक्षणभावेन साकाङ्क्षबोधिते सत्यपि लृट्[४३] प्रयुज्यते । यथा- स्मरसि कृष्ण वने वत्स्यामस्तत्र गाश्चरयिष्यामः । अत्रोदाहरणे वासो लक्षणं चारणञ्च लक्ष्यमवधेयम् ।
- कदाकर्हिशब्दयोः[४४] प्रयोगे विभाषया एकपक्षे लृट्लकारो भवति । यथा- कदा कर्हि वा भोक्ष्यसे ।
- किंवृत्ते लिप्सायामितिसूत्रस्यैकपक्षे[४५] वृत्यर्थभिन्ने केवले लिप्सार्थे लृड् भवति । यथा- कं कतरं कतमं भोजयिष्यसि । कः पाटलिपुत्रं गमिष्यसि ।
- लिप्स्यमानसिद्धौ[४६] सत्यामपि एकपक्षे लृड् भवति । यथा- योऽन्नं दास्यति स स्वर्गं यास्यति ।
- उर्ध्वमौहूर्तिकेऽर्थे[४७] लिङभावपक्षे लृड् भवति । यथा- उपाध्यायश्चेदागमिष्यति त्वं छन्दोऽधीष्व ।
- वर्तमान सामीप्यार्थे लडभावपक्षे लृड्[४८] भवति । यथा- कदा गमिष्यसि ,कदा एधिष्यते
- आशंसार्थेऽन्यलकाराभावपक्षे लृड्[४९] भवति । यथा- देवश्चेद वर्षिष्यति ....।
- क्षिप्रवचनेऽर्थे[५०] लृड् भवति । यथा- वृष्टिश्चेत् क्षिप्रमाशु आयास्यति शीघ्रं वप्स्यामः ।
- क्रियाप्रबन्धसामीप्ये अनद्यतनवदर्थे लड्लुटावभावपक्षे[५१] लृड् भवति । यथा- यावज्जीवमन्नमदात् दास्यति वा ।
- अवरस्मिन् गम्यमाने मर्यादावचने भविष्यत्काले[५२] लृड् भवति । योऽयमध्वा गन्तव्या पाटलिपुत्रात् तस्य यदवर कौशाम्ब्यास्तत्र सक्तून् पास्यामः ।
- होत्राणां कालविभागेऽर्थे[५३] लृड् भवति । यथा- योऽयं वत्सर आगामी तस्य यदवरमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे ।
- गर्हार्थके किंवृत्ते[५४] लृड् भवति । यथा- कः कतरः कतमो वा हरिं निन्दिष्यति ।
- किंशब्देनानवक्लृप्त्यमर्षार्थद्योत्येऽपि[५५] लृड् भवति । यथा- न सम्भावयामि न मर्षये वा भवान् हरिं निन्दिष्यति ।
- क्रोधार्थकौ किङ्किलास्तिशब्दौ वा तयोः पर्यायौ उपपदे भूत्वा अनवक्लृप्तास्ति[५६]द्योतिते सत्यपि लृड् भवति । यथा- न श्रद्दधे न मर्षये वा किङ्किल त्वं शूद्रान्नं भोक्ष्यसे ।
- आश्चर्यार्थे द्योत्येऽपि[५७] लृड् भवति । यथा- आश्चर्यमन्धो नाम कृष्णं द्रक्ष्यति ।

---

[३७] पा. सू. ३।३।९
[३८] पा. सू. ३।३।१३८
[३९] पा. सू. ३।४।१
[४०] वैयाकरण भूषणसार प्रभाकरीय टीका पृ. १९१
[४१] पा. सू. ३।३।१३
[४२] पा. सू. ३।२।११२
[४३] पा. सू. ३।२।११४
[४४] पा. सू. ३।३।५
[४५] पा. सू. ३।३।६
[४६] पा. सू. ३।३।७
[४७] पा. सू. ३।३।९
[४८] पा. सू. ३।३।१३१
[४९] पा. सू. ३।३।१३२
[५०] पा. सू. ३।३।१३३
[५१] पा. सू. ३।३।१३५
[५२] पा. सू. ३।३।१३६
[५३] पा. सू. ३।३।१३७
[५४] पा. सू. ३।३।१४४
[५५] पा. सू. ३।३।१४५
[५६] पा. सू. ३।३।१४६
[५७] पा. सू. ३।३।१५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२.५ लेट्लकारः

अस्य लकारस्य प्रयोगः छन्दसि मात्रोपलभ्यते । विध्यर्थे प्रार्थनार्थे च छन्दसि विषये लेट् प्रयुज्यते । लिङर्थे लेट्[५८] इति सूत्रादनुमीयतेऽयमर्थः । अतो लौकिकप्रयोगो नास्ति अस्य लकारस्य । यथा- विद्युत् पताति । प्रिया सूर्ये अग्ना भवाति, पतति, भवति इति लौकिकप्रयोगः ।

२.६ लोट्लकारः

विध्यर्थे आज्ञार्थे च लोट्लकारस्य प्रयोगो भवति । एवञ्चाशिषिलिङ्लोटौ[५९] सूत्रादनुमीयते यदाशिष्यर्थेऽपि लोट् प्रयुज्यते । सत्कारपूर्वकव्यापारादौ चास्य प्रयोगः[६०] इति नागेशेन लिखितः । भवान्नागच्छतु जलं गृह्णातु इत्यस्योदाहरणम् । लोट्लकारस्य कुत्र कुत्र प्रयोग इति विषये पाणिनिसूत्रमाधृत्य किञ्चिदत्र विचार्यते ।

- इच्छार्थके लिङ्लोटौ[६१] इति सूत्रविधानात् इच्छार्थेऽपि लोड् भवति । यथा- इच्छामि, भुङ्ता, भवान् ।
- प्रैषाद्यर्थेषु[६२] लोड् भवति । यथा- भवान् , यजताम् ।
- स्म[६३] योगे प्रैषादिविषये लोड् भवति । यथा- ऊर्ध्वं मुहूर्ताद् यजतां स्म ।
- अधीष्टेऽर्थे स्मयोगे[६४] लोड् भवति । यथा- त्वं स्म अध्यापय ।
- क्रियासमभिहारार्थे[६५] लोड् भवति । यथा- याहि याहि ।

२.७ लङ्लकारः

अनद्यतनभूतकालद्योतकोऽयं लङ्लकारः, अनद्यतने लङ्[६६] इति सूत्रविधानात् । अनद्यतनभूतकालिकी या क्रिया तद्वाचकाद् धातोर्लङ्लकारो भवतीति निश्चप्रचम् । अस्य पुत्रोऽभवत्, रामोगृहमगच्छत्, श्याम ओदनमखादत् इत्यादीनि लङ्लकारस्योदाहरणानि । अत्रानद्यतनशब्देन ह्यभूतकालं बोधयति । लङ्लकारः कुत्र कुत्र भवतीति अत्र विचार्यते ।

- हशब्द-शश्वच्छब्दोपपदविषये लङ्[६७] भवति । यथा- हाकरोत्, शश्वदकरोत् ।
- आसन्नकाले पृच्छ्यमाने लिङ्विषये लङ्[६८] प्रयुज्यते । यथा- आगच्छत् किम् अभणत् किम्

२.८ लिङ्लकारः

- लिङ्लकारस्य द्वौ भेदौ स्तः । आशीर्लिङ्लकारः, विधिलिङ्लकारश्च । आशिषि लिङ्लोटौ[६९] इति सूत्रविधानात् आशिष्यर्थे यो लिङ्लकारो विधीयते स आशिषि लिङ्लकारः । तव स्वस्तिर्भूयात्, अधिकं लप्सीष्ट, आयुः एधीषीष्ट इत्यादीन्याशिषिलिङ्लकारस्योदाहरणानि । विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्[७०] इति सूत्रेण ज्ञापितत्वाद् विध्याद्यर्थे यो लिङ् विधीयते स हि विधिलिङ्लकारः । भवेत्, लभेत, एधेत इत्यादीनि विधिलिङ्लकारस्योदाहरणानि । विधिः प्रेरणम्, भृत्यादेर्निकृष्टस्य प्रवर्तनम् । अत्र विधिशब्दो हि प्रेरणपर्यायत्वेन प्रवर्तितत्वाद् भृत्यादीनां परिचारकादिसेवकानां कर्मणि प्रवर्नमित्यर्थे वर्तते । यथा- पुष्पंमानयेत्, भृत्य गृहं सम्मार्जयेत्, भो शिष्य त्वं विद्यालये पठेः । तादृशं मा निन्देत् । निमन्त्रणम्- नियोगकरणम् । आवश्यके श्रद्धाभोजनादौ दौहित्रादेः प्रवर्तनम् । यथा - भो नप्तः, भो भागिनेयः, इह श्राद्धे भवान् भुजीत । क्रीडकान् स्वदेशं निमन्त्रयेत् । आमन्त्रणम् -

  कामचारानुज्ञा/स्वेच्छया आचरणप्रवृत्तिशीलः । यथा - अवकाशश्चेदवश्यमागच्छेत् । आरब्धं कुरुत, वेदान् पठ वा तर्कम् (स्वेच्छया पठ), ग्रामं गच्छेत् वा नगरम् इत्यादि । अधीष्टः, सत्कारपूर्वको व्यापारः यथा- भवान् बालकान् अध्यापयेत् । भक्तान् धर्मं श्रावयेत् सम्प्रश्नः सम्प्रधारणम् । द्वयोः क्रिययोर्मध्ये एकस्यां क्रियायामिष्टसाधनतारूपनिर्धारणं सम्प्रश्नः । यथा- वेदमधीयीय वा तर्कम्, किं भोः व्याकरणं भवान् अधीयीत उत तर्कम् । प्रार्थना - याच्ञा, भवान् अन्नं मे दद्यात् । पुस्तकं भोजनं च लभेय[७१] । अत्र लिङर्थेषु विधित्वादि नानाधर्माद्यपेक्षायाम् प्रवर्तनायां लिङ् इत्येव वक्तव्यम्, उक्तञ्चैतद् विषये-

  अस्तिप्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि ।
  तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया[७२] ॥

प्रवर्तनायां लिङ् इति सुवचसत्वेऽपि अत्र प्रपञ्चोपादानन्तु विशेषधर्मव्यापको हि सामान्यधर्मः इति न्यायः स्वरूपार्थम् । अत्र विशेषधर्मो विधित्वादिरूपो व्याप्यो धर्मः, तज्ज्ञानपूर्वकं व्यापकस्य सामान्यधर्मस्य ज्ञानं

---

[५८] पा. सू. ३।४।७
[५९] पा. सू. ३।३।१७३
[६०] नागेश, परमलघुमञ्जुषा पूर्ववत् पृ.१५५
[६१] पा. सू. ३।३।१५७
[६२] पा. सू. ३।३।१६३
[६३] पा. सू. ३।३।१६५
[६४] पा. सू. ३।३।१६६
[६५] पा. सू. ३।४।२
[६६] पा. सू. ३।२।१११
[६७] पा. सू. ३।२।११६
[६८] पा. सू. ३।२।११७
[६९] पा. सू. ३।३।१७३
[७०] पा. सू. ३।३।१६१
[७१] सिद्धान्तकौमुदी प्रभाकरीय टीका पृ. ३०८
[७२] वैयाकरणभूषणसार प्रभाकरीय - पृ. १९६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यादित्येदर्थवोधनाय सप्रपञ्चरूपं भेदमुपस्थापितम् । इतः परं पाणिनेः सूत्रमाधारीकृत्य कुत्र कुत्र लिङ् भवतीति विचार्यते ।

- आशंसावाचिन्युपपदे भविष्यत्काले लिङ्[७३] भवति । यथा- गुरूश्चेदुपेयाद् आशंसेऽधीयीय ।
- गर्हायामपि कालत्रये लिङ् भवति[७४] । यथा- कथं धर्मं त्यजेः ।
- किंशब्दोपपदे गर्हायां कालत्रये लिङ्[७५] भवति । यथा- कः कतरः कतमो वा हरिं निन्देत् ।
- अनवक्लृत्यमर्षार्थके[७६], किं शब्द निष्पन्नोपपदाभावे लिङ् विधीयते । यथा - न सम्भावयामि न मर्षये वा भवान् हरिं निन्देत् ।
- अनवक्लृत्यमर्षकयोः जातुयदशब्दयोर्योगे लिङ्[७७] भवति । यथा- जातु यद् यदा यदि वा त्वादृशो हरिं निन्देत् ।
- अनवक्लृत्यमर्षकार्थकयोर्यच्चयत्रशब्दयोर्योगे लिङ्[७८] भवति । यथा- यच्च यत्र त्वमेवं कुर्याः न श्रद्दधे न मर्षयामि ।
- गहार्थकयोर्यच्चयत्रशब्दयोर्योगे लिङ्[७९] भवति । यथा- यच्च तत्र वा त्वं शूद्रं याजयेः ।
- चित्रीकरणरूपगम्यमाने यच्चयत्रयोर्योगे[८०] लिङ् भवति । यथा- यच्च यत्र वा त्वं शूद्रं याजयेः आश्चर्यमेतत् ।
- समर्थतुल्यार्थकयोः उतापिशब्दयोर्योगे लिङ्[८१] भवति । यथा- उत अपि वा हन्याद् ।
- स्वाभिप्रायाविष्करणेऽवगम्यमाने लिङ्[८२] भवति । यथा- कामो मे भुञ्जीत भवान् ।
- सम्भावनम् अलम् इति सिद्धा प्रयोगे सम्भावनेऽर्थे[८३] लिङ् भवति । यथा- अपि गिरं शिरसा भिन्द्यँत्
- सम्भावनेऽर्थे धातूपपदे उक्तेऽर्थे[८४] वा लिङ् भवति । यथा- सम्भावयामि भुञ्जीत भवान् ।
- हेतु हेतुमद्भावरूपार्थप्रतीयमाने भविष्यत्काले लिङ्[८५] भवति । यथा- कृष्णं नमेच्चेत् सुखं यायात् ।
- इच्छार्थके धातूपपदे [८६] धातोर्लिङ् भवति । यथा- इच्छामि, भुञ्जीत, भवान् ।
- समानकर्तृकेच्छार्थकधातूपपदे धातोर्लिङ्[८७] भवति । यथा- भुञ्जीय इति इच्छति ।
- इच्छार्थकाद्धातोर्वर्तमानाद् वा लिङ्[८८] भवति । यथा- इच्छेत्, कामयेत्, भुञ्जीत ।
- प्रैषातिसर्गप्राप्तकालाद्यर्थेषु तत्रैवोर्ध्वमौहूर्तिकार्थप्रतीयमाने सति धातोर्लिङ्[८९] विधीयते । यथा- मुहूर्ताद् ऊर्ध्वं यजेत ।
- यच्छब्दोपपदे कालसमयवेलासु च लिङ्[९०] भवति । यथा- कालः समयो वेला वा यद् भुञ्जीत भवान् ।
- कृत्यतृच्प्रत्ययविहितपक्षं विहाय योग्यार्थे लिङ्[९१] भवति । यथा- त्वं कन्यां वहेः ।
- शक्त्यर्थे धातोर्लिङ्[९२] भवति । यथा- भारं त्वं वहेः ।

२.९ लुङ्लकारः

सामान्यभूतकालद्योतकोऽयं लुङ्लकारः । लुङ्[९३] इति सूत्रेण सामान्यभूते लकारविधानाच्चायमर्थः । अत्र सामान्यत्वं तु वर्तमानध्वंसप्रतियोगिक्रियोपलक्षितत्वम्[९४] ग्रहीतत्वम् । यथा- अपात्, अभूत्, ऐधिष्ट इत्यादीन्यस्योदाहरणानि । अत्र लुङ्लकारः कुत्र कुत्र भवतीति विचार्यते ।

- माङि[९५] उपपदे धातोर्लुङ् विधीयते । यथा- मा भवान् भूत् ।
- क्रियाया सातत्ये सामीप्यऽर्थे[९६] लङ्लुटावभावपक्षे धातोर्लुङ् भवति । यथा- यावज्जीवमन्नमदात् ।
- स्मोत्तरे माङ्युपपदे लङभावपक्षे लुङ्[९७] भवति । यथा- मा स्म भवान् भूत् ।

---

[७३] पा. सू. ३।३।१३४
[७४] पा. सू. ३।३।१४३
[७५] पा. सू. ३।३।१४४
[७६] पा. सू. ३।३।१४५
[७७] पा. सू. ३।३।१४७
[७८] पा. सू. ३।३।१४८
[७९] पा. सू. ३।३।१४९
[८०] पा. सू. ३।३।१५
[८१] पा. सू. ३।३।१५२
[८२] पा. सू. ३।३।१५३
[८३] पा. सू. ३।३।१५४
[८४] पा. सू. ३।३।१५५
[८५] पा. सू. ३।३।१५६
[८६] पा. सू. ३।३।१५७
[८७] पा. सू. ३।३।१५९
[८८] पा. सू. ३।३।१६०
[८९] पा. सू. ३।३।१६४
[९०] पा. सू. ३।३।१६८
[९१] पा. सू. ३।३।१६९
[९२] पा. सू. ३।३।१७२
[९३] पा. सू. ३।२।११०
[९४] परमलघुमञ्जूषा पूर्ववत् पृ. १५६
[९५] पा. सू. ३।३।१७५
[९६] पा. सू. ३।३।१३५
[९७] पा. सू. ३।३।१७६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२.१० लृङ्लकारः

सम्भावनाभविष्यत्कालद्योतकोऽयं लृङ्लकारः । हेतुसत्वे कार्यस्योपस्थितिः । हेत्वाभावे कार्यस्याप्यभावोऽनेन बोध्यते । लिङ्निमित्ते लृङ्क्रियातिपत्तौ[१८] इति सूत्रेण ज्ञापितत्वात् अयमर्थ आयाति । यथा- सुवृष्टिश्चेदभविष्यत् तदा सुभिक्षमभविष्यत् । अत्र उदाहरणे - सुवृष्ट्यनुकूला क्रिया हेतुः, सुभिक्षोत्पादिका क्रिया हेतुमती । अनेनैव प्रकारेण हेतुहेतुमद्भावो यत्र बोध्यते तत्रैव लृङ् भवतीति ।

अस्माकं संस्कृतव्याकरणे क्रियायाः कालविषये याः व्यवस्था पाणिनिना विहीताः ता अति संक्षेपण मया उपस्थापिताः । संस्कृतभाषापिपठिषूणां कृते लकारार्थज्ञानपूर्वकं तेषामर्थनिर्धारणार्थं चायमालेख उपयोगी भविष्यतीति मदीयो विश्वासः ।

सन्दर्भग्रन्थाः

१ पाणिनिः– अष्टाध्यायी, तृतीयं संस्करणम्, वाराणसी : चौखम्बा-सुरभारती-प्रकाशनम्, सन् १९७५ ।

२ दीक्षितो भट्टोजिः– सिद्धान्तकौमुदी (मूलमात्रम्), द्वितीयं संस्करणम्, वाराणसी : चौखम्बा-ओरियन्टलिया-प्रकाशनम्, सन् १९७५ ।

३ दीक्षितो भट्टोजिः – प्रभाकरीयटीकायुता सिद्धान्तकौमुदी (तृतीयो भागः), वाराणसी : अरविन्द-मकरन्दमिश्रप्रकाशनम्, सन् १९८७ ।

४ भट्टः कौण्डः – वैयाकरणभूषणसारः (प्रभाकरीयटीकायुतः), वाराणसी : अरविन्दमिश्र-मकरन्दमिश्र-प्रकाशनम्, सन् १९६२ ।

५ भट्टो नागेशः– परमलघुमञ्जूषा, द्वितीयं संस्करणम्, वाराणसी : चौखम्बा-संस्कृत-सीरीज-अफिस, संवत् २०३० ।

नववर्ष २०६९ को शुभ-अवसरमा सम्पूर्ण शिक्षक, विद्यार्थी तथा कर्मचारीहरूमा सुस्वास्थ्य, दीर्घायु एवं प्रगतिको

शुभकामना

मोडेल एकेडेमी काठमाडौं

सामाखुशी-२९

फोन नं. ४३५१५७१

[१८] पा. सू. ३।३।१३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भू-भ्रमणम्

नारायणराजदाहाल:
सहप्राध्यापक:

"द्यौर्मे पिता जनिता नाभिरत्र वन्धुर्मे माता पृथिवी महीयम्"१.१६४.३३ऋ.सं.

अस्मिन् प्रसङ्गे वैदिककालादेव रात्रिदिवं कथं सम्भवतीति अत्यन्तम् अन्विष्टोऽयं विषय: । पृथ्वी गोलाकारा निराधारा वर्तते इति ऋग्वेदकाले एव अन्वेषितो वर्तते । यथा - "चक्राणास: परीणहं पृथिव्या हिरण्येन मणिना शुम्भमाना:। नहिन्वाना सस्तितिरुस्त: इन्द्रं परिस्यशो आदधात् सूर्येण ।" १-३३-८ ऋ.सं.

तथैवान्योऽपि- अहस्ता पदपदी वर्धतक्षाशाचीभिर्वेद्यानाम् ।

शुष्णं परिप्रदक्षिणि द्विश्वाय वेनिशिश्नथ: ।" १०-२२-१४ ऋ.सं.

तथैव पृथिवी मुकुराकारा नैवेति ज्ञानमपि सम्यक् आसीदिति ऋग्वेदे एव- "आप्रारजांसि दिव्यानि पार्थिवा श्लोके देव: कृणुते स्वाय धर्मणे ।

प्रवाहू अश्राक् सविता सवी मनि निवेशयन् प्रसुवन्नक्तु भिर्जगत् ।" ४-५३-३ ऋ.सं.

उक्त विषयमेव सुस्पष्टंम् उक्तम् ऐतरेय व्राम्मण ग्रन्थे-

"सवा एषन कदाचनास्तमेति नोदेति तं यदस्त मेतीति मन्यन्तेह्न एव तदन्त मित्वाथात्मानं विपर्यस्यते रात्रिमेवावस्तात् कुरुतेह: परस्तादथ यदेनं प्रातरुदेतीति मन्यते रात्रेरेव तदन्त मित्वाथात्मानं विपर्यस्यतेऽहरेवावस्तात् कुरुते रात्रिं परस्तात् सवा एषन कदाचन निम्नोचति ।" ऐ.व्राम्मण: १४/६

सूर्यो नोदेति न अस्तं याति । रात्रिदिनयो: कारणन्तु (पृथ्वी एव) । भूगोलशव्देनैव पृथिव्या गोलत्वं स्वाभाविकरूपेणैव प्रकटयति । उक्तविषये भास्कराचार्यस्य सिद्धान्तशिरोमणिनामके ग्रन्थे लिखितं वर्तते यत् -

"भपञ्जरस्य भ्रमणावलोकादाधारशून्या कुरिति प्रतीति :।

खस्थं न दृष्टं च गुरुक्षमात: खेऽध: प्रयातीति वदन्ति वौद्धा: ॥७॥

द्वौ द्वौ रवीन्दू भगणैच तद्वदेकान्तरातावुदयं व्रजेताम् ।

यदव्रुवन्नेव मनम्वराद्या व्रवीम्यतस्मात् प्रति युक्तियुक्तम् ।" ।८। सि.शि.गोलाध्याये भुवनकोष:

अत्र वौद्धमतं जैन मतञ्चोल्लेखनपूर्वकं तत्र दूषणमपि प्रस्तुतं भास्करेण । उक्तग्रन्थान्तर्गतस्थगोलाध्यायस्य भुवनकोषे एव स्वमतम्- "नान्याधार स्वशक्त्यैव वियति नियतं तिष्ठतीहास्य पृष्ठे ।" ।२। सि.शि.गोलाध्याय:

आधुनिकज्योतिर्ज्ञातारो पृथ्वी गोलाकारा वर्तते इति कथनस्य पुष्टिमित्थं कुर्वन्ति यथा - गच्छन् कोऽपि जन: अग्रस्थ वृक्षस्य प्रथममग्रभागमेवालोकयति अत: परं मध्यभागं तत: पश्चादेव वृक्षस्य मूलमवलोकयति । यदि पृथिवी समतला चेत् तदा पूर्णवृक्षस्यावलोकनं प्रथममेव भवितुमर्हति । अस्मात् कारणात् पृथ्वी गोलाकारा इति निश्चीयते ।

सूर्योऽपि क्रमश उदेति तथैव क्रमश: अस्तङ्गच्छति यदि च पृथ्वी मुकुराकारा स्यात् तदा समानकालमेव सर्वत्र सूर्योदयोऽस्तञ्च भवितुमर्हेत् ।

ग्रहणगस्तश्चन्दोऽपि गोलाकार एवावलोक्यते । ग्रहणहेतुस्तु भूभाग एव । भूर्यदि अन्याकारा स्यात् तदा भूभाअपि अन्याकारैव भवितुमर्हति । तथैव चन्द्रग्रहणमपि ।

अत: परं भ्रमणविषय: – पृथ्वी भ्रमति वा सूर्य: ? अस्मिन् विषये वेदोक्तमन्त्रो यथा - "आकृष्णेन रजसा वर्तमानो निवेसयन्न मृतम्मर्त्यञ्च । हिरण्ययेन सविता रथेनादेवोयाति भुवनानि पश्यन् ।"- शुक्ल यजुर्वेद सं. ३३/४३

अत्र स्पष्टमेव उक्तं सूर्य: पृथ्वीं परित: प्रकाशयन् भ्रमति । तथैव ऋग्वेदेऽपि- "यस्य कृष्णमरुणंच सहित अहोरात्रे विहिते भूम्यामधिवर्षेण भूमी: पृथिवी वृत्ता वृता सानो दधातु भद्रयाप्रिये धामनि धामनि ।" तथैव अन्यच्च- "आयंगौ पृश्निरक्रमी दश दन्मातरपुर: पितरच प्रयन्त्स्व: ।" १०-१८९-१ ऋ.सं.

पृथिवीं प्रकाशयन् सूर्य: आकाशे तिष्ठति (अन्धकारस्य कारणन्तु स्वयमेव पृथिवी) अमरसिंहरचित अमरकोषेऽपि यथा- "भूर्भूमिरचलानन्ता रसा विश्वम्भरा स्थिरा ।" ५६०। अ.को. द्वितीयकाण्डस्य भूमिवर्ग: ।

अत्र अमरसिंहेन भूमि: अचला, स्थिरा एव नैवोक्तम् अपि तु अत्र अनन्ता अपि उक्तम् । उक्तकोषमतं सम्यक् पुराणसम्मतं वर्तते ।

भूभ्रमणमपि द्विविधम् अक्षभ्रमणम् कक्षभ्रमणञ्च । अत्र प्रथमंम् अक्षभ्रमणविषयं प्रस्तूयते - आसन्न४७६इसवीये समये रचिते आर्यसिद्धान्तप्रवर्तकस्य आर्यभट्टस्य "आर्यभटीयम्" नामकग्रन्थे भूभ्रणविषय: स्पष्टतया प्रस्तुत: ।

यथा - "अनुलोम गतिर्नौस्थ: पश्यत्यचलं विलोमगं यद्वत् ।

अचलानि भानि तद्वत् सपश्चिमगानि लङ्कायाम् ।" ।९। आर्यभटीयम् गोलपाद:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्थात् नौकातः कोऽपि जनः पूर्वतः पश्चिमतटाभिमुखं गच्छति तदा नौकायाश्चलनं न भाति । अपि तु पश्चिमतटस्थः प्रदेश एव नौगतिसमानमेव विपरीतपश्चिमतः पूर्वाभिमुखं भ्रमन् लक्ष्यते । अत्र यथास्थानस्थितस्यापि पश्चिमतटस्य चलनं भाति । चलन्ती नौका स्थिरा लक्ष्यते । तथैव चलतः स्वाश्रयस्य भूगोलस्य भ्रमणं न भाति आकाशस्थ ग्रहनक्षत्राणां भ्रमणं लक्ष्यते । वसादियाने स्थित्वा गच्छता मनुष्येणाऽपि आसन्न प्रदेशौएव विपरिताभिमुखं भ्रमन्तौ लक्ष्येते । तथैव ग्रहादयोऽपि भ्रमन्तो लक्ष्यन्ते इति । लङ्कातः (भूमध्यरेखास्थितस्थानतः) याम्योत्तरदिशोः समगत्या समानान्तर गतयो भ्रमदवलोक्यते । स्वस्थाने स्वाङ्ग भ्रमणेन रात्रिदिन व्यवस्था सिध्यति । अर्थात् षष्टिघटिभिः (२३।५६।४.०९२०) आसन्न २४ होरायां वा भुवा एकं स्वाङ्गभ्रमणं भवति ।

रात्रि-दिनेः कारणं सग्रह भचक्र भ्रमणापेक्षया पृथिव्या अक्षभ्रमणमेवस्वाभाविकं भाति ।

आकाशस्थाग्रहाः दूरदर्शकयन्त्रमाध्यमेन अवलोकिते सति अक्षभ्रमणं कुर्वन्तः अवलोक्यन्ते । किन्तु पश्चात् गच्छन्तः नैवावलोक्यन्ते । न्युटन, फूको महोदयस्य अन्वेषणेनापि पृथिव्या अक्षभ्रमणमेव प्रमाणितम् ।

यथार्थरूपेण आर्यभटं विहाय पूर्वीयज्यौतिषज्ञाः भूस्थिरतावादिन आसन् । पाटीगणितस्य-बीजगणितस्य विशिष्टविदुषः लल्लाचार्यस्य कथनम् यथा- "यदिच भ्रमतिक्ष्मा स्वकुलायं कथमाप्नुयुः खगाः ।" ४२

श्रीवृद्धिदन्तत्रः वा शिष्यधिवृद्धिदतन्तन्त्र :

लल्लस्तु आर्यभट्टस्य शिष्यरूपेण स्वीक्रियते कैश्चित् । किन्तु भूभ्रमणमतम् सम्यक् खण्डितमेतेन । यदि पृथिवीभ्रमणशिला चेत् तदा स्वनीडं कथं प्राप्नुवन्ति खगाः । (भूभ्रमणमसम्भवमिति) तथैव व्रह्मगुप्त –श्रीपति– वराहादयः अपि । सूर्यसिद्धान्तमतम् यथा- "पञ्चात्व्रजन्तोऽति जवान्नक्षत्रैः सततं ग्रहाः । जीयमानास्तुलम्वन्ते तुल्यमेव स्वमार्गगाः । प्रागगतित्वमस्तेषां भगणैः प्रत्यहं गतिः । परिणाहवसाद् भिन्ना तद्वशाद भानि भुञ्जते । सूर्यसिद्धान्तस्य मध्यमाधिकार २५/२६

विशिष्टेन (प्रवहनामक) अनिलेन प्रेरिताः सग्रहा नक्षत्राः तुल्यरुपेण पश्चिमगत्या भूपरिक्रमणं पूरयन्ति प्रत्यहोरात्रं कक्षभ्रमणन्तु स्वस्व कक्षासु पूर्वगत्या स्वकक्षाकारा नुसारेण वार्षिकगत्या भचक्रं पूरयन्ति ग्रहाः ।

तथैव भास्करः- ततोऽपराशाभिमुखं भपञ्जरे सखेचरे शीघ्रतरे भ्रमत्यपि ।

तदल्प गत्येन्द्रदिशं नभश्चराश्चरन्ति नीचोच्चतरात्म वर्त्मसु ।"१४ सिद्धान्त शिरोमणि मध्यमाधिकारे काल मानाध्याय, ।

नक्षत्रसहित सम्पूर्ण सूर्यादिग्रहाः शीघ्र पश्चिम गत्या भ्रमन्ति । अल्पगत्या पूर्वदिशं भूकेन्द्रम्मत्वा (चन्द्रमा, वुधः, शुक्रः, सूर्यः, भौमः, गुरुः, शनिः) क्रमेण स्वस्वमार्गरुपकक्षासु भ्रमन्ति । अतः परम् नक्षत्र कक्षा वर्तते इति ।

अधुना विशिष्टदूरवीक्षणादियन्त्राणाम् आविष्कारः सञ्जातः । तस्मात् कारणादेव खगोलावलोकनं सरलतया सम्भवति । दूरदर्शकयन्त्रमाध्यमेन स्पष्टतया सर्वे ग्रहाः सूर्यं परितः भ्रमन्तः अवलोक्यन्ते । सूर्यस्तुअक्ष भ्रमणमेव करोति । दिवाकरं परितः क्रमशः वुधः, शुक्रः, भूः भौमः गुरुः, शनिः, अरुणः, वरुणः, यमः नव ग्रहाः भ्रमन्तः अवलोक्यन्ते । चन्द्रस्तु पृथिवीः परितः परिभ्रमति । अस्मात् चन्द्रः पृथिव्या उपग्रहः कथ्यते । सूर्यात् गणनाक्रमेण चतुर्थोऽयं भ्रग्रहः अस्माकं धर्ता आश्रयदाता च ।

सूर्यकेन्द्रात् भूकेन्द्रपर्यन्तंकृतं सूत्रं भूकर्णः तत्र प्रभाकरकेन्द्रं केन्द्रविन्दुम्मत्वा भूकर्णव्यासार्धेन यःएकः ३६० अंशात्मकगोलःभवितुमर्हति । स एव भूकक्षा तस्यां भूगोलस्य भ्रमणेन एकः सौर वर्ष पूर्ति र्भवति (उदयात् उदयं भानो भानु सावन वासरः३६स्.शि.म.धि.) सावन दिवसानु सारेण आगतो भूकक्षा भ्रमणकालोऽपि ३६५-५.८ दिवस समानो भवति ।

पृथिव्या भ्रमणमार्गः (भूकक्षा) अपि दीर्घवत्ताकार नाभिद्वययुक्तः । एकनाभिगतो दिवाकरो वर्तते । द्वितीयनाभिस्तु निरापदमेव अस्ति । अस्मात् कारणादेव ऋतूनां परिवर्तनं सम्भवति । सूर्यात् पृथ्वी दूरगतसमयः शीतकालः । दिनकरात् भूनिकटगतः समयः उष्णकालः इति सहजरूपेण अनुभूतोऽयं अस्माभिः ।

सन्दर्भग्रन्थाः

१. अपौरुषेय- यजुर्वेद संहिता, खेमराज श्रीकृष्णदाश बम्वे,प्र. १९९१ ई. ।

२. आर्य भट्ट- आर्य भटीयम्- चौखम्वा सुरभारति प्र., प्रथम- २००८ ई. वाराणसी ।

३. सं.कपिलदेव शास्त्री- सूर्य सिद्धान्त- चौखम्वा सं.संस्थान प्र.तृ.- २०३५ वि .सं

४. सं.डा.प्रसन्न चन्द्र गौतम- ऋग्वेद संहिता- कुलचन्द्र गौतम प्रतिष्ठान, प्रथम २०६७, काठमाडौ ।

५. भास्कराचार्य- सिद्धान्त शिरोमणि- चौखम्वा सं.सं.प्र.च., २००८ ई., „ ।

६. रामनाथ सहाय- अर्वाचीनं ज्योतिर्विज्ञानम्- सं.सं.वि.वि. १९६४ ई. वाराणसी ।

७. अनु.शिवनाथ झारखण्डी भारतीय ज्योतिष- हिन्दी समिति उ.प्र.तृतीय, १९७५ ई. इलाहवाद ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रामायणस्य विवेचनं श्रीरामस्य परब्रह्मत्वञ्च

उदयराजसुवेदी:
उपप्राध्यापक:

महर्षिर्वाल्मीकि: संस्कृतभाषाया आदिकविर्विद्यते । तस्य रामायणम् आदिकाव्यं वर्तते । संस्कृतिप्रधानेन लौकिकसंस्कृतसाहित्यस्य वृहत्काव्यस्याधारशिलां संस्थापयितुं महर्षेर्वाल्मीके: समुज्ज्वलं योगदानं सर्वथा श्रद्धास्पदं स्मरणीयञ्चास्ति । स्वयं रामायणेऽपि विलिखितमस्ति - "आदिकाव्यमिदं चार्षं पुरा वाल्मीकिना कृतम्" । आदिकविर्वाल्मीकिरङ्गिरसगोत्रे ब्राह्मणकुले समुत्पन्नोऽभूत् । तस्य प्रथमं नाम 'रत्नाकर:' इत्यासीत् । एकस्य भिल्लस्य सम्पर्केण दुस्संगतिप्रभावेण च स रत्नाकर: लुण्ठकोऽभवत् । वनं गत्वा स पथिकान्[1] जनान् वलादाकम्य तेषां धनादिकमाहृत्य जीवनं यापयति स्म । एकदा वाल्मीकिर्देवर्षिणा नारदेन सह मिलित: । तस्य संयोगेन उपदेशप्रभावेण च रत्नाकरो लुण्ठकवृत्तिं परित्यज्य तपस्तप्तुमारब्धवान् । बहुकाले व्यतीते स निराहार: सन् समाधौ तिष्ठति स्म । अस्य महर्षित्वविषये अधिकानि प्रमाणानि अनेका: जनश्रुतयश्च प्रचलिता: वर्तन्ते । पुराणेष्वपि

मरा मरा मरेत्येवं सहस्त्राब्दं जजाप हे ।
जपप्रभावादभवद् वनमुत्पलसङ्कुलम् ॥
वल्मीकान्नि:सृतो यस्मात्तस्मांद्वाल्मीकिरुत्तमम् ।
तव नाम भवेद् विप्र त्रिकालज्ञ महामते ।[2]

पौराणिककथनानुसारेण अयमृषि: रामकालीन इति मन्यते । रामायणोत्पत्तिरहस्यम् एतादृशं वर्तते - एकदा भरद्वाजशिष्यसहितो महर्षिर्वाल्मीकिस्तमसां नदीं गच्छन् कौञ्चमिथुनादेकं व्याधेन हन्यमानं तथैव तद्वियोगेन विलपन्तीं तत्प्रियां कौञ्चीं दृष्ट्वा शोकाकुलो जात: । तदानीं मुनिहृदयादेक: श्लोक: समजायत । असावेव श्लोको महामुनेर्वाल्मीके: कण्ठात् सहसोदभवन् मुनिमेनं नितान्तं विस्मितं कृतवान् ॥ अधस्तनोऽयं श्लोको रामायणस्य चादिकाव्यस्य मूलहेतुरस्ति –

"मा निषाद ! प्रतिष्ठां त्वमगम: शाश्वती: समा: ।
यत् कौञ्चमिथुनादेकमवधी: काममोहितम् ॥"[3]

ततस्तं मुनिं विस्मितं विलोक्य स्वयं ब्रह्मा वाल्मीकिमुपजगाम । उक्तवाँस्तं महामुनिं चैवम् - हे महामुने ! तव हृदये साक्षाद् वाग्देवी श्लोकरूपेण प्रकटितास्ति । अतस्त्वं श्रीरामस्य चरितं वर्णय" इत्युक्त्वा ब्रह्मा तदैवान्तर्हित: । इदमेव रामायणस्योत्पत्तिरहस्यं वर्तते । तत: परं ब्रह्मर्षिर्वाल्मीकि: कदाचिदागच्छतो देवर्षेर्नारदाद् रामचरितं श्रुतवान् । तप:प्रभावेण योगवलेन च समग्रं श्रीरामचरितं महामुनिहृदये साक्षात् प्रत्यक्षीभूतमिव प्रकटितम् । तदनन्तरं महर्षि: सप्तकाण्डात्मकं रामायणमहाकाव्यं विरचितवान् ।

वेदो यत् परमतत्त्वं वर्णयति, तदेव परमतत्त्वस्वरूपं श्रीमन्नारायणतत्त्वं रामायणे रामरूपमिति निरूपितमस्ति । वेदवेद्य: परमपुरुषोत्तमो दशरथनन्दन: श्रीरामावतारो भविष्यतीति निश्चितमत: पश्चात् साक्षाद् वेदो हि वाल्मीकेर्मुखाद् रामायणरूपेणाविर्भूतवान् । तस्मादेव श्रीरामस्य परमात्मरूपत्वमपि बुध्यते । शास्त्राभ्यासपरम्परानुसारेण चिरकालादेव आस्तिकजनानामेतादृशी मान्यता स्थितास्ति । अत एतादृशं श्रीमद्वाल्मीकीयरामायणम् आदिकाव्यम् इति समस्तभूतले प्रथमकाव्यत्वेन प्रसिद्धमस्ति । इदं रामायणं सर्वेषां जनानां कृते पूजनीयं, परमगौरवपूर्णं वस्त्वस्ति । इदं रामायणं देशस्य एवं राष्ट्रस्य अमूल्यनिधिरिति सिद्धम् । तस्माद् रामायणं सर्वेषामस्य एकैकक्षरं महापातकनाशकमस्ति । उक्तञ्च –

चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ।
एकैकमक्षरं पुंसां महापातकनाशनम् ॥[4]

तस्माद् इदं समस्तकाव्यानां काव्यवीजमस्ति - "काव्यवीजं सनातनम्" ।
श्रीव्यासादिमहर्षयाऽस्यैवाध्ययनं कृत्वा पुराण-महाभारतादिशास्त्राणि रचितवन्त: । तत्तु इतश्च स्पष्टीभवति - पठ रामायणं व्यास काव्यवीजं सनातनम् ।[5] रामायणं समग्रमधीत्य महाभारतादिग्रन्थनिर्माणतत्परो व्यासो महर्षिं वाल्मीकिं प्रति कथयति – रामायणं पाठितं मे प्रसन्नोऽस्मि कृतस्त्वया । करिष्यामि पुराणानि महाभारतमेव च ॥ स्वयं नारायणावतारवेदव्यासेन वाल्मीके: जीवनचरितं भक्तिपूर्वकं स्कन्दपुराणे वैष्णवखण्डे वैशाखमहात्म्ये प्रदर्शितम् । श्रीमद्वाल्मीकीयरामायणस्य महत्त्वं पूर्णरूपेण कथयितुं कोऽपि समर्थो न भवति । यदा सृष्टिचक्रं प्रचलितं ततो निसृता श्रीरामकथा सर्वेषां जनानां हृदये तिष्ठति । इत्थं रामकथा विश्वस्मिन् विविधभाषास्वपि लिखिता इति प्रसिद्धास्ति । श्रीमद्वाल्मीकीयरामायणं संस्कृतवाङ्मयेषु सर्वेभ्य: शास्त्रेभ्यो ज्येष्ठं श्रेष्ठञ्चास्ति ।[6]

श्रीमद्वाल्मीकीयरामायणस्यान्यशास्त्राणाञ्च परस्परं विचारे कृते सति महदाश्चर्यमनुभूयते यदादिकविवाल्मीकिना किञ्चिदपि प्राचीनकाव्यानामध्ययनं विनैव एतादृशं सर्वोत्तमं काव्यं रचितम् । अस्य प्राकृतिकचित्रणमपि अत्यधिकं सुन्दरमस्ति । अस्य ग्रन्थस्य संवादा: सर्वाधिका: सुन्दरतमा: सन्ति । हनुमत: वार्ताया: कौशलं सर्वत्र श्रोतारञ्च आकर्षयति । श्रीरामस्य

---

[1] विष्णुप्रसादपाठक:, निवन्धसौरभ:, अयोध्या : भारतीप्रकाशनम्, पृ.सं.६१ ।
[2] भविष्यपुराणम्, प्रतिसर्गपर्व - ४।१०।५३+५४ ।
[3] वाल्मीकीयरामायणम्,वालकाण्ड:, १।२।१५, पृ. स. ४८ ।
[4] वाल्मीकीयरामायणम्, पाठविधि:, रामायणनमस्कारशीर्षके पृ. ३१ ।
[5] वृहद्धमपुराणम्, अ. ३., ४७।५१ ।
[6] वाल्मीकीयरामायणम्, भूमिका, पृ.सं. ५ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Public Domain. Digitization by eGangotri.Funding: MIDF

विषयप्रतिपादनशैली दशरथस्य संभाषणपद्धतिश्च महत्त्वपूर्णे स्तः । वाल्मीकीयरामायणे युद्धकाण्डे आयुर्वेदादिकविषयाणां राजनीतिकविश्लेषणानां सामाजिकव्यवहाराणामपि विशेषचर्चा विद्यते । श्रीमद्वाल्मीकीयरामायणे तन्त्रशास्त्रस्य प्रारम्भिकी चर्चा रावण-कुम्भकर्ण-विभीषणमेघनादादीनां जन्मवृत्तान्ते कृता । समग्ररूपेण महर्षिणा वाल्मीकिना अद्भुतकविताशैल्या अतीव लोकप्रियः काव्यग्रन्थो रचितः । वस्तुतो वाल्मीकेः तपःपरिणाम एव रामायणाख्यो ग्रन्थः । रामायणे परमात्मस्वरूपस्य श्रीरामस्य चरितं मधुरशैल्या रचितमस्ति । गभीरचिन्तनेन श्रीमद्वाल्मीकीयरामायणं श्रीरामं परब्रह्मपरमेश्वररूपं साधयति । श्रीमद्वाल्मीकीयरामायणं काव्यानां मूलमस्ति । श्रीमद्वाल्मीकीयरामायणं तु सर्वगुणयुक्तम् अजरामरं दिव्यं परमकल्याणमयमतीव लोकप्रियमस्ति । वाल्मीकीयरामायणे किष्किन्धाकाण्डे[७] विश्वभूगोलवर्णनं कृतम् । अस्माकम् उपजीव्यकाव्यं रामायणं राष्ट्रियैकतायाः आदर्शग्रन्थः एव न हि अपि तु भौगौलिकैकतायाः प्रतीकमस्ति । सतीसाध्वीसीतायाः परित्यागप्रसङ्गो राष्ट्रप्रेम्णः कारणादेव नायकः रामः इदं कथयति –

"स्नेहं दयां च सौख्यं च यदि वा जानकीमपि ।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा" ॥

एवं क्षेमेन्द्रकृते रामायणेऽपि रामः देशप्रेम्णा एवं भाषते –

"अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते ।
जननी जन्म भूमिश्च स्वर्गादपि गरीयसी ।"[८]

तस्मात् वाल्मीकीयरामायणस्य पठनेन मननेन कीर्तनेन पूजनेनानुष्ठानेन च श्रीरामसन्निधिः प्राप्यते । वाल्मीकीयरामायणे उपासनादृष्ट्याऽपि निष्कर्षो दत्तो वर्तते –

सर्वदेवमयो रामः .... । तथा
नास्ति गङ्गासमं तीर्थं नास्ति मातृसमो गुरुः ।
नास्ति विष्णुसमो देवो नास्ति रामायणात् परम् ॥[९]

वाल्मीकिः सर्वेषां साहित्यहृदयानां किं वा समग्रभाषीयाणां सादरं वन्दनीयः स्तुत्यश्चास्ति । तथा हि –

कूजन्तं राम रामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम्"

तथा "राम रामेति रामेति रमे रामे मनोरमे । सहस्रनाम तत्तुल्यं रामनाम वरानने" इत्यादिफलमहात्म्येन अनादिकालादेव रामायणस्याध्ययनपरम्परास्ति । श्रीमद्रामायणी गङ्गा पुनाति भुवनत्रयम् । श्रृण्वन् रामकथानादं को न याति परां गतिम्" इदं रामायणं मनुष्यमात्रेभ्यः भवसागरं पारयितुं महामन्त्रस्वरूपमस्ति ।

मर्यादापुरुषोत्तमस्य भगवतो रामस्यादर्शचरित्रेण तस्य विशिष्टेन जीवनेन मर्यादापालनेन च महती शिक्षा प्राप्यते । संस्कृतवाङ्मये श्रीमद्वाल्मीकीयरामायणात् पूर्वमपि बीजरूपेण रामायणम् आसीद् यत् शिवः सर्वप्रथमं सतीदेव्यै श्रावयामास । तद् रामायणं बीजमात्रमासीत् पश्चात् अध्यात्मरामायणनामोल्लेखो जातः, यस्य प्रमाणं श्रीरामगीताप्रसंगेन ज्ञायते । अध्यात्मरामायणस्योल्लेखो ब्रह्माण्डपुराणस्य[११] उत्तरखण्डेऽस्ति । श्रीरामः अयते प्राप्यते येन तद् रामायणम् । तस्मात् श्रीरामपरमात्मस्वरूपमिति सर्ववेदसम्मतम् इति सिद्धम् । श्रीरामस्य चरितान्वितम् अयनं शास्त्रं=रामायणम् इति भावः । रमयति स्वकान् इति रामः । येषु पुराणेषु तथा रामायणे श्रीरामकथाः सन्ति ता अल्पीयस्य एव । व्यापकदृष्ट्या विचार्यमाणे तु श्रीरामकथापि वेदा इव प्राचीनतमा विद्यते । तमसातटे क्रौञ्चवधात् संतप्तस्य वाल्मीकेः शोकस्य श्लोकरूपतया प्रकटितं कथनमेव वाल्मीकिरायणबीजम्, ततः मुनिं प्रति ब्रह्मणो रामचरितमयकाव्यनिर्माणार्थमादेशः –

कुरु रामकथां पुण्यां श्लोकबद्धां मनोरमाम् ।
यावत् स्थास्यन्ति गिरयः सरितश्च महीतले ॥[१३]

परब्रह्मपरमात्मा स्वयं नारायणो विष्णुरेव श्रीरामात्मनाऽवर्तीण इति रामायणतः सम्यगवगम्यते । बालकाण्डे पञ्चदशसर्गे श्रीविष्णुरेव रामात्मना अवतारं धृतवानिति स्पष्टतया प्रतिपादितम् । देवानां प्रार्थितो भगवान् विष्णुः रावणवधोपायस्याऽनुसन्धानं कुर्वन् देवेभ्य आश्वासनञ्चाधस्तनवचनैर्दत्तवान् - "अयं त्यजत भद्रं वो हितार्थं युधि रावणम् । सपुत्रपौत्रं सामात्यं समन्त्रिज्ञतिबान्धवम् ॥[१४]

हत्वा क्रूरं दुराधर्षं देवर्षीणां भयावहम् ।
दशवर्षसहस्त्राणि दशवर्षशतानि च ॥
वत्स्यामि मानुषे लोके पालयन् पृथिवीमिमाम् ।
एवं दत्वा वरं देवो देवानां विष्णुरात्मवान् ॥

एवञ्चोक्त्वा यथासमयमात्मानं चतुर्विधं कृतवान् - "विष्णो पुत्रत्वमागच्छ कृत्वाऽऽत्मानं चतुर्विधम् । ततः पश्चाद् ब्रह्मणः प्रेरणया देवाः सहायकरूपेण विभिन्नवानरयूथपतीनां रूपेण समुत्पन्नाः । युद्धकाण्डेऽपि श्रीरामस्य पार्श्वे देवानामागमनं ब्रह्मणा तस्य भगवत्तायाः प्रतिपादनं स्तवनं च कृतम् -

भवान् नारायणो देव श्रीमांश्चक्रायुधः प्रभुः ॥[१६]

---

[७] वा.रा.कि.का., पृ.सं.३५८ ।
[८] क्षेमेन्द्रकृतरामायणम् ।
[९] वाल्मीकीयरामायणे ।
[११] अध्यात्मरामायणम्, भूमिका ।
[१३] वा.रा., बा.का. - २।३६, पृ.सं. ४८ ।
[१४] पूर्ववत्, पञ्चदशसर्गः, श्लोक २८-३० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकश्रृङ्गो वराहस्त्वं भूतभव्यसपत्नजित् ।
अक्षरं ब्रह्म सत्यं च मध्ये चान्ते च राघव ।
लोकानां त्वं परो धर्मो विष्वक्सेनश्चतुर्भुजः ।
सीता लक्ष्मीर्भवान् विष्णुर्देवः कृष्णः प्रजापतिः ॥" इत्यादिवचनं श्रीरामस्य परमात्मरूपत्वं वोधयति । सुन्दरकाण्डेऽपि श्रीरामप्रभावो वर्णितो वर्तते । उत्तरकाण्डेऽपि भ्रातृभिः सहितस्य श्रीरामस्य स्वकीये वैष्णवे तेजसि प्रवेशः । तेन रामस्य विष्णुरूपत्वमिति स्पष्टमेव । श्रीरामस्य जन्मप्रसङ्गेऽपि कौसल्यायाः समक्षे चतुर्भुजरूपेणैव प्रादुरभवत् पुनर्मातुः प्रार्थनया द्विभुजो जातः । एवमध्यात्मरामायणेऽपि राज्ञा दशरथेन पृष्टे सति गुरुणा वशिष्ठेन प्रत्युक्तेनापि रामस्य परब्रह्मत्वं स्पष्टीभवति । तथा हि - त्वं मे पुत्रो भव इति प्रार्थितः, त्वया चार्चितोऽसौ भववान् भूतभावनः । तथेत्युक्त्वाद्य पुत्रस्ते जातो राम स एव हि । शेषस्तु लक्ष्मणो राजन् रामसेवान्वपद्यत । आनन्दरामायेणे –

जातौ भरतशत्रुघ्नौ शङ्खचक्रे गदाभृतः ।[17]
योगमायापि सीतेति जाता जनकनन्दिनी ।
विश्वामित्रोऽपि रामाय तां योजयितुमागतः ।

एतद् गुह्यतमं राजन् न वक्तव्यं कदाचन । इति ततः पश्चात् दशरथो रामलक्ष्मणौ विश्वामित्राय दत्तवान् इत्यादि वचनेन श्रीरामस्य परमात्मत्वे ज्ञाते सति अत्रापि स एव ज्ञेय इति भावः ॥

आनन्दरामायणेऽपि
'ॐ नमो भगवते श्रीविष्णवे परमात्मने ।
परात्पराय रामाय ससीताय नमो नमः ॥ इत्यादि वचनेनाऽपि परमात्मत्वं ज्ञापयति । वाल्मीकीयरामायणे युद्धकाण्डे एवमुपक्रमोपसंहाराभ्यां तस्य परात्परत्वं परमात्मत्वञ्च सिद्धमेव । भगवतो नारायणस्य स्वयमंशावतारपरशुरामेणोच्यते -

अक्षयं मधुहन्तारं जानामि त्वां सुरेश्वरम् ।

तथा अयोध्याकाण्डे लक्ष्मणमाता सुमित्रा कौशल्यामाश्वासयति –

"सूर्यस्यापि भवेत् सूर्यो ह्यग्नेरग्निः प्रभो प्रभुः ।[18]
श्रिया श्रीश्च भवेदन्या कीर्त्या कीर्तिः क्षमाक्षमा ॥
दैवतं देवतानां च भूतानां भूतसत्तयः ।
तस्य के ह्यगुणा देवि वने वाप्यथवा पुरे ॥"

इत्यादिना श्रीरामस्य परमेश्वरत्वं परब्रह्मत्वमेव बुध्यते ।

शरणागतरक्षणस्य महत्त्वं तथा शरणागतानभयदाने यादृशं सवलं सयुक्तिकं वचनमुक्तं श्रीरामेण तत्तदीयकर्तुमकर्तुमन्यथाकर्तुं सामर्थ्यमेव द्योतयति -

"सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम ।"[19]

श्रीरामः पूर्णब्रह्म परमात्माऽपि सन् मातृ-पितृ-मित्र-भार्या-भ्रातृ-सेवकैः सह मानवोचितमर्यादया व्यवहरति । मनागपि मर्यादां न मर्दयामास सः अतो मर्यादापुरुषोत्तमरूपेण परिज्ञायतेऽधुनापि लोके । तस्मात् संसारवन्धनविमुक्तये परमोपायभूतायाः शरणागतेर्भक्त्या वा स्वरूपं प्रतिपादितं तत्र श्लोके । स च श्लोको वैष्णवसम्प्रदायेषु मोक्षस्य साधनभूताया भक्तेर्मन्त्ररूपेण स्वीकृतो वर्तते । अतः प्रकृतेः परः पुराणपुरुषः, रमापतिः, सर्वव्यापकः, शरणागतप्रियः, श्रीराम एव सर्वतो भावेन भजनीयः । नानीश्वरः कश्चित् सर्वभूतेभ्यः सर्वभूतेभ्योऽभयं दातुमर्हति । हनुमानपि रावणसमक्षं श्रीरामस्य पारमेश्वरीं शक्तिं निःशङ्कमुद्घोषयति –

ब्रह्मा स्वयम्भूश्चतुराननो वा, रुद्रस्त्रिनेत्रस्त्रिपुरान्तको वा ।
इन्द्रो महेन्द्रः सुरनायको वा, स्थातुं न शक्ता युधि राघवस्य ॥[20]

तत् पश्चात् रावणवधमनु विलपन्ती रावणपत्नी मन्दोदरी तु सम्यक्सर्वं रहस्यमेवोद्घाटितवती –

तमसः परमो धाता शङ्खचक्रगदाधरः ।
श्रीवत्सवक्षा नित्यश्रीरजय्य शाश्वतो ध्रुवः ॥

एवं भागवतमहापुराणेऽपि - ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् । .... इत्यादिना रामस्य परब्रह्मता बुध्यते । तस्मात् श्रीरामजपध्यानत एव लक्ष्मणादिना श्रीरामचरित्राणामनुदर्शनं व्यधायि ।

अतो वाल्मीकीयरामायणमहाकाव्यस्य रमणीयताया महत्त्वञ्च प्रतिपादकश्लोकोऽधस्तन सदा स्मर्तव्यः -
"रम्योऽयं भारतो देशो रम्या भारतसंस्कृतिः ।
साकेतनगरी रम्या रम्या रामायणी कथा ॥ ॥अस्तु॥

<u>सन्दर्भग्रन्थाः</u>

१. अध्यात्मरामायणम् । २. आनन्दरामायणम् । ३. श्रीमदभागवतमहापुराणम् । ४. श्रीमद्वाल्मीकीयरामायणम् ।

---

[16] वा.रा., यु.का., श्लोकः १३ ।
[17] अध्यात्मरामायणम्, १।४।१८।
[18] वा.रा., १।२।१५-१६।
[19] वा.रा., यु.का., अष्टादशसर्गः, ३३तमः श्लोकः ।
[20] वा.सु., एकपञ्चाशत्सर्गे श्लोकः ४४।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न मलमासोऽयं पुरुषोत्तमासः

पुष्पप्रकाशज्ञवाली:
उपप्राध्यापक:

मलमासोऽयं द्विविधोऽस्ति अधिमासः क्षयमासश्चेति । तत्र सङ्क्रान्तिरहितः शुक्लादिश्चान्द्रो मासोऽधिमासः कथ्यते । एवमेव सङ्क्रान्तिद्वययुक्तो मासः क्षयमासः कथ्यते । कथितञ्च काठकगृह्यसूत्रे –

यस्मिन् मासे न सङ्क्रान्तिः सङ्क्रान्तिद्वयमेव वा ।
मलमासः स विज्ञेयो मासः स्यात्तु त्रयोदशः ॥इति।

ब्रह्मसिद्धान्तेऽपि–"चान्द्रो मासो ह्यसङ्क्रान्तो मलमासः प्रकीर्तितः।" इति।

सत्यव्रतेनाऽपि–"राशिद्वयं यत्र मासे सङ्क्रमेत दिवाकरः।
नाधिमासो भवदेष मलमासस्तु केवलम् ॥" इति ।

अतः सङ्क्रान्तिरहितो द्विसङ्क्रान्तियुक्तो वा मासो मलमासः कथ्यते । मलत्वं कालाधिक्याद् भवतीति कथितं गृह्यपरिविशिष्टे –

"मलं विदन्ति कालस्य मासं कालविदोऽधिकम् ।"

कालाधिक्यं तु यथा–सौरसंवत्सरः षड्भिर्दिनैः सावनादतिरिच्यते । एकादशभिर्दिनैश्चान्द्रादतिरिच्यते । तथा च चान्द्रसंवत्सरद्वयात् सौरसंवत्सरद्वयं द्वाविंशत्या दिनैरधिकं भवति । तत ऊर्ध्वं सौरं मासाष्टकं चान्द्रान्मासाष्टकात् सार्द्धैः सप्तभिर्दिनैरतिरिच्यते । तथा च मिलित्वा दिनार्द्धन्यूनो मासो भवति । सोऽयमधिको मास इति ज्ञायते । अवशिष्टदिनार्द्धपूरणञ्च यथोक्तकालादूर्ध्वं षोडशभिर्दिनैः सम्पद्यते । दर्शितञ्च विष्णुधर्मोत्तरपुराणे–

"सौरेणाब्दस्तु मानेन यदा भवति भार्गव ।
सावने तु तथा माने दिनषट्कं न पूर्यते ॥
दिनरात्राश्च ते राम प्रोक्ताः सम्वत्सरेण षट् ।
सौरसम्वत्सरस्यान्ते मानेन शशिजेन तु ॥
एकादशातिरिच्यन्ते दिनानि भृगुनन्दन ।
समाद्वये साष्टमासे तस्मान्मासोऽतिरिच्यते ॥
स चाधिमासकः प्रोक्तः काम्यकर्मसु गर्हितः ।" इति ।

एवमेव सिद्धान्ते चाभिहितम् –

"द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा ।
घटिकानां चतुष्केण पतति ह्यधिमासकः ॥" इति ।

अत्र 'द्वात्रिंशद्भि'रितिवचनं मध्यममानमाश्रित्य प्रवृत्तम् । "यस्मिन् मासे" तु स्फुटमानमाश्रित्य प्रवृत्तम् ।

क्षयाख्यो नामको मलमासः कदाचिद् भवति । स द्विसङ्क्रान्तियुक्तो भवति । स च कार्त्तिकमार्गशीर्षपौषेष्वेव त्रिष्वन्यतमो भवति । एवंविधक्षयमासयुक्ते वर्षे क्षयमासात् पूर्वं क्षयमासानन्तरञ्च एकैकोऽधिमासो भवति । उक्तञ्च ज्योतिःसिद्धान्ते– "असङ्क्रान्तमासोऽधिमासः स्फुटः स्यात् ।
द्विसङ्क्रान्तमासः क्षयाख्यः कदाचित् ॥
क्षयः कार्त्तिकादित्रये नान्यदा स्यात् ।
तदा वर्षमध्येऽधिमासद्वयं स्यात् ॥" इति ।

'कुवेदेन्दुवर्षैः क्वचिद् गोकुभिश्च" इति सिद्धान्तशिरोमणिनियमानुसारेण क्षयमासः प्रायश एकचत्वारिंशदुत्तरशततमेऽब्दे समायाति । यदाकदा तु एकोनविंशतितमेऽब्दे चायाति । अत्र कथं द्विसङ्क्रान्तियुक्तस्य क्षयाख्य इत्याकाङ्क्षायां कथ्यते - यदा धनुःस्थे रवौ दर्शपूर्तिस्तदा तस्य मेषादिस्थवचनेन मार्गशीर्षत्वं प्राप्तम् । तथा सति पूर्वोदाहृते द्विसङ्क्रान्तमासे धनुःस्थे खौ दर्शो न समाप्तः किन्तु मकरस्थे । अतः पौषमासत्वं तस्य सम्पन्नम् । तथा च मार्गशीर्षस्य तत्र लुप्तत्वात्तस्य क्षयसंज्ञा युक्ता । अत एवैकमासग्रासित्वादंहसः पापस्य पतिरिति व्युत्पत्त्या स अहंस्पतिसंज्ञयाऽपि व्यवह्रियते ।

मलमासेऽस्मिन् फलकामनया प्रवृत्तं कर्म (काम्यकर्म) वर्जितम् । नित्यनैमित्तिककर्मसु तु न निषेधः । काम्यव्रतयज्ञानामारम्भं समाप्तिञ्च मलमासे नैव कुर्यात् । आरम्भसमाप्त्योर्मध्ये तु आरब्धं काम्यकर्मानुष्ठेयमेव । परन्त्वारब्धस्य सावनमानप्रवृत्तकाम्यकर्मणः समाप्तिर्मलमासेऽपि जायते । अनन्यगतियुक्तं काम्यकर्म मलमासेऽपि अनुष्ठेयमेव । कथितञ्च काठकगृह्ये –

"मलेऽनन्यगतिं कुर्यान्नित्यां नैमित्तिकीं क्रियाम् ।" इति ।

एवमेव गत्यन्तरयुक्तानि नित्यान्यपि मलमासे वर्ज्यानि सन्ति । तदुक्तं काठकगृह्यपरिशिष्टे –

"सोमयागादिकर्माणि नित्यान्यपि मलिम्लुचे ।
षष्ठीष्ट्याग्रयणाधान-चातुर्मास्यादिकान्यपि ॥
महालयाष्टकाश्राद्धोपाकर्माद्यपि कर्म यत् ।
स्पष्टमासविशेषाख्याविहितं वर्जयेन्मले ॥" इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मलमासे कार्याकार्याणि कालादर्शकारश्चाह–

द्वादशाहसपिण्डान्तं कर्म ग्रहणजन्मनोः ।
सीमन्ते पुंसवे श्राद्धं द्वावेतौ जातकर्म च ॥
रोगे शान्तिरलभ्ये च योगे श्राद्धं व्रतानि च ।
प्रायश्चित्तं निमित्तस्य वशात्पूर्वे परत्र वा ॥
अव्दोदकुम्भमन्वादिमहालययुगादिषु ।
श्राद्धं दर्शेष्वहरहः श्राद्धमूनादिमासिकम् ॥
मलिम्लुचान्यमासेषु मृतानां श्राद्धमाव्दिकम् ।
श्राद्धन्तु पूर्वदृष्टेषु तीर्थेष्वेवं युगादिषु ॥
मन्वादिषु च यद्दानं दानं दैनन्दिनञ्च यत् ।
तिलगौभूहिरण्यानां सन्ध्योपासनयोः क्रिया ॥
पर्वहोमश्चाग्रयणं साग्नेरिष्टिश्च पर्व्वणोः ।
नित्याग्निहोत्रहोमश्च देवताऽतिथिपूजनम् ॥
स्नानञ्च स्नानविधिना अभक्ष्यापेयवर्जनम् ।
तर्पणञ्च निमित्तस्य नित्यत्वादुभयत्र च ॥ इति कर्त्तव्यसङ्ग्रहो ज्ञेयः ।
"अनित्यमनिमित्तञ्च दानञ्च महदादिकम् ।
अग्न्याधानाध्वरापूर्व्वतीर्थयात्राऽमरेक्षणम् ॥
देवारामतडागादिप्रतिष्ठा मौञ्जिवन्धनम् ।
आश्रमस्वीकृतिः काम्यवृषोत्सर्गश्च निष्क्रमः ॥
राजाभिषेकः प्रथमश्चूडाकर्म व्रतानि च ।
अन्नप्राशनमारम्भो गृहाणाञ्च प्रवेशनम् ॥
स्नानं विवाहो नामानि तथाऽऽपन्नं महोत्सवम् ।
व्रतारम्भं समाप्तिञ्च काम्यं कर्म च पाप्मनः ॥
प्रायश्चित्तन्तु सर्वस्य मलमासे विवर्जयेत् ।" इति वर्ज्यसङ्ग्रहोऽवगन्तव्यः ।
"उपाकर्मोत्सर्जनञ्च पवित्रदमनार्पणम् ॥
अवरोहश्च हैमन्तसर्पाणां वलिरष्टकाः ।
ईशानस्य वलिर्विष्णोः शयनं परिवर्तनम् ॥
दुर्गेन्द्रस्थापनोत्थाने ध्वजोत्थानञ्च वज्रिणः ।
पूर्वत्र प्रतिषिद्धानि परत्रान्यच्च दैविकम् ॥"

इति मलमासे वर्जिते सति शुद्धमासेऽवश्यमेव कर्त्तव्यत्वसङ्ग्रहः ।

यदा दशहरा युगादितिथयश्च मलमासे भवन्ति तदा मलमास एव कर्त्तव्या इति हेमाद्रौ ऋष्यश्रृङ्गवचनं प्रदर्श्य निर्णयसिन्धौ चोक्तम् – "दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु ।" इति । एवंविधो निन्दितो मलमासः पुरुषोत्तमदेवस्य शरणं गतः । तदा पुरुषोत्तमदेवेन स्वनाम मलमासाय प्रदत्तम् । अस्य मासस्य नाथत्वमपि स्वीकृतम् । तदनन्तरं मासस्यास्य नाम पुरुषोत्तम इति प्रसिद्धम् । पुरुषोत्तमदेवमुद्दिश्य मासेऽस्मिन् पुरुषोत्तमपूजनम्, तन्महात्म्यपठनं श्रवणञ्च महत् फलदायकं भवतीति कथितम् । वृहन्नारदीयपुराणे पुरुषोत्तममासमहात्म्ये एवमेव कालेऽस्मिन् अपूपदानस्य महिमा विशेषरूपेण परिलक्ष्यते, अन्यदानान्यपि पुण्यप्राप्त्यर्थं, पापक्षयार्थं मनोकाङ्क्षापरिपूरणार्थञ्च सफलानि भवन्तीति कथितञ्च । तत्रैव महात्म्ये –

ध्यायेन्नवघनश्यामं द्विभुजं मुरलीधरम् ।
लसत्पीतपटं रम्यं सराधं पुरुषोत्तमम् ॥
ध्यायं ध्यायं नयेन्मासं पूजयन् पुरुषोत्तमम् ।
एवं यः कुरुते भक्त्या स्वाभीष्टं सर्वमाप्नुयात् ॥
गङ्गादिसर्वतीर्थेषु मज्जतो यत्फलं भवेत् ।
तत्फलं शृण्वतस्तस्य माहात्म्यं मुनिसत्तमाः ॥

तस्मान्न मलमासोऽयं परन्तु पुरुषोत्तममास एव कथनीयः ।

सन्दर्भग्रन्थाः

भट्टः, कमलाकरः, निर्णयसिन्धुः (पुनर्मुद्रितसंस्करणम्), दिल्ली : राष्ट्रियसंस्कृतसस्थानम्, स.२००२ ।
मनुः, मनुस्मृतिः, वाराणसी : चौखम्वा संस्कृत सीरीज, वि.सं. २०२६ ।
याज्ञवल्क्यः, याज्ञवल्क्यस्मृतिः, वाराणसी : चौखम्वा संस्कृत सीरीज, वि.सं. २०२४ ।
स्मृतिसन्दर्भः, दिल्ली : नाग प्रकाशक, सन् १९८८ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दस्वरूपसमीक्षा

रामचन्द्रकण्डेलः
उपप्राध्यापकः

अथेदानीं शब्दस्य शाब्दिकसिद्धान्तसम्मतं स्वरूपं समीक्ष्यते । तथाहि वर्णानामुच्चरितप्रध्वसित्वं स्वभावः येन यत्नेनेको वर्णो उच्चार्यत तेनैव विच्छिन्ने तस्मिन्नन्यं प्रयत्नमुपादाय वर्णान्तरमुच्चार्यते इति भाष्योक्त्या[1] वर्णानां समुदायो न सम्भवति तदभावे तद् रूपस्य पदस्य वाक्यस्य च सत्ता न सम्भवति अस्यां परिस्थितौ अर्थनिरुपिता शक्तिः कुत्र तिष्ठेत् । ताञ्च विना पदेन पदार्थस्य वाक्येन वाक्यार्थस्य च वोधः कथं स्यात् ? असम्वद्धस्य वोधेऽतिप्रसङ्गदोषो मुखं व्यादाय आगमिष्यति ।

नच प्रत्येकं वर्णेषु शक्तिस्तिष्ठेदिति वाच्यम्, तथा सति प्रत्येकं वर्णेभ्यः अर्थबोधेन तदावृतिप्रसङ्गात्। अतः शब्दस्य विभुत्वमेकत्वं स्वरूपं स्वीकियते शाब्दिकमूर्धन्यैः । एतत्स्वरूपविशिष्टः शब्दः स्फोटपदेन उद्गृह्यते उक्तञ्च भगवता भाष्यकृता- येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः[2]। अत्रोच्चारितेनेत्यस्य उच्चारितप्रकाशितेनेत्यर्थः[3] । एवञ्च ध्वनिः उच्चारितो भवति, शब्दस्तु तेनाभिव्यज्यते । अत्र प्रदीपकारः वैयाकरणाः वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य च वाचकत्वमिच्छन्ति, वर्णानां प्रत्येकं वाचित्वे द्वितीयादिवर्णोच्चारणानामानर्थक्यप्रसङ्गात् । आनर्थक्ये च प्रत्येकमुत्पत्तिपक्षे यौगपद्येन उत्पत्त्यभावात् । अभिव्यक्तिपक्षेऽपि क्रमेणैवाभिव्यक्त्या समुदायाभावात् <u>एकस्मृत्युपारुदानाञ्च</u> वाचकत्वे सरो, रसः इत्यादौ अर्थप्रतिपत्यविशेषप्रसङ्गात् तद्व्यतिरिक्तः स्फोटो नादाभिव्यङ्ग्यः वाचकः विस्तरेण वाक्यपदीये व्यवस्थापितः इति व्याचष्टे[4] ।

अत्रोद्योतकारः - ननु येन क्रमेणानुभूतवर्णाः तेनैव क्रमेण एकस्मृत्युपारुदानां वाचकत्वेन न अर्थप्रतीत्यविशेषप्रसङ्गः अन्यथा त्वयापि वर्णानां स्फोट व्यञ्जकत्वाभ्युयगमात् कथं पूर्वोक्त निस्तारस्तवापि इत्यत आह - विस्तरेणेति[5]। इदमेकंपदमिदमेकं वाक्यमिति प्रत्यये स्फोटशक्ते तदैक्ये च प्रमाणम् । अनुभवक्रमेणैव स्मरणमित्यर्थे दृढप्रमाणस्याभावाच्च क्रमेणानुभूतानां व्युत्क्रमेणापि स्मरणदर्शनात् ।

मम तु यथा - पटे नानारञ्जक द्रव्याश्रितो नानावर्णोपरागः क्रमेण, तथा सत्येकस्मिन्नेव तस्मिन्नुच्चारणक्रमेण क्रमवान् एव तद् तद् वर्णास्वरूपानुरागः । स च स्थिरः तस्य च मनसा ग्रहणमिति न दोषः । अथ येन इत्येकवचनेन विषाणिनामिति वहुवचनेन चानेकोच्चारणविषयस्य गौः इत्यस्यैकत्वं सूचितम्, भेदप्रत्ययस्तु औपाधिक इति[6] अनेन ग्रन्थत्रितयेनान्यत्र निर्दिष्टेन भाष्यादि[7] प्रमाणेन च शाब्दिकानां सिद्धान्तभूतं स्फोटात्मकं शब्दस्य मुख्यं स्वरूपं स्थितम् । तत्र स्फुट्यते ध्वनिनाभिव्यज्यते इति कर्मव्युत्पत्या, स्फुटति प्रकाशतेऽनेन इति करणव्युत्पत्या, स्फुट-विकसने, इत्यस्माद् धातोः घञ्प्रत्यये सति स्फोट शब्दो निष्पद्यते । अतश्च ध्वनिव्यङ्गत्वे सत्यर्थविषयकप्रमाकरणत्वं स्फोटस्य लक्षणं पर्यवसितं भवति । येनोच्चारितेन इतिभाष्येण इदमेव लक्षणं सूचितमस्ति । अस्मिन् लक्षणे सत्यन्तदलानुपादाने वह्नयनुमितिकरणे धूमादावपि स्फोटलक्षम् अतिप्रसज्येत् । विशेष्यदलानुपादाने ध्वनिव्यङ्ग्ये ध्वनौ एव अतिव्याप्तिः स्यात् । यतश्च ध्वनिव्यङ्ग्यः इत्यस्य ध्वनिजन्यज्ञानविषयः इत्यर्थस्तदा ध्वनिजन्यप्रत्यक्षात्मज्ञानविषयत्वस्य ध्वनावेव सत्वम् लौकिकसन्निकर्षजन्यप्रत्यक्षं प्रति तादात्म्येन विषयस्य हेतुत्वात् एवञ्च दलद्वयघटितं लक्षणं स्वीक्रियते।

शब्दार्थं प्रतिपद्यामहे इत्यनुभवसिद्धस्यात्रार्थ विषयकवोधजनकत्वस्य शक्त्याश्रयत्वस्य चान्यथानुपपत्या एको नित्यः घटादिरूपः स्फोटः कल्प्यते । अन्यथोच्चरितप्रध्वसितत्वात् क्षणिकानां वर्णानां समुदायाभावेन चार्थवोधो न स्यात् । अथ च इदमेकं पदम् इदमेकंवाक्यम् इति एकत्वविषयकप्रत्यक्षेण तदेव इदं पदम्, तदेव इदं वाक्यम् इति प्रत्यभिज्ञया च नित्यः स्फोटात्मा शब्दः अवश्यं कल्पनीयः । नापि इयं प्रतीतिः वर्णमालालम्वनेनेति वक्तुं शक्यते । पुष्पेषु सूत्रं विना माला प्रतीत्यभावात् परस्परविलक्षणवर्णमालायाम् अभिन्ननिमित्तमन्तरा पदप्रतीत्यभावस्यैव प्रसङ्गात् तस्मात्पदस्फोटरूप सूत्रेणैव वर्णमाला युज्यते वक्तुं नान्यथा । यद्यपि वर्णानां वाचकत्वे यो दोषः नैयायिकमते उद्भावितः स एव दोषः व्यञ्जकत्वपक्षेऽपि तार्किकैरुद्भावयितुं शक्यते तथापि प्रथमोध्वनिः स्फोटं स्फुटं व्यनक्ति । द्वितीयश्च स्फुटम् । तृतीयश्च स्फुटतरम् । चतुर्थश्च स्फुटतमम् । एवं प्रत्येकं ध्वनेः एकस्यैव स्फोटस्य तरतमतोः व्यञ्जकत्वेन नास्ति दोषलेषशङ्कावकाशः । उक्तञ्च वाक्यपदीये-

प्रत्येकं व्यञ्जका वर्णाः भिन्ना वाक्यवदेषु ये ।
तेषामत्यन्तभेदेऽपि संकीर्णा इव शक्तयः[8] ॥

अस्मिन् स्फोटसिद्धान्ते भगवतः पाणिनेरपि पर्याप्ता सम्मतिः दृश्यते । तथाहि- "युष्मदस्मद्भ्यां ङसोऽश्"[9] इति सूत्रेऽशिशित्करणेन ज्ञाप्यते । सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः ।
एकादेशविकारे हि नित्यत्वं नोपपद्यते ।[10]

---

[1] म.भा. १।४।१०९
[2] म.भा. प्र. १।१।१ (पस्पशाह्निके)
[3] म.भा. प्र. १।१।१
[4] म. भा. प्र. नवाह्निक १।१।१
[5] म. भा. उद्योत नवाह्निक १।१।१
[6] म. भा. उद्योत नवाह्निक १।१।१
[7] म.भा. प्र. ३।३।२८ अथवा उभयतः स्फोऽमात्रं निर्दिश्यते र श्रुतेर्ल श्रुतिर्भवति । म.भा. प्र.उ. ऐऔच् सूत्रे ।
[8] वाक्यपदीयम् १।८८
[9] पाणिनीयसूत्रम् ७।१।२७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनया परिभाषया शब्दस्य नित्यत्वसमर्थनेन स्फोटसिद्धान्तः पूर्णतया समर्थितः । अथ च- "अवङ् स्फोटायनस्य"[11] । इति सूत्रे स्फोटायनस्मृत्या स्फोटवादः सूत्रकारसम्मतिविषयः इत्यपि प्रतिभाति । पुनश्च अर्थवदधातु[12] रितिसूत्रेणार्थविषयकबोधजनकत्वप्रातिपदिकसंज्ञाविधानेनापि सूच्यते । यत् शब्दाः अर्थनिरुपितशक्तिमन्तः अर्थविषयकबोधजनकत्वात् । अत्रोऽपि शक्त्याश्रयत्वान्यथानुपपत्त्या स्फोटवादः समर्थितः ।

अथ च स्फोटवादे कात्यायनः-

"सिद्धेशब्दार्थसम्बन्धे"[13] इति वार्तिके शब्दस्य नित्यत्वं प्रदर्शयता वार्तिककारेणापि स्फोटवादः स्वीकृत एव । एवमेव "स्वंरूपम"[14] इति सूत्रेऽपि शब्देन अर्थगतेः अर्थस्यासम्भवात् तद्वाचिनः संज्ञाप्रतिषेधार्थं वचनम्, नवा शब्दपूर्वकोह्यर्थे सम्प्रत्ययः तस्मादर्थे निवृत्तिः[15] इति वार्तिकाभ्यां स्फोटतत्त्वमेव समर्थ्यते अन्यथा स्फोटातिरिक्तस्य शाब्दस्यभिप्रेयत्वे तन्नार्थबोधकत्वासम्भवेन उक्तवार्तिकयोरुत्थानमेव न स्यात् ।

स्फोटविषये बहूनामाचार्याणां संवादाः

व्याप्तिमत्वात्तु शब्दस्य इति वाक्येन शब्दस्य व्यापकत्वं निरूपयता याष्काचार्येण स्फोटवादः सुष्टुसमर्थितः । अन्यथा शब्दस्य ध्वनिरूपत्वे तद् व्यापकत्वं कथं स्यात् । एवमेव वार्ताक्षः औदुम्बरायणः इत्यभिधाना आचार्यद्वयी अपि स्फोटवादं सम्यक् समर्थितवती । उक्तञ्च-

वाक्यस्य बुद्धौनित्यत्वमर्थयोगस्य लौकिकम्

दृष्टवा चतुष्टयं नास्तीति वार्ताक्षौदुम्बुरायणौ[16] ॥ एवं योगसूत्रभाष्यस्य विवरणकृतोऽपि स्फोटवादं समर्थयन्ते तद्यथा - शिविकोद्वहनादिरनेकसाध्यः एकस्यापि वैकल्ये न सम्पद्यते । तथैवार्थस्य प्रतिपादनमपि अनेकसाध्यत्वादन्यतमेन वर्णानामशक्यमिति पदस्यैव व्यञ्जितारो वर्णाः इतिस्थितम्[17] ।

स्फोटस्य विभुत्वं नित्यत्वमेवकत्वञ्च-

अत्राह- भगवान् भाष्यकारः एक एव इन्द्रशब्दः क्रतुशतौ प्रादुर्भूतो युगपत् सर्वयागेष्वङ्गं भवति[18] । नहि विभुत्वं विना एकस्येन्द्र शब्दस्यानेकेषु यागेषु प्रादुर्भावः सम्भवति नित्यत्वं तु विभुत्वाधीनमेव । विभुत्वस्य नित्यत्वव्याप्यत्वात् । संग्रहे तावत्कार्य प्रतिद्वन्द्विभावात् मन्यामहे नित्यपर्यायवाचिनो ग्रहणमिति । इहापि तदेव[19] । अनपायोपजनविकारिभिर्वर्णैर्भवितव्यम्, कूटस्थैरविचलिभिश्च[20] ।

उक्तविषये नागोजिभट्टाः-

अयं ध्वनिर्व्यङ्ग्यो वाचकः शब्दः तत्तत्प्राणिहृदयदेशावच्छिन्नाकाशदेशस्य विराटपुरुषस्यापि हृदयरूपवाह्याकाशदेशस्थश्च । स चैकोलाघवात् व्याप्तिमत्त्वाद् विभुरपि यथैव एकस्मिन् श्वेतद्रव्ये रूपं व्यापकं सर्वावयवावच्छेदेन सम्बद्धम् तथा अयमपि आकाशदेशस्थः तथा वक्तुं शक्य इति विभुत्वं स्पष्टं प्रतिभाति[21] । एवमेव सोऽयं गकारो यः पूर्वदिने श्रुतः इत्येवं प्रत्यभिज्ञया तावत्कालं स्थिरत्वे सिद्धे नित्यत्वं सिध्यत्येव इदानीं वर्णाः उच्चारिताः इत्यादिव्यवहारात् वर्णाश्रयकालस्येदं शब्देनाभिलप्यमानस्य प्रत्यक्षविषयतया अनुभूयमानस्य वर्णानामतिन्द्रियत्वरूपक्षणिकत्वपक्षे सम्भव एव नास्ति । अस्मिन् नित्यत्वपक्षे व्यवहितोत्तरत्वं च उत्पत्त्यवच्छिन्नस्वज्ञानाधिकरणकालोत्पत्तिकज्ञानविषयत्वं यथा अत्यन्तरागवतः कामुकपुरुषस्य कामिनीसाक्षात्कारकाले ज्ञानधाराकल्पना गौरवमिति ज्ञानानामेकत्वम् इति तद्वदत्रापि ज्ञानानामेकत्वम् तथैव एतद् विषयेऽज्ञानानां स्थैर्यमेव मन्तव्यम् लाघवात्[22], एवमेव पदवाक्यस्फोटयोरपि स्थितिः एकत्वं चात्र एकजातीयोपाधिविषयत्वम् । भिन्नोपाधिविषये तु भिन्नत्वमेव स्यात् यथा घटः इत्यत्र घकारादिषु ध्वनिचतुष्टयाभिव्यक्तः सर्वत्रैव सर्वेषां कृते एक एव । एवमेव पदस्फोटादीनां व्यवस्था न तु सर्वेषां घटपटादयः सर्वेऽपि स्फोटाः एकत्वविशिष्टाः उपाधिभेदेन तेषां भेदाः उपाधिराहित्ते मूलावस्थायां पराख्यायां सर्वेषां स्फोटानां यदेकत्वं सञ्चकास्ति तत्तु पारमर्थिकमिति तु अन्यत् ।

स्फोटाख्यशब्दस्य द्रव्यत्वगुणत्वान्यतरसमीक्षा-

शब्दस्य द्रव्यत्वं गुणत्वं वा व्याकरणदृष्ट्या समीक्ष्यते । तत्रायन्निष्कर्षः यत् पक्षद्वयस्यापि समन्वयः व्याकरणशास्त्रे दृश्यते, तथाहिभाष्यकृता "अतत् स्थैश्च गुणैः समासो वाच्यः"[23] इति वार्तिके नदीघोषः पटहशब्दः इत्युदाहृतम्, गुणपदेन घोषस्य शब्दस्य च ग्रहणं कृतवता शब्दस्य गुणत्वं स्वीकृतम् । "आकाशदेशः शब्दः" इति भाष्योक्त्या[24] शब्दगुणकमाकाशम्, तच्चैकं

---

[10] म.भा. ७।१।२७
[11] पा.सू.६।१।१२३
[12] पा.सू. १।२।४५
[13] म.भा.१।१।१
[14] म.भा.१।१।६७
[15] म.भा.१।१।६७
[16] वा.प.२।३४।२
[17] यो.सू.भा.विवरण पृ.२८-३७ यावत्
[18] म.भा.१।२।६४
[19] म.भा.१।१।१
[20] म.भा.१।१।४५
[21] म.भा.१।२।६४
[22] परमलघुमञ्जूषा १८०
[23] म.भा.२।२।२८
[24] म.भा. अइउण्सूत्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विभुः नित्यञ्च इति न्यायशास्त्रवचनेन[25] च शब्दस्य आकाशाश्रित तया गुणत्वं स्वीकृतम् । तत्र प्रथमः पक्षः ध्वनिरूपशब्दविषयकः । नद्यां पटहादौ च ध्वनेरेव सम्भवात् । अपरस्तु उभयविधशब्द विषयकः आकाशेद्वयोरपि सम्भवात् । मञ्जूषाकृता तु तारत्वादिगुणाश्रयतयाशब्दस्य द्रव्यत्वं संकेतितम् गुणाश्रयस्य द्रव्यत्वात्[26] । अथ च-

सत्वेनिविशतेऽपैति पृथकजातिषु दृश्यते ।
आधेयश्चाक्रियाजश्च सोऽसत्वप्रकृतिर्गुण[27]: ॥

इत्येतल्लक्षणलक्षितमपि गुणत्वं शब्दे तिष्ठत्येव । ध्वनिरूपस्य तदुपस्थितस्फोटरूपस्य वा आकाशरूपे द्रव्ये निविशमानत्वात्, क्रियाजत्वाभावाच्च । "लिङ्गसंख्यान्वितं द्रव्यम" इति लक्षणमपि शब्दे समन्वितं सत् द्रव्यत्वं लक्षयति । किञ्च वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते इति वाक्यपदीये वायोरणूनां परिणामः शब्दः इति पक्षे ध्वनिरूप शब्दस्य द्रव्यत्वं स्फुटमस्ति, ज्ञानस्य परिणामः शब्द इति पक्षेऽपि द्रव्यत्वमेव, गुणे परिणामा सम्भवात् । दीक्षितः शब्दकौस्तुभे स्फोटरूपशब्दस्य द्रव्यत्वं व्याचष्टे । तथाहि सर्वकारणानामपि कारणभूतः अनादिनिधनो विभुः । प्रपञ्चात्मकविवर्तस्य उपादानभूतः गुणक्रियादिशून्यत्वात् स्फोटपदाभिधेयपदार्थः न द्रव्यरूपः अपितु भावात्मैव केवलं वक्तुं शक्यते, एवञ्च भावरूपतायां न गुणः नापि विशेषतो द्रव्यमेव । अपितु सामान्यतो द्रव्यत्वं वक्तुं शक्यते ।

शब्दब्रह्मणाश्चिद्रूपविमर्शः-

चत्वारिश्रृङ्गा त्रयो अस्य पादाः इति मन्त्रं व्याचक्षणेन भगवता पतञ्जलिना महान्देवः शब्दस्तेन नः साम्यं स्यादित्यध्येयं व्याकरणमिति निरुपितम् । तत एवोद्द्योतकृता महान् परब्रह्मरूपः देवोऽन्तर्यामि रूपः साम्यं सायुज्यमितिव्याख्याकृता । तत्र शब्दस्य परब्रह्मरूपत्वनिरूपणेन चिद्रूपता, आनन्दरूपता च उक्तप्रथा एव, अतएव तेन सायुज्य कथनं संगच्छते, अन्यथा चेतनानन्दभिन्नेन सायुज्यताभिलाषः कथं स्यात्, किञ्च तस्य चात्यन्तविचारे ब्रह्मातिरेके मानानुपलम्भेन तत्तदुपाधिभिन्नचितः एव बोधकतया तैर्ग्रहात् इति उद्द्योत वाक्येन[28] । घटादिध्वन्युपहितस्य चैतन्यस्यैव स्फोटशब्देन व्यवहारो लभ्यते । लघुमञ्जूषायान्तु शक्त्याश्रयः कः इति विशदयता श्रीनागेशभट्टेन निरुपितम् मध्यमायामेव यो नादांशः तस्यैव स्फोटात्मनो वाचकत्वेनाक्षतिः इति[29] । अत्र चिदचिद् मिश्रोंऽशोनादः इति । पूर्व उक्ततया न अनेन सह उद्द्योतग्रन्थस्य विरोधः । अचिदंशस्य उपधेयत्वेन अत्र स्वीकारात् । अनुपहितचित्तत्वं तु पराख्यशब्देन व्यपदिश्यते । उक्तं च वाक्यपदीये -

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥

अत्र श्लोके पूर्वार्धेन अनुपहितस्वरूपस्य चिद्रूपशब्दब्रह्मणः निरूपणम् उत्तरार्धेन तु तस्य उपहितस्वरूपस्य वर्णनम् । स्वातन्त्रयाख्य काल शक्त्यैव उपधानेनैव ।

ध्वनिरूपशब्दस्य शाब्दिकदृष्ट्या निरूपणम्-

अथवा प्रतीतपदार्थो लोके ध्वनि शब्द इत्युच्यते[30] । इति भाष्योक्त्या ध्वनिरूपस्य अपि शब्दस्य निर्देशो लभ्यते । अयं ध्वनिः स्फोटस्य व्यञ्जकः इत्यपि निर्दिष्टम् । तथा च "तपरस्तत्कालस्य"[31] इति सूत्रे ध्वनिः शब्दगुण इति व्याचक्षणेन प्रदीपकारेण गुणपदस्य व्यञ्जकत्वेन उपकारकः इत्यर्थः स्वीकृतः अयमेव वैखरीशब्देन मध्यमाशब्देन च व्यवहृतोऽस्ति । अनयोः किं स्वरूपं कश्च विशेषः इत्यकाङ्क्षायामुच्यते ।

शाब्दिकदृष्ट्या वाक्चतुष्टयनिरूपणम्-

व्याकरणशास्त्रे वाक्चतुष्टयं स्वीकृतम् तत्र सर्वप्राणिनां मूलाधारस्था तत्रत्य संस्कृतपवनेनाभिव्यञ्जमाना स्पन्दशून्याशब्दब्रह्मस्वरूपा अनादिनिधना या वाक् सा परा, अनुपहित चितिरेवेयम् स्वरूपज्योतिरेवान्तः "परवागनपायिनीति" निर्देशात् । ततो नाभिपर्यन्तमागच्छता तेन वायुनाऽभिव्यञ्जमाना मनोगोचरीभूता वाक् पश्यन्ती इति । एतद्वयमपि वाग् ब्रह्मयोगिनां समाधौ निर्विकल्पसविकल्पज्ञानविषय इति कथ्यते । ततः हृदयं यावत् आगच्छता वायुनाऽभिव्यञ्जमाना तत्तदर्थवाचक स्फोटाभिव्यञ्जिका स्वश्रवणमात्रगोचरीभूता परश्रोत्रेणाग्राह्या या वाक् सा मध्यमा इत्युच्यते । ततश्च मुखपर्यन्तमागच्छता तेन वायुना मूर्धानमाहत्य परावृत्य च तत्तत् स्थानेष्वभिव्यञ्जमान परश्रोत्रेणापि ग्राह्या या वाक् सा वैखरी इत्यभिधीयते । एवं प्रकारेण मध्यमावैखर्योर्विशेष उक्तः । अथ स्फोटव्यञ्जकतोभयोरन्यततरस्य वेत्याकाङ्क्षयामुच्यते । उभयोर्व्यञ्जकतेति भाष्यकृत् सम्मतिः, उक्तञ्च श्रोत्रोपलब्धिर्वुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलितः आकाशदेशः शब्दः इति । तत्र प्रयोगेण इति प्रतीके (प्रयुज्यत्) इति प्रयोगो ध्वनिः । तेनाभिव्यक्त इत्यर्थः स्वीकृतः प्रदीपकृता । तत्र वैखरीध्वनेरेव सङ्केतः मध्यमायाः प्रयुज्यमानत्वाभावात् वद्धिनिर्ग्राह्य इत्यनेन मध्यमायाः व्यञ्जकत्वम् लभ्यते भर्तृहरिकैयटदीक्षितादयोऽप्येवमेव स्वीकुर्वन्ति । यत्तु कौण्डभट्टेन भूषणसारे वायुसंयोगस्य व्यञ्जकता निर्दिष्टा, सा हि ध्वनिनाप्यन्यथा सिद्धत्वात्[32] अनुपादेयैव । तथा च परमलघुमञ्जूषाकृता नागोजिभट्टेन मध्यमा ध्वनेरेव व्यञ्जकत्वं निर्दिष्टम् वैखरीनादस्य भेर्यादि नादवन्तिरर्थकत्वं प्रतिपादितम् तत्र प्रमाणभूता कारिका चोपनिवद्धा अग्रे निरुपिता ।

---

[25] तर्कसङ्ग्रहः
[26] ल.म.रत्नप्रभा १८७
[27] म.भा. पृ. १४४
[28] म.भा.उ. १११ पस्पशाह्निकम्
[29] वै.सि.ल.म. शक्त्यानिरूपणम्
[30] म.भा.उ. १११ पस्पशाह्निकम्
[31] पा.सू. १११७०
[32] वै.भू. स्फोटनिरूपणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वैखर्या हि कृतो नादः परश्रवणगोचरः ।
मध्यमाया कृतो नादः स्फोटव्यञ्जक उच्यते ॥

इत्युक्त्या वक्तुः कृते चेत् सत्यम् । श्रोतॄणां कृते वैखरी ध्वनिरेव व्यञ्जकः । तत्रैव ग्रन्थे नागेशभट्टेनोक्तम् प्रयोगेणाभिज्वलितः इति भाष्यमुद्धरता तस्य हि प्रयोगेण वैखरीरूपेणाभिज्वलित स्वरूपरुषितः कृत[33] इत्यर्थः । उपर्युक्त कारिकायां परश्रवणगोचर इत्यत्र परेषां श्रोतॄणां श्रवणगोचरः सन् स्फोटः व्यञ्जको भवति । कृतः इत्यस्य वक्त्रा उच्चारितः इत्यर्थः । वैखर्या इति मध्यमया इति च अभेदे तृतीया प्रकृत्यादित्वात् । एवञ्च वैखरीरूपो मध्यमारूपश्च नादो ध्वनिरिति व्याख्यानेन सर्व दृष्टतात्पर्यं सेद्धुमर्हतीति ।

प्राकृतवैकृतध्वनिभेदेन वैखरीस्वरूपद्वयम्-

वाक्यपदीये श्रीहरिणा वैखरी ध्वनेः भेदद्वयम् स्वीकृतम् प्राकृतवैकृतभेदेन ।
प्राकृतस्य ध्वनेः कालः शव्दस्येत्युपचर्यते ।
शव्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः[34] ॥
संग्रहेऽपि व्याडिना श्लोकान्तरेण वैखर्याः विभागद्वयम् स्वीकृतम्-
शव्दस्य ग्रहणे हेतुः प्राकृतोध्वनिरिष्यते ।
स्थितिभेदे निमित्तत्वं वैकृत प्रतिपद्यते ॥[35]

एवञ्च स्फोटस्याभिव्यञ्जने प्राकृतोध्वनिरूपयुज्यते, स्वीयमात्राकालादिना च नित्यमपि स्फोटं परिछिनत्ति । स्फोटस्याभिव्यक्त्युत्तरं द्रुतादिवृत्तिभेदे वैकृतो ध्वनिनिमितं भवति । द्रुतमध्यमविलम्वितवृत्तीनां लक्षणानि तपरस्तत्कालस्येति सूत्रीयभाष्यव्याख्यानावसरे प्रदीपे[36] निर्दिष्टानि सन्ति ।

आचार्य पाणिनिसम्मतं वैखरीस्वरूपम्-

आचार्य पाणिनिना वैखरीध्वनिविषये शिक्षायामुक्तम्-
आत्मा वुद्ध्या समेत्यार्थान् मनोयुङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥
सोदीर्णोमूर्धन्यभिहतो वाक्यमापद्य मारुतः ।
वर्णान् जनयते..........................इति[37] ॥

यद्यपि अनयो उक्त्या स्वरसतो वायोर्निमित्तकारणतावाध्यते । तत्र च मारुतः पराद्याख्यातमन्तः स्थितं शव्दं वर्णत्वेनाभिव्यनक्ति इत्यर्थं सुस्पष्टं प्रतीयते । तथापि प्राणादिरूपस्य वायोः परिणामभूतोऽयं ध्वनिः-

सूत्रकारस्येयमपि सम्मतिरिति केचन स्वीकुर्वन्ति[38] । उक्तं शिक्षायां व्याख्यानं चोपस्थापयन्ति मारुत एव नाभेरुर्ध्वमुद्यन् मूर्धन्यभिहत आत्मानं तत्वेन (शव्देन) अभिव्यनक्ति[39] इत्येवं प्रकारेण । उभयोः वैयाकरणसिद्धान्तः ।

ज्ञानस्य परिणामः शव्द इति महाभाष्यममतम् -

महाभाष्यकृता वैखरीध्वनिर्ज्ञानस्य परिणामः इति स्थरीकृतम्, अथ च "आख्यातोपयोगे" इति सूत्रं विवेचितुमुक्तवान्, अयमपि योगः शक्योऽवक्तुम्, कथमुपाध्यायादधीते इति ? अपक्रामति, यद्यपक्रामति, किं नात्यन्तायापक्रामति ? सन्तत्वात् । अथवा ज्योतिर्वज्ज्ञानानि भवन्ति[40] इति ।

अस्यायमाशयः-उपाध्यायादपक्रमच्छन्दजातीयमधीयान उपादत्ते इत्यर्थद्योतके उपाध्यायादधीते इत्यत्र वापकमणजन्यविश्लेषाश्रयत्वादुपसर्गेण ध्रुवमपाये[41] इत्यनेनापादानत्वं संसाध्यशव्दानामपक्रमणं न युक्तम् यथा फलं वृक्षादपक्रान्तं पुनर्वृक्षे न भवति, एवं प्रकारेण शव्देऽपि प्रसङ्ग इत्याशङ्क्योक्तं संततत्वादिति । शव्दस्य व्यञ्जकाः ध्वनयः उपाध्यायेनोत्पद्यमाना अपि सादृश्यासत्वेनाध्वसीयमानाः । श्रोतुः पुनः पुनः श्रोतृदेशे गच्छन्तो व्यक्तिस्फोटरूपं जातिस्फोटरूपं वा शव्दमभिव्यञ्जयन्ति इति भावः । अथवा यथा ज्वालारूपं ज्योतिः नैरन्तर्येणोत्पद्यमानं सादृश्यमूलकाभेदाध्यवसायेन विषयो क्रियमाणं सन्ततमित्युच्यते- तथैव- उपाध्यायज्ञानानि भिन्नानि भिन्नशव्दरूपतामापद्यमानानि सन्ततानि इत्युच्यन्ते इति तत्त्वम् । ज्ञानस्य शव्दरूपेण परिणामः इति दर्शनमत्र भाष्यकारस्य इति प्रदीपकृताप्युक्तम[42]।

---

[33] परमलघुमञ्जूषा पृ.१२
[34] वा.प.१।७६-७७
[35] वा.प. वृषटीका कारिका १।७६
[36] म.भा. १।१।६९
[37] पणिनीयशिक्षा ६।९
[38] ल.म. शक्त्याश्रय । पृ.१५६
[39] म.भा. १।४।२९
[40] म.भा. १।४।२९
[41] पा.सू.
[42] म.भा. १।४।२९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उक्तमतद्वये विवर्तविपरिणामद्वारिका समीक्षा-

वायुर्ज्ञानस्य वा परिणामः शब्दः इति मतद्वये द्वितीयमेवमतम् शाब्दिकानां सिद्धान्तभूतम । यथोत्तरं मुनीनां प्रामाण्यमिति परिभाषणात् । मारुतो वर्णाञ्जनयन्ति इति पाणिनीयशिक्षायाः सम्मेतया मद्यपि वायोः परिणामः शब्दः इति अर्थात् तथापि मतद्वयस्य न विरोधः अपितु समन्वय एव । स च इत्थं बोध्यः, यथा कस्यचन वस्त्रस्य कौशेयोः कार्यासाः विजातीयाः द्विधास्तन्तवः उपादानं भवन्ति, यथा च एकस्यैवघटस्य राजतं कपालं लौहकपालं च विजातीय उपादानद्वयं भवति, तथैवात्रापि एकस्मिन्नेव स्थूलशब्दे वायुः ज्ञानञ्च इति विजातीय उपादानाद्वयम् भवितुमर्हति । अथवा यथा लूतायाश्चैतन्यं निमित्तकारणं भवति, तथैव वायुः उपदानकारणम् ज्ञानन्तु निमित्तकारणमित्येवं रूपेण मतद्वयस्य समुन्वयो विधेयः ज्ञानस्य परिणामः शब्दः इति व्यवहारस्तु लक्षणया उपपादनीयः, परिणामशब्दस्य कार्यपरत्वात् । तत्र ज्ञानस्य परिणामकोटिः विशदं विचार्यते ।

ज्ञानस्य परिणामः शब्दः

अत्र वाक्यपदीयम् अथेदमान्तरं ज्ञानं सूक्ष्मवागात्मना स्थितं व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते[४३] । अत्र अन्तःकरणवृत्ति विशेषरूपं ज्ञानं सूक्ष्मशब्दराशिना व्याप्ततया सूक्ष्मशब्दशब्दस्वरूपमेव गृह्यते । अयं च सूक्ष्मः शब्दः पश्यन्तीरूपो बोध्यः तस्यैव स्थूलशब्दरूपेण परिणामः सम्भवति, विवर्तते इति पदन्तु विपरिणमति इत्यर्थकम् । अनयारीत्या-

शब्दंस्यपरिणामोऽयमित्योम्नाय विदो विदुः ।
छन्दोभ्य एव प्रथमेतद् विश्वं व्यवर्तत[४४] ॥

इत्यनेनापि एकवाक्यता सिध्यति, पराख्यशब्दब्रह्मणस्तु विवर्तभूतमेव सर्वं जगत् इत्यपि न विस्मर्तव्यम् तदेव उक्तम्- छन्दोभ्य एव प्रथमेतद् विश्वं व्यवर्तत इति । अत्र छन्दोभ्य इति ल्यब्लोपे पञ्चमी छन्दास्युपक्रम्यैव इत्यर्थः । अयं भावः पराख्पशब्दब्रह्मणः पश्यन्ती वाक् शब्दकोटौ परमेश्वरचार्थ कोटो (सृष्टिकर्ता) इत्यञ्च पश्यन्ती वाक् छन्दोरूपैव योगिनां सविकल्पक समाधौ प्रकाशपथमानेतु शक्या ।

पुनश्च- अनादि निधन ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवार्ततेऽर्थ भावेन प्रकृया जगतो यतः ॥[४५]

अत्रैवटीकाकारः हरिवृषभः-अतात्त्विकोऽन्यथाभावो विवर्तो यथा -रज्जौ सर्पभ्रमे रज्वाः सर्पाकारो विवर्तः, शक्तिकायाः रजतरूपो विवर्तः । परिणामस्तु तात्त्विकान्यथाभावः, यथा- मृत्तिकायाः घटाकारः परिणामः, दुग्धस्य च दधिरूपः परिणामः,एवञ्च-विवर्तविपरिणामयोः एकविधमेव शब्दतत्त्वं मूलमिति कथनं परास्तम् । अथ च - वायोः शब्दस्य चोपादानत्वं यदुक्तन्तद् श्रुत्यापि समर्थितमस्ति । तथाहि 'स भूरिति व्याहरत्' 'ततो भुवमसृजत्'इत्यादिना श्रुतिसम्मतः शब्दोपादानत्ववादः । तस्माद् एतस्मादात्मनः आकाशः सम्भूतः इत्यादि वाक्येनार्थोपादनत्ववादोऽपि श्रुत्यभिमतः । किञ्च वायोः परिणामः शब्दः इति प्रतिपादेन ध्वनौ गतिमत्वाभिव्यञ्जते, सा चाद्यत्वे ध्वन्याकर्षकयन्त्रद्वारा ध्वनिश्रवणे साक्षादनुभूयते लोके ।

वैखरीशब्दविषयकं मतान्तरं तत्समीक्षा-

अत्र प्रकरणे प्राकृतवैकृतभेदेन यथा द्विविधो वैखरीशब्दः कथितः तथैव व्यक्ताव्यक्तरूपेणापि तस्य द्वैविध्यं बोध्यम्, तत्र व्यक्तः ककारगकाररूपः । अव्यक्तो वीणावेणुपटहशङ्ख्यादिध्वनिरूपः । तत्र द्विविधोऽपि परमाणु परिणामरूपः इति- जैनदर्शनाचार्यः

अयमाशयः-शब्दस्य द्वैविध्यं सामान्यरूपेण विशेषरूपेण च । तत्र सर्वासु शब्दव्यक्तिषु अनुस्यूतं शब्दत्वं सामान्यरूपं । शाड्ख्य, शार्ङ्गतीव्रमन्दोदात्तानुदत्तादिविशेषभेदात् अनेक प्रकारकं विशेषरूपं तत्र शब्दस्य सामान्यविशेषोभयात्मकत्वं परमाणुपरिणामत्वे सत्येव सम्भवति, तथाहि शब्दः पौद्गलिकः इन्द्रियार्थित्वात् रूपादिवत् इति पौद्गलिकत्वेन हेतुना सामान्यविशेषात्मकत्वं शब्दस्य पर्यवस्यति । न चातिनिविड्प्रदेशे प्रदेशनिर्गमयोरप्रतिहतत्वात् पौद्गलिकत्वाभावः साध्यते, गन्धद्रव्येन व्यभिचारात्, तस्य हेतोरनेकान्तिरुत्वात् । कस्तूरिकादिगन्धद्रव्यं हि -पिहितद्वारापवरकस्यान्तर्विशति, वहिश्च निर्याति, न च पौद्गलिकम्[४६] इति यद्यपि वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते[४७] इति । वाक्येन शब्दस्याणविकत्वं व्याकरणशास्त्रे निरुपितमस्ति तथापि-तेऽणवः वाययोयास्तेजसाः पार्थिवाः आप्याः आनन्दोयाः वा इति विचारे प्रथमपक्षश्चेत्तर्हि-आगतम्मदीयं मतम् । द्वितीयोपक्षेऽपि-पञ्चीकरणप्रकृया पुनरपि मदिष्टमेवागतम् । तृतीयस्तु न सम्भवति भूतपञ्चकातिरिक्तस्य परमाणु घटितपदार्थस्यासम्भवात् तस्मादुक्त पक्षद्वयात् अतिरिक्तः अयमाणवकः पक्षे न अवस्थातुं योग्यः । वायोवीयपक्षे एव समावेशात् । न्यायदर्शने-'आकाशगुणः शब्द अनित्यश्च'इत्युक्तन्तत्तु वैयाकरणैनादर्तव्यमेवोक्त सूत्रभाष्य विरोधात्[४८] आकाशदेशः शब्दः इत्यस्यैव भाष्ये उक्तत्वाच्च[४९] । सत्वेनिविशतेऽपैति इति रीत्यापरिभाषितगुणत्वस्यैव वैखरीशब्दे स्वीकाराच्च ।

---

४३ वा.प. १।११२
४४ वा.प. १।१२०
४५ वा.प.१।१
४६ वै.सि.ल.त. टिप्पणी -शक्त्याश्रय प्र. पृ. १५४ से १५५
४७ वा.प.ल.म.
४८ म.भा.१।४।२९
४९ म.भा.१।१।१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शव्दभेदविषये प्रकारान्तरम्

शव्दभेदविषये प्रकारान्तरम् - परापश्यन्ती इत्यादिरूपेण शव्दस्य चत्वारो भेदा: दर्शिता: । वैखर्याश्च प्राकृतवैकृतभेदेन द्वैविध्यं दर्शितम् । पुनश्च वायोरणूनां ज्ञानस्य शव्दत्वापत्तिः इत्यनेन त्रैविध्यमपि दर्शितम् अधुना प्रकारान्तरेण त्रैविध्यं निरूप्यते-

(१) अनुपहित: शव्द: परारूप: । (२) ध्वन्युपहित: शंव्द: स्फोटरूप: । (३) उपाधिभूत: शव्दध्वनिरूप: ।

तत्रादय: ज्ञ) अनुपहित: शव्द: अनादिनिधन: इति निरवधि नित्य: । द्वितीयस्तु सावधिनित्य: इति अनित्य एव । तृतीयस्तु सुतरामनित्य: । तथापि तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वरूपमनित्यत्वम् नाभ्युपेयम् । वाह्यप्रयत्नद्वारा इतोऽप्यधिककालं स्थैर्यसम्भवात्तत्रमूलभूतपराख्यशव्ददृष्ट्या तद्विर्तभूतस्फोटस्य चिद्रूप विशेष्यांशदृष्ट्या वा शव्दे नित्यत्व व्यवहार: इति सिद्धान्त: । श्रीनागोजिभट्टास्तु[५०] परावाचोपि यावत् सृष्टिस्थायित्वरूपमेव नित्यत्वं स्वीकृतम् तत्तु पश्यन्त्यादिविषयकमेव मन्तव्यम् । हर्यादिभि: पराख्याया: वाच: अनादिनिधनत्वेन स्वीकारात् । यद्यपि वाक्यपदीये पराशव्देन व्यवहार: न क्वापि दृश्यते तथापि अत्रातीत विपयसिः केवलामनुपश्यति[५१] । इत्यत्र केवलाममित्यनेनास्या: परामर्शस्य कृत प्रायत्वात्, अनालि निधनं व्रह्मशव्द तत्त्वं[५२] इत्यनेन लक्षणेन अस्या: एव लक्षितत्वाच्च ।

स्फोटभेदसमीक्षा -

इदानीं प्रकृतोपयोगी स्फोटतत्त्वं विविच्यते यच्च ध्वन्युपहितशव्दत्वेनेदानीमेवोक्तम् तत्र प्रक्रियापक्षे वैयाकरणै: अष्टौ स्फोटा: अभ्युपेता: सन्ति ते चाग्रे प्रदश्यन्ते-

(१)वर्णस्फोट:(२) पदस्फोट: (३)वाक्यस्फोट:(४)अखण्डपदस्फोट:(५) अखण्डवाक्यस्फोट: इत्येतेपञ्चव्यक्तिस्फोटा: । जातिपक्षे च (६)वर्णजाति स्फोट: (७) पदजाति स्फोट: (८) वाक्यजातिस्फोटश्चति त्रयोजातिस्फोटा: ।

उपसर्गरूपपदस्फोटस्य धातुरूपप्रकृतिस्फोटश्च प्रकृतोपयोगित्वादत्र पदस्फोटविषये किञ्चिदुच्यते । रामम्, रामेण, रामाय, हरिम् हरी, हरीन्, इत्यादौ सिद्धेरूपे क्रियानंशो द्रव्यादिवाचक: । क्रियायञ्च कर्मादेरित्यस्य विनिगन्तुमशक्यतया रामम् इत्यादि पदमेव वाचकं द्रव्यनिष्ठकर्मत्वादे: द्रव्यभिन्नकर्मणो वेति पदस्फोट: । अथ च एक: पट: इति वदेकं पदम्, एकं वाक्यम् वेत्यवाधित प्रतीत्या वर्णातिरिक्तमेकं पदं वाक्यं वा अखण्डं वर्णव्यङ्ग्यम् ।

पदस्फोटे प्रमाण विवेचनम्-

सर्वेसर्व पदादेशा: दाक्षीपुत्रस्य पाणिने:[५३] इति भाष्योक्त्या येनोचारितेनेति भाष्यच्छायामाश्रृत्य वैयाकरणा: वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छन्ति[५४] इति प्रदीपकारनिर्देशेन पदस्य वाक्यस्य च स्फोटत्वं स्फुटमेव । प्रदीपे च वर्णव्यतिरिक्तस्येति कथनेन यद्यपि पद वाक्योरखण्डत्वमेवायाति, तथापि नित्येषु नाम शव्देषुकूटस्थैरविचालिभिर्वर्णैर्भवितव्यम्[५५] इति भाष्यसिद्धान्तेन सखण्डत्वमपि प्रमीयत एव । तत्रार्थवद्सूत्रे धातुभिन्न, प्रत्ययभिन्न, ॰प्रत्ययान्तभिन्नस्यार्थविषयकवोधजनकशव्दस्य प्रादिपदिकसंज्ञाविधानेन सुब्विभक्ति प्रकृतिभूतस्य शव्दस्य स्फोटरूपता स्वीकृता अस्ति । अपरञ्च सखण्डपदस्फोटस्यावयवभूत: प्रकृतिस्फोट: अस्ति । अतएव भूवादय: इति सूत्रे भाष्ये भाववचनो धातुरिति लक्षणे, सति प्रत्यये भाववचनत्वं भाववचनाच्च प्रत्यय: इति अन्योन्याश्रयमाशङ्क्यअनाश्रित्यभाववचनत्वं प्रत्ययोनित्यत्वाच्छव्दानामित्युक्तम्[५६] । पारमार्थिकन्तु नाश्रीयते, कल्पितन्तु आश्रीयते एव इति कैयट:[५७]। अनेन प्रकृतिप्रत्ययान्तरस्फोटस्य प्रामाण्यं सम्यक् सूचित इति दिक् ।

सन्दर्भग्रन्था:

१) अष्टाध्यायी, पाणिनि, सरलव्याख्याटीकालङ्कृत्य, गुरुप्रसाद शास्त्री, भार्गव पुस्तकालय, वाराणसी ।
२) तर्कसङ्ग्रह, श्रीमदन्नभट्टविरचित, आलोकव्याख्या-टीप्पणीभ्यां संवलित, वरदाचार्य, आर्षग्रन्थ प्रकाशनम्, जयनगर, महीशूरपुरी-२००७ ।
३) परमलघुमञ्जूषा, नागेशभट्ट, किरणावलीसंस्कृतव्याख्योपेतटीका, चौखम्वा, सुरभारती प्रकाशन, वाराणसी, प्रथम संस्करण -१९९०।
४) पातञ्जलयोगसूत्रम्, पतञ्जलि, भाष्यव्याख्योपेतम्, चौखम्वा, सुरभारती प्रकाशन, वाराणसी ।
५) प्रौढमनोरमा, श्रीमद्भट्टोजिदीक्षितप्रणीता, पं. द्वारिकाप्रसाद द्विवेदी सशव्दरत्न, वालप्रकाशिकाख्य-संस्कृतहिन्दीव्याख्यासंवलिता, भारतीय विद्याप्रकाशन, वाराणसी, २००४।
६) महाभाष्यम् पतञ्जलि, श्रीगुरूप्रसाद शास्त्री, वाणीविलास प्रकाशन, वाराणसी, द्वितीयसंस्करण-१९८८।
७) वाक्यपदीयम्, आचार्य भर्तृहरि, भगिरथप्रसाद त्रिपाठी, वागीशशास्त्री, सम्पूर्णानन्द संस्कृतविश्वविद्यालय, वाराणसी, द्वितीय संस्करण-२०३७ ।
८) वैयाकरणसिद्धान्तलघुमञ्जूषा, नागेशभट्ट, चौखम्वा, सुरभारती प्रकाशन, वाराणसी ।
९) वैयाकरणभूषणसार:, कौण्डभट्ट, सम्पादक डा. प्रभाकरमिश्र, प्रभाकरौ हिन्दी तथा संस्कृतटीकासहिता, विरोदपुर, वाराणसी, प्रथम संस्करण-२०२९ ।
१०) वैयाकरणसिद्धान्तकौमुदी, भट्टोजिदीक्षित, वालमनोरमाव्याख्यासहिता, सम्पादक पं. गोपाल शास्त्री, चौखम्वा, विद्याभवन, वाराणसी, सम्पूर्णो भाग: २०३७ ।
११) वैयाकरणसिद्धान्तमञ्जूषा, नागेश भट्ट:, सम्पादक-कालिकाप्रसाद शुक्ल, सम्पूर्णानन्द संस्कृतविश्वविद्यालय, वाराणसी, संस्करण-२०३४।

[५०] वै.सि.ल.म. शक्तिनिरूपण पृ.१४१
[५१] वा.प.११७
[५२] वा.प.११
[५३] म.भा.७१।२७
[५४] म.भा.न.११११(पस्पशाह्निके)
[५५] म.भा.११।५५
[५६] म.भा.१।३१
[५७] म.भा.१।३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाणिनेरकारादिघटितसंज्ञानामनुशीलनम्

योगराजशर्मा
उपप्राध्यापक:

निगमागमसमस्तशास्त्राणां सार्वलौकिकवैदिकशव्दानाञ्च नितरां व्युत्पादकं पाणिनीयव्याकरणमेव जगति समुपलव्धेषु व्याकरणेषु सर्वोत्तमं वैज्ञानिकञ्चेति । प्राचीनकालादेव वेदानामिव वेदाङ्गानाञ्च स्थानमुच्चतमम् । वेदाङ्गेषु च व्याकरणस्यैव प्राधान्यम् । व्याकरणंस्याध्ययनेन सर्ववेदपारायणजं पुण्यं प्राप्यते इति तु सुप्रसिद्धमेव । व्याकरणाध्ययनस्य प्रयोजनविशेषो वररुचिना वार्तिकरूपेण प्रदर्शितो विद्यते यथा –

"रक्षोहागमलध्वसन्देहा: प्रयोजनमिति" । रक्षाऽऽदिप्रयोजनानि प्रयोजनान्तराणि च महाभाष्यस्य पस्पशाह्निके भगवता पतञ्जलिना स्पष्टीकृतानि ।

"ब्राह्मणेन निष्कारणो धर्म: षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति "प्रधानञ्च षड्षु अङ्गेषु व्याकरणम्, प्रधाने च कृतो यत्न: फलवान् भवतीति[1] ।

पाणिने: पूर्ववर्तिनो परवर्तिनश्च सन्त्यनेके वैयाकरणा: संस्कृतव्याकरणसागरे । पाणिनिना स्वमेवाष्टाध्या यां दशसंख्याकानां वैयाकरणानां स्मरणं कृतमवाप्यते यथा :-

(१) आपिशलि:, (२) काश्यप:, (३) गार्ग्य:, (४) गालव:, (५) चाक्रवर्मण:, (६) भारद्वाज:, (७) शाकटायन:, (८) शाकल्य, (९) सेनक: (१०) स्फोटायनश्चेति[२] । अष्टाध्यायां समुल्लिखितानां वैयाकरणानां व्याकरणस्य ग्रन्था: सम्प्रति नोपलव्धाश्चेति । अवश्यमेवैतेषां व्याकरणस्यग्रन्था भवितुं शक्नुवन्त्येव । एतच्चास्माकं कृते महत्खेदविषयो दुर्भाग्यश्च ।

संस्कृतव्याकरणस्यैतिहासावलोकनेन निश्चेतुं शक्यते यद् पाणिने: परवर्तिनो वैयाकरणा: त्रयोदशसंख्याका: आसन्निति[३] । येषां व्याकरणग्रन्थाश्चोपलव्धा: । यैश्च भाषिकोदाहरणेन संस्कृतवाङ्मयं सुसमृद्धं, गौरवान्वितञ्च विहितम् । प्रसङ्गत: तेषां नामानि ग्रन्थाश्चात्र निर्दिश्यन्ते –

	वैयाकरणा:	ग्रन्था:
(१)	शर्ववर्मा	कातन्त्रव्याकरणम्
(२)	चन्द्रगोमिन्	चान्द्रव्याकरणम्
(३)	देवनन्दी	जैनेन्द्रव्याकरणम्
(४)	शाकटायन: (अभिनव)	शाकटायनव्याकरणम्
(५)	भोजदेव:	सरस्वतीकण्ठाभरणम् (व्याकरणम्)
(६)	हेमचन्द्र:	श्रीसिद्धहेमशव्दानुशासनम्
(७)	मलयगिरि:	शव्दानुशासनम्
(८)	क्रमदीश्वर:	संक्षिप्तसारव्याकरणम्
(९)	अनुभूतिस्वरूप:	सारस्वतव्याकरणम्
(१०)	वोपदेव:	मुग्धवोधंव्याकरणम्
(११)	पद्मनाभदत्त:	सुपद्मव्याकरणम्
(१२)	पुरुषोत्तमविद्यावागीश:	प्रयोगरत्नमाला (व्याकरणम्)
(१३)	जीवगोस्वामी[४]	हरिनामामृतव्याकरणम्

इत्थं सत्स्वपि सर्वेषु व्याकरणेषु पाणिनीयव्याकरणमेव सर्वत्र प्राधान्यं, सर्वाङ्गपूर्णं, वैज्ञानिकञ्चाभिमन्यते । पाणिनेरष्टाध्यायी विश्वप्रसिद्धा, गौरवमयी वैज्ञानिकीति विद्वान्सोऽष्टाध्यायीं प्रशंसन्ति स्तुवन्ति च पाणिनिं विश्वस्यैव मूर्धन्यतमं वैयाकरणमिति । अतोऽस्यैव व्याकरणस्यैव वेदाङ्गत्वं युक्तम् । "वेदानां वेद:" इति व्याकरणमुपक्रम्य कथितं प्राप्यते । पाणिनीयव्याकरणस्य महिमगानं दृश्यते पुराणादावपि :-

पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं नकिञ्चन ॥[५] (पराशरोपपुराणे)

पाणिनिना स्वकीयाष्टाध्या यां पारिभाषिकशव्दानामववोधनाय संज्ञासूत्राणामुपदेशो विहित:संज्ञया च सूत्राणि लघुरूपेण प्रस्तूतानि । "लध्वर्थं हि संज्ञाकरणम्" इति मतं पतञ्जले: । पाणिनीयव्याकरणे- सन्त्यनेका: शताधिक्यसंज्ञा: । अत्र च पाणिनीयव्याकरणस्याकारादिघटितसंज्ञा-नामेवानुशीलनं विधीयते । अकारादिघटितसंज्ञानामुल्लेखो इत्थं विधातुं

[1] वैयाकरणमहाभाष्यम्, पस्पशाह्निक- पृ. २५ ।
[२] व्याकरण शास्त्रका इतिहास (युधिष्ठिर मीमांसक) पृ. ३७ ।
[३] पाणिनीयव्याकरणस्यैतिहासिकं परिशीलनम् ।
[४] पाणिनीय सारस्वतीय व्याकरण का तुलनात्मक अध्ययन पृ. ५ ।
[५] पराशरोपपुराणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शक्यतेऽत्र पाणिनीयसंज्ञानाम् –

(१) अधिकरणसंज्ञा ।
(२) अनुदात्तसंज्ञा ।
(३) अनुनासिकसंज्ञा ।
(४) अनुस्वारसंज्ञा ।
(५) अपादानसंज्ञा ।
(६) अव्ययसंज्ञा ।
(७) अव्ययीभावसंज्ञा ।
(८) अङ्गसंज्ञा ।
(९) अपृक्तसंज्ञा ।
(१०) अभ्यस्तसंज्ञा ।
(११) अभ्याससंज्ञा[६] ।
(१२) अवसानसंज्ञा ।

एतेषां विवेचनमत्र प्रस्तूयते ।

(१) अधिकरणसंज्ञा :-

"आधारोऽधिकरणम्"

"अधिक्रियते (आश्रीयते) (क्रिया)ऽस्मिन्निति व्युत्पत्तौ अधिपूर्वककृधातोः" करणाधिकरणयोश्चेति सूत्रेण ल्युट्प्रत्यये यु इत्यस्य अनादेशे विभक्त्यादिकार्ये च अधिकरणशव्दस्य सिद्धिर्भवति । आधियन्तेऽस्मिन् क्रिया इति आधारः । कर्तृकर्मणोः क्रियाश्रयभूतयोर्धारणक्रियां प्रति य आधार-स्तत्कारकमधिकरणसंज्ञं भवतीत्यर्थः[७] । अधिकरणं नाम त्रिःप्रकारकं अभिव्यापकम्, औपश्लेषिकम्, वैषयिकमिति[८] । सर्वस्मिन्नात्माऽस्ति इत्युदाहरणमभिव्यापकस्य । देवदत्तः कटे शेते इत्युदाहर-णमौपश्लेषिकस्य । "मोक्षे इच्छास्ति" इत्युदाहरणञ्च वैषयिकस्येति ।

(२) अनुदात्तसंज्ञा –

"नीचैरनुदात्तः"[९]

न उदात्तः इति विग्रहे- नञ्तत्पुरुषसमासे अनुदात्तशब्दो निष्पद्यते । उच्चै आदीयते स्म असौ उदात्तः । उदात्तेन रहितोऽनुदात्तः इति । ताल्वादिषु नीचैरूपलभ्यमानो योऽच् सोऽनुदात्तसंज्ञकोभवतीत्यर्थः । "एध वृद्धौ" इत्यत्र एधघटकाकारोऽनुदात्तः "अर्वाङ् यज्ञस्संक्राम" इत्यत्र चाकारोऽनुदात्तेति ।

(३) अनुनासिकसंज्ञा –

"मुखनासिकावचनोऽनुनासिकः"[१०]

नासिकामनुगतोऽनुनासिकः । मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञको भवति । उच्यतेऽनेनेति वचनम् । करणे ल्युट्प्रत्ययेन वचनशब्दःसिद्ध्यति । मुखं च नासिका च मुखनासिकम्, मुखनासिकं वचनमस्य इति विग्रहे ककारावयवस्य अकारस्य निपातनात्दीर्धत्वे च सति मुखनासिकावचनः इत्यस्य सिद्धिः । स्वराणां व्यञ्जनानाञ्च अनुनासिकसंज्ञा भवत्येव । अनुनासिकश्च "अभ्र आँ अपः" इत्यादौ वेदवाक्येऽपि उपलभ्यते एव । "अणोऽप्रगृह्यस्यानुनासिकः" इत्यनेन स्वरस्यानुनासिको तथा "अनुनासिकस्य क्विझलोः क्ङिति"[११] इत्यनेन चापेक्षितत्वमनुनासिकत्वं व्यञ्जनस्येति । दधिं, प्रशान् इत्याद्युदाहरेणे । पाणिनीयशिक्षायाञ्च ञम्प्रत्याहारस्य (ञ म ङ ण न) अनुनासिकत्वं स्वीकृतमिति ।

(४) अनुस्वारसंज्ञा –

अनु= पश्चात्, स्वरवर्णानन्तरं, स्वर्यते – उच्चार्यते इत्यनुस्वारः । स्वृधातो "अकर्तरि च- कारके संज्ञायाम्" इति सूत्रेण कर्मणि घञ्प्रत्यये वृद्धौ च अनुस्वारशब्दस्य सिद्धिर्भवति ।" अं, अः इत्यचः परावनुस्वारविसर्गौ । अनुस्वारश्च नासिकया उच्चार्यते । अनुनासिकादन्यो यो वर्णः रोःपूर्वः यस्यानुनासिको न विहितस्ततः परोऽनुस्वारागमो भवतीत्यर्थः[१२] । "अनुनासिकात् परोऽनुस्वारः" संस्कर्ता इत्यादौ अनेनैवानुस्वारः । हरिम्+वन्दे इत्यत्र मकारस्य "मोऽनुस्वारः" इति सूत्रेण मस्यानुस्वारे हरिं वन्दे इति अनुस्वारस्योदाहरणमिति ।

---

[६] वैयाकरणसिद्धान्तकौमुदी ।
[७] काशिकावृत्तिः, १-४-४५ ।
[८] वैयाकरणमहाभाष्य ६-१-७२ ।
[९] अष्टाध्यायी १-२-२७
[१०] पाणिनिसूत्रम् १+१+८
[११] अष्टाध्यायी ६।४।१५
[१२] काशिकावृत्तिः ८।३।४।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(५) अपादानसंज्ञा –

अपादीयतेऽस्मादिति अपादानम् । अपादीयते इत्यस्य पृथक् क्रियते इत्यर्थः । अप आ इत्युपसर्गद्वयपूर्वकदाधातोः ल्युट्प्रत्ययेन अपादान शव्दो निष्पद्यते । "ध्रुवमपायेऽपादानम्"[१३] सूत्रमिदं अपादान सज्ञाविधायकम् । अपायो विश्लेषः, तस्मिन् साध्ये ध्रुवमवधिभूतं कारकमपादानसंज्ञां भवति । अपादानाञ्च त्रिधा विवक्षितं विद्यते [१४] । निर्दिष्टविषयम्, उपात्तविषयम्, अपेक्षितक्रियञ्चेति । यत्र साक्षाद्धातुना गतिनिर्दिश्यते तन्निर्दिष्टविषयम् । यथा अश्वात् पतति । यत्र धात्वन्तराङ्गं स्वार्थं धातुराह तदुपात्तविषयम् यथा- बलाहकात् विद्योतते । अपेक्षिता क्रिया यत्र तत् अपेक्षितक्रियञ्चेति यथा- कुतो भवान्, गामात् इति । अत्र च भर्तृहरिः–

अपाये यदुदासीनं चलं वा यदि वाऽचलम् ।
ध्रुवमेवातदादेशात् तदपादानमुच्यते ॥
पततो ध्रुवं एवाश्वो यस्मादश्वात्पतत्यसौ
तथाप्यश्वरस्य पतने कुण्ड्यादि ध्रुवमिष्यते
मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक् ।
मेषयो स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथक् ॥[१५] (वा.प.)

(६) अव्ययसंज्ञा –

न. व्ययम् इति विग्रहे नञ्तत्पुरुषसमासे अव्ययम् शव्दस्य सिद्धिर्भवति । व्येति इत्यर्थे वि इत्युपसर्गपूर्वकेण्धातोः" नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः"[१६] इत्यनेन अच्प्रत्यये गुणादिकार्ये च व्ययम् इति शव्दः सिध्यति । स्वरादिनी शव्दरूपाणि निपाताश्चाव्ययसंज्ञानि भवन्तीत्यर्थः । अव्ययलक्षणं वैयाकरणमहाभाष्ये इत्थं निरुपितं दृश्यते :-

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु
वचनेषु च सर्वेषु यन्न वेति तदव्ययम्[१७] । (११.१.३७ म भा) एवमेव

(१) स्वरादिनिपातमव्ययम् । (१-४-५६। अष्टाध्यायी)
(२) तद्धितश्चासर्वविभक्तिः । (११।३८ अष्टाध्यायी)
(३) कृन्मेजन्तः । (११।३९ अष्टाध्यायी)
(४) क्त्वातोसुन्कसुनः । (३११८ अष्टाध्यायी)
(५) अव्ययीभावश्च इति[१८] । एतानि अव्ययसंज्ञाविधायकानि सूत्राणि ।

स्वर् च, ततः, किंतराम्, स्वादंकारम्, कृत्वा उपारिन इत्यादीनि अव्ययस्योदाहरणानि ।

७. अव्ययीभावसंज्ञा –

न अव्ययमनव्ययम्, अनव्ययमव्ययं भवतीति व्युत्पत्तौ "भवतेश्चेति वक्तव्यम् इति वार्तिकेन भूधातोः णप्रत्ययेऽनुवन्धलोपे अव्यय अस् भू अ इति- स्थितौ वृद्धावावादेशयोः पश्चात् "कृभ्यस्तियोगे सम्पद्यमाने कर्तरि च्विः"[१९], इत्यनेन च्विप्रत्यये "अस्य च्वौ" इति सूत्रेण ईत्वे, वकारलोपे, समासादिकार्ये अव्ययीभावः इत्यस्य शव्दस्य सिद्धिर्भवति । अव्ययीभाव इत्यधिकारो "तत्पुरुषः" इति सूत्रतः प्राक् वेदितव्यो भवति । सामान्यतः पूर्वपदार्थप्रधानोऽव्ययीभावः" इति अव्ययीभावस्य लक्षणं विधीयते । अत्र अव्ययीभावसंज्ञाविधायकानि समासविधायकानि च समासस्य सूत्राणि उपस्थाप्यन्ते

यथा :- (१) अव्ययीभावः ।
(२) अव्ययं विभक्तिसमीपसमृद्धिव्यृद्धर्थाभावात्ययासम्प्रतिशव्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिशाकल्यान्तवचनेषु ।
(३) यथाऽसादृश्ये ।
(४) यावदवधारणे ।
(५) सुप्प्रतिना मात्रार्थे ।
(६) अपपरिवहिरञ्चवः पञ्चम्या ।
(७) लक्षणे नाभिप्रती आभिमुख्ये ।
(८) तिष्ठ्गुप्रभृतिनी च ।
(९) पारे मध्ये षष्ठ्या वा ।
(१०) संख्या वश्येन ।
(११) अन्यपदार्थे च संज्ञायाम्[२०]

---

[१३] अष्टाध्यायी १।४।२४।
[१४] वाक्यपदीयम् (३।७।१३६)
[१५] पूर्ववत् ३।७।१२१।
[१६] अष्टाध्यायी ३-१-१३४ ।
[१७] वैयाकरणसिद्धान्तकौमुदी पृ. १०९ ।
[१८] अष्टाध्यायी ११।४१
[१९] पूर्ववत् ५।४।५० ।
[२०] अष्टाध्यायी ।२१।२१।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यादीनि । तत्र च अव्ययं विभक्तिरित्यत्र अव्ययं इति योगो विभज्यते ।
अव्ययं समर्थेन सह समस्यते । सोऽव्ययीभावः इति तस्यार्थः । विभक्त्यादिष्वर्थेषु यदव्ययं वर्तते तत्सुबन्तेन सह समस्यते, स च अव्ययीभाव समासो भवतीत्यर्थो काशिकावृत्तौ ।

अधिहरि, यावच्छ्लोकम्- शाकप्रति, अपत्रिगर्तं दृष्टो देवः, अनुवनमशनिर्गतः, पारेगङ्गम्, द्विमुनि व्याकरणम्, उन्मन्तगङ्गम् । इत्यादीनि अव्ययीभावसंज्ञायाः समासस्य चोदाहरणानि ।

(८) अंङ्गसंज्ञा –

अङ्ग्यते (ज्ञायते अर्थः) अनेन इति अङ्गम् । गत्यर्थकाद् "अगि गतौ"[२१] इत्यस्माद्धातोः "घञर्थे कविधानम्" इति वार्तिकेन कप्रत्ययेऽनुबन्धलोपे नुमि स्वादिकार्ये च अङ्गम् इत्यस्य सिद्धिः । "यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्"[२२] इत्यङ्गसंज्ञाविधायकं पाणिनेः सूत्रम् । यः प्रत्ययो यस्मात् क्रियते तदादि शब्दस्वरूपं तस्मिन् परेऽङ्गं स्यादिति सूत्रार्थः । भवामि इत्युदाहरणे भव+मि इत्यत्र शप्प्रत्ययविशिष्टस्य भव- इत्यस्य अंङ्गसंज्ञायां "अतो दीर्घो यञि"[२३] इत्यनेन अदन्ताङ्गस्य दीर्घो भवति । रामाभ्याम् इत्यादिविकरणशून्यस्थले केवलं प्रकृतेरेव तदादित्वं व्यपदेशिवद्भावेन । तस्मात् प्रकृतेरेव अङ्गसंज्ञायां "सुपि च" इत्यनेन दीर्घत्वं सिद्धयति । प्रकृते च रामशब्दस्य प्रकृतिमात्रस्य तदादित्वं व्यपदेशिवद्भावाद् बोद्धयम् । (वा.म.सू.) इति । स्त्री इयती इत्यत्र स्त्री इत्यस्य नाङ्गसंज्ञा- स्त्रीशब्दात्विहितप्रत्ययाभावात् । न च इयङादेशः । अत्र च प्रत्यये परे एव अङ्गसंज्ञा न तु प्रत्ययविशिष्टस्य तदधिकस्य वा तत्र अङ्गसंज्ञाविधायकसूत्रे मूले प्रत्यये किम् ? । "प्रत्ययविशिष्टस्य ततोऽप्यधिकस्य वा माभूत्" इत्युक्तत्वात् । अन्यथा वव्रश्च इत्यत्र- विशिष्टस्याङ्गसंज्ञायाम् "अचः" परस्मिन् इति स्थानित्वाप्रवृत्या "न सम्प्रसारणे इति निषेधाभावादभ्यासस्य पुनरपि संप्रसारणं प्रवर्तेत"[२४] ।

ततोऽधिकस्याङ्गसंज्ञायां तु "देवदत्त ओदनम् अपाक्षीत्"- इत्यत्र देवदत्तशब्दात्- प्रागडागमः स्यात् । देवदत्तशब्दात् सुप्रत्ययविहितत्वेन लुङः प्राग्वर्तिसमुदायस्याङ्गत्वात् । तस्मात् द्वितीयप्रत्ययग्रहणे कृते तु न कोऽपि दोषः प्रसज्यते इति ।[२५]

(९) अपृक्तसंज्ञा –

न पृक्तः (वर्णान्तरैः अश्लिष्टः) इति व्युत्पत्या अपृक्तशब्दो निर्मीयते नञ्तत्पुरुषसमासेन । पृणक्ति इत्यर्थे पृच्धातोः "गत्यर्थाकर्मकश्लिषशीङ्- स्थासवसजनरूहजीर्यतिभ्यश्च"[२६] इत्यनेन कर्त्रर्थे क्तप्रत्ययेन पृक्तः शब्दो निर्मीयते । अपृक्तसंज्ञापि पाणिनेः महती संज्ञा । अपृक्तसंज्ञा च "अपृक्त एकाल्प्रत्ययः" इति सूत्रेण विधीयते । एकाल्प्रत्ययो यः सोऽपृक्तसंज्ञको भवतीति सूत्रार्थः[२७] । अत्र च अल् इति प्रत्याहारः । सर्वे स्वरवर्णाः व्यञ्जनवर्णाश्च अल्प्रत्यहारे समायान्ति "वृत्रहा" इत्याद्युदाहरणे क्विप्प्रत्ययस्य अनुवन्धलोपे अवशिष्टस्य व् इत्यस्य सूत्रेणानेनापृक्तसंज्ञायां "वेरपृक्तस्य" इति सूत्रेण लोपः । एवमन्यत्रापि बोद्धयम् इति ।

(१०) अभ्यस्तसंज्ञा –

अभ्यस्यते स्म यत् तद् इति इति विग्रहे अभि इत्युपसर्गपूर्वक "असु क्षेपणे" इत्यस्माद्धातोः "निष्ठा"[२८] इत्यनेन क्तप्रत्ययेऽनुवन्धलोपादिकार्ये अभ्यस्तम् इति शब्दस्य सिद्धिर्भवति । अत्र च उपसर्गवलाद् "धातूनामनेकार्थाः" इति सिद्धान्तत्वाच्च शब्दस्य अर्थो विधीयते इति । अभ्यस्तसंज्ञा च "उभे अभ्यस्तम्" इत्यनेन विधीयते । षाष्टद्वित्वप्रकरणे ये द्वे विहिते ते उभे समुदिते अभ्यस्तसंज्ञा

स्यात् इति सूत्रार्थः । जुहाव इत्यत्र हेञ्धातोः सूत्रेणानेन अभ्यस्तसंज्ञायां "अभ्यस्तस्य च"[२९]इत्यनेन सप्रसारणं ततः पूर्वरूपं च सिद्धयति । संज्ञा चेयं समुदायस्य ।

अभ्यस्तसंज्ञाविधायकं पाणिनेर न्यत् सूत्रमप्यस्ति । "जक्षित्यादयः षट्"[३०] इति । षट्धातवो ऽन्ये जक्षितिश्च सप्तमः एते ऽभ्यस्तसंज्ञाः स्युः इति सूत्रार्थः[३१] । तेन च जक्ष, जागृ, चकासृ, शासु, दीधीङ्, वेवीङ् एषां सप्तानां अभ्यस्तसंज्ञा । सूत्रेऽस्मिन् जक्षिति इतिपदं शितप् निर्देशस्य । तेन च जक्षति इति रूपस्य सिद्धिः । अत्र च अदभ्यस्तात् इति सूत्रेण झस्यातदेशः इति । एवमेव जक्षितिः आदिर्येषां तद्गुणसंविज्ञानवहुव्रीहौ सति जक्षधातुमारभ्य षष्णामेव ग्रहणं स्यात् वेवीङो न स्यात् । अतद्गुणसंविज्ञानवहुव्रीहौ तु जागृ इत्यारभ्य षण्णां ग्रहणं स्यात् न तु जक्षेः[३२] । अतः जक्षितिरिति शितप् निर्देशः जक्षधातुरित्यर्थः इति ।

---

[२१] वैयाकरणसिद्धान्तकौमुदी पृ. १४६ ।
[२२] अष्टाध्यायी ११४११३।
[२३] अष्टाध्यायी ७१३११०१।–
[२४] तत्ववोधिनी टीका सूत्र पृ. २८४ ।
[२५] पूर्ववत् ।
[२६] अष्टाध्यायीसूत्रम् ३-१-७२ ।
[२७] सिद्धान्तकौमुदीसूत्र पृ. २५१ ।
[२८] अष्टाध्यायी ३।२।१०२
[२९] पूर्ववत् ६।१।३३
[३०] ऐ.
[३१] सिद्धान्तकौमुदी सूत्र पृ. ४२६ ।
[३२] बालमनोरमाटीका सूत्र पृ. ४२८ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(११) अभ्याससंज्ञा –

अभ्यस्यते (पुनः उच्चार्यते) असौ- अभ्यासः । अभि उपसर्गपूर्वक अस्धातोः "अकर्तरि च कारके संज्ञायाम्" इत्यनेन घञ्प्रत्ययेऽभ्यासशब्दस्य- निष्पत्तिर्भवति । पाणिनेः "पूर्वोऽभ्यासः" इति सूत्रेण अभ्याससंज्ञा विधीयते । षाष्ठद्वित्वप्रकरणे ये द्वे-विहिते तयोर्यः पूर्वोऽवयवः सोभ्याससंज्ञो भवति इत्यर्थः[३३] । इयाज इत्यादौ यज् यज् अ इति स्थितौ पूर्वस्याभ्याससंज्ञायां "लिट्यभ्यासस्योभयेषाम्"[३४] इत्यनेन संप्रसारणे, ततः पूर्वरूपं सिद्धयति । इति ।

(१२) अवसानसंज्ञा –

पाणिनेः "विरामोऽवसानम्" इति सूत्रे अवसानसंज्ञा विधीयते । अवसातिरवसानमित्यर्थः । अवसान शब्दश्च अवस्यतेऽस्मिन् इति विग्रहे "करणाधिकरणयोश्च इति सूत्रेण ल्युट्प्रत्यये सिद्धयति । वर्णानामभावोऽवसानसंज्ञाः स्यादिति' विरामोऽवसानम् इति सूत्रस्यार्थः । अवसानसंज्ञा च "खरवसानयोर्विसर्जनीयः "वावसाने" इत्यनयो चरितार्था । रामः, गोधुक् इत्यादीनि अवसानसंज्ञायाः उदाहरणानि सन्तीति ।

निष्कर्ष :-

पाणिनीयसंज्ञासूत्राणां विशेषेणाध्ययनं अद्यतनस्यावश्यकता दरीदृश्यते । संज्ञासूत्राणां माध्यमेनैव विज्ञाने, कलायाम्, व्याकरणशास्त्रे च प्रवेष्टुं सुकरा भवति । पाणिनिना व्याकरणशास्त्रस्य पारिभाषिकशब्दानां कृते संज्ञा- शब्दस्य प्रयोगो विहितः[३५] । महर्षिपाणिनेः अष्टाध्या यां संज्ञासूत्राणि शतसंख्यातोऽप्यधिकानि सन्ति । परन्त्वत्र अकारादिघटितानां केवलं द्वादशसंख्याकानां संज्ञानामेव चर्चा विहिता । पाणिनीय व्याकरणं हि सर्वोपकारकं शास्त्रं अस्याध्ययनं विना यस्मिन् कस्मिन् अपि शास्त्रे विदुषां प्रवेशो दुष्करः एव । लेखेऽस्मिन् विवेचिताः पाणिनेसंज्ञाः वेदेऽपि दृश्यन्ते । पाणिनिना पूर्ववर्तीनां वैयाकरणानां संज्ञानामपि स्वकीये शास्त्रे स्थानं प्रदत्तमवाप्यते[३६] । महर्षिपाणिनिना व्याकरणशास्त्रे प्रयुक्ताः संज्ञा प्रायशः ऋग्वेदे, प्रातिशाख्ये, निघण्टुग्रन्थे- तथान्यवैयाकरणानां व्याकरणेऽपि उपलभ्यन्ते स्म[३७] । लौकिकवैदिकशब्दानां व्युत्पादनाय विश्लेषणाय चान्यतमस्यास्य शास्त्रस्याध्ययनमनुसन्धानञ्चाद्यपर्यन्तं नेपाले भारतदेशेऽपि सञ्चाल्यमानमस्त्येव । इतोऽपि अधिकतयानुसन्धानमद्यतनस्य विषयो विद्यते । संस्कृतव्याकरणक्षेत्रे वहुभिर्वैयाकरणैः महनीयमवदानं प्रदत्तमिति तेषां समेषां ग्रन्थानामन्वेषणकार्यमपि अपरिहार्यमेव । इत्थं मयात्र पाणिन्यादेरितिवृत्तं, पाणिनिपूर्वकालिकानामुत्तरकालिकानाञ्च वैयाकरणानां समीक्षणं, पाणिनीयव्याकरणस्योददेश्यं यत्किञ्चित् निरूपितम् । अग्रेऽपि पाणिनेरन्येषां सूत्राणां विवेचनं विधास्यते एव । लेखेऽस्मिन् अधिकरण-अनुदात्त-अनुनासिक-अनुस्वार-अपादान-अव्यय-अव्ययीभाव अङ्ग-अपृक्त-अभ्यस्त-अभ्यासअवसानसंज्ञानां परिचर्चा समीक्षा च यथामतिः विहिता ।

विश्वस्यैव मूर्धन्यतमवैयाकरणस्य पाणिनेः व्याकरणशास्त्रस्य संज्ञासूत्राणामनुशीलनमस्माकं कृते अवश्यमेव काठिन्यं तथापि भगवतो पाणिनेर्विषये प्रस्तुता वेदाङ्गभूता एता भावना विचाराश्च लोकोपकाराय भवन्तु इति भगवन्तं त्रिमुनिं विश्वनाथञ्च प्रार्थयन् विरमामि अस्तु !!!

<u>सन्दर्भग्रन्थाः</u>

(१) कात्यायनः, वैयाकरणमहाभाष्यम्, परिमलपब्लिकेसन्स दिल्ली १९९१ ई.सं. ।

(२) दीक्षितः, वासुदेवः, चौ.सं.सी.आ, वाराणसी १९५६ ई.सं. ।

(३) पाण्डेयः, डा.कमलप्रसादः, पाणिनीय और सारस्वतीय संज्ञाओं का अध्ययन, भारतीय विद्या प्रकाशन वाराणसी १९९९ ई.सं. ।

(४) ब्रह्मदत्त, काशिकावृत्ति, चौ.सं.सी.आ वाराणसी १९५२ ई.सं. ।

(५) भट्टोजी दीक्षितः, वैयाकरणसिद्धान्तकौमुदी, चौखम्वा संस्कृत प्रतिष्ठानम् दिल्ली १९९४ ई.सं. ।

(६) भर्तृहरिः, वाक्यपदीयम्, सं.सं.वि.वि., वाराणसी, १९७७ ई.सं. ।

(७) महर्षि पाणिनिः, "अष्टाध्यायी", चौखम्वा ओरायन्टा लिया, वाराणसी १९७७ ई.सं. ।

(८) मीमांसकः, युधिष्ठिरः, व्याकरणशास्त्र का इतिहास, भारतीय प्राच्य विद्या प्रतिष्ठान वि.सं. २०२० ।

[३३] काशिकावृत्तिः ६।१।४

[३४] अष्टाध्यायी ६।१।१७

[३५] व्याकरणशास्त्रका इतिहास पृ. १०७ ।

[३६] ऐ.

[३७] ऐ.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पौरस्त्यपाश्चात्त्यदर्शनपथेन परमाणुवादविचारः

केशवशरणोऽर्यालः

१. विषयप्रवेशः

अधुनातनेऽतिनूतने विज्ञानक्षेत्रे प्राक्तननूतनपौरस्त्यपाश्चात्योभयविधदर्शनक्षेत्रे च जगतः सृष्टिप्रक्रियाविषयको विचारो महद्वैशिष्टयमावहति । तत्र किल विविधविचाराः प्रावृत्ता वर्तन्ते । तेषु च कस्माद् एतद् भौतिकं जगज्जातमित्यत्र वहुविधसिद्धान्तेषु परमाणुवादिसिद्धान्त एकतमः प्रसिद्धश्च । उपनिषत्कालानन्तरं विविधदर्शनेषु सृष्टिविषयकं चिन्तनं समायातम् । तत्र दर्शनं तावत् प्रथमं वैदिकावैदिकभेदेन द्विधा विभक्तम् । वैदिकेषु अन्यतमदर्शने न्यायवैशेषिके । तत्र प्रायः परस्परमेकेन स्वीकृतस्य मतस्यान्येन स्वीकृतत्वात् तद्दर्शनद्वयं समानतन्त्रत्वेन सम्मन्यते ।

तत्र तावत् सामान्यतः पौरस्त्यदर्शनेषु परमाणुवादस्वीकर्तृदर्शनानि न्यायवैशेषिकमीमांसावौद्धजैनानि । परन्तु मूलतो न्यायवैशेषिकदर्शनाभ्यां परमाणुपदार्थस्य स्पष्टमुररीकृतत्वाद्, विवृतत्वाच्चैतद्दर्शनमेव परमाणुवादिदर्शनत्वेन विश्रुतम् ।

प्राच्यचिन्तने न्यायवैशेषिकदर्शनयोरिव पाश्चात्त्यदर्शनचिन्तने च परमाणुवादिचिन्तनानि लभ्यन्ते । अत्र लेखे तमेव परमाणुवादिसिद्धान्तमादाय पौरस्त्यपाश्चात्यपरमाणुवादिचिन्तने मदीया प्रवृत्तिः ।

२. परमाणुपदार्थः

जगत्सृष्टिविषये पौरस्त्यदर्शनेषु अद्वैतवेदान्ते निर्विशेषव्रह्मैव उपादानत्वेनाङ्गीक्रियते चेद् विशिष्टाद्वैतचिन्तने सूक्ष्मचिदचिद्विशिष्टव्रह्म स्वीक्रियते । तथैव सांख्ययोगदर्शनयोः प्रकृतिरेव मूलत्वेनोररीक्रियते । मीमांसादर्शने च केचनास्य जगतो न वा सृष्टिः न वा विनाशो मन्यन्ते प्रत्युत संसारस्यानादित्वमनन्तत्वञ्च दृढीकुर्वन्ति । न्यायवैशेषिकदर्शनाभ्यान्तु एतद्दृश्यमानं जगत् परमाणुपदार्थेभ्यो जायते इति स्वीकुर्वन्ति । तथैव पाश्चात्यदर्शने च केचन जलतत्त्वतः, केचन वायुतत्त्वत, केचन कस्माच्चनानियततत्त्वात् जगज्जातमिति आचक्षते । केचन डेमोक्रिटसादयस्तु परमाणुपदार्थादेवास्य जगत उत्पत्तिर्जातेति मन्वते । एतावता न्यायवैशेषिकदर्शनयोः मते डेमोक्रिटसादिपाश्चात्यदार्शनिकमते चैतज्जगत् यस्मात् तत्त्वाज्जातं तदेव तत्त्वं परमाण्वाख्यमिति । यद्यपि केषाञ्चन मते पौरस्त्यपरमाणुवादिभिः परमाणुसिद्धान्तः ग्रीकदेशात् उत पाश्चात्यपरमाणुवादिदार्शनिकात् प्राप्त इति उच्यते परन्तु पौरस्त्यचिन्तने ग्रीकैः सह सम्पर्कात् पूर्वमेव वहुत्रोपनिषत्सु परमाणूनां निर्देशः प्राप्यतेऽत तेषां कथनं मिथ्यैव । एतावता च पौरस्त्यपरमाणुवादिसिद्धान्तः पाश्चात्यपरमाणुवादिसिद्धान्ततः पुरातनः । एतत्तु सत्यं यत् पाश्चात्यपरमाणुवादस्तावदत् आधुनिकभौतिकविज्ञानस्य आधारभूमित्वेन प्रवृद्धः प्रथितश्च । परन्तु पौरस्त्यचिन्तने तथा भौतिकविज्ञानस्य नैयूनात् परमाणुवादिसिद्धान्तः भौतिकविज्ञाने आधारभूमित्वेन गृहीत इति वक्तुमशक्यमिति । इतोऽत्र पौरस्त्यपाश्चात्यदर्शनदृष्ट्या परमाणुस्वरूपं विचार्यते ।

२.१ न्यायवैशेषिकदर्शनरीत्या परमाणुस्वरूपम्

पौरस्त्यपाश्चात्यदार्शनिकाः परमाणुतत्त्वं स्वीकुर्वन्ति । पौरस्त्यदार्शनिकेषु प्राधान्येन वैशेषिका नैयायिकाः परमाणुकारणतावादं विशदतया समर्थयन्ति । पौरस्त्यपाश्चात्यानामुभयेषां मते तत्त्वानां सर्वापेक्षया यो हि लघुतमो भागः, स एव परमाणुः । कणादमतानुसारेण परमाणुषु केचन नित्याः केचनागन्तुका गुणा भवन्ति । कणादस्तेषु तत्र स्वतो निष्क्रियत्वं मन्यमानः परतो गतिमत्त्वमाह । पृथिवी-जल-तेजोवायवः परमाणुरूपेण नित्याः । तद्भिन्नं मनः परमाणुरूपं नित्यम् । परमाणवो भौतिकपदार्थानां परमसूक्ष्माः अभेद्याः अन्तिमरूपाश्च । परिमाणञ्च तेषामणुरूपम् । ते च निर्भागास्सन्तो गोलाकाराः वर्तन्ते । तेषां नान्तःछिद्रं भवति । अतस्ते न परस्परमन्तं प्रवेशमर्हन्ति । ते च स्वयमगतिकाः सन्तो वाह्यसाधनेभ्यः गतिं लभन्ते । केचन वदन्ति यत् प्राचीनवैशेषिकाणां मते जीवानां स्वस्वादृष्टवशात् परमाणुषु गतिरुत्पद्यते । ततश्च परमाणवः कार्यभौतिकवस्तुरूपेण संयुक्ताः सन्तो जीवानां सुखदुःखकारका भवन्ति । केचन परवर्त्तिनो वैशेषिकास्तु ईश्वर एव परमाणुषु गतिमुत्पाद्य जीवानां धर्माधर्मरूपादृष्टसहा येन पृथक् पृथक् कार्यवस्तुरूपेण परमाणून् संयोजयति । एतावता कार्यरूपेण परमाणूनां संयोगः सहेतुको न तु निर्हेतुकः आकस्मिको वा । जीवानां कर्मसिद्धान्तानुसारेणैव तथा परमाणूनां गतिः, संयोगश्च (त्रिपाठी, वि.स.२०१८ :१२३) ।

ऋषिणा कणादेन परमाणुस्वरूपविषये न साक्षादुक्तं वर्तते । परन्तु परमाणुसद्भावे प्रमाणविषये 'तस्य च कार्यं लिङ्गम्' (वै.सू., ४।१।२) इत्युक्तम् । अर्थात् तस्य=परमाणोः कार्यं=घटादिकं लिङ्गं नाम हेतुः । तत्र प्रसङ्गे एतत्सूत्रपूर्वं सदकारणवन्नित्यमिति सूत्रं सूत्रितं वर्तते सूत्रकारेण । तत्र यद्यपि साक्षात् परमाणुपदं कणभुजा न प्रयुक्तमपि तु सदित्यनेन परमाणुर्ज्ञेय इति व्याख्यातॄणामाशयः । एतावता परमाणुस्वरूपविषये कणभुजा कारणाभाववन्तो नित्याः परमाणवो भवन्तीत्युक्तं भवति । भाष्यकारेण प्रशस्तदेवाचार्येणापि यद्यपि परमाणुस्वरूपविषये न स्पष्टं किमप्युक्तं लभ्यते परन्तु पृथ्वीं विभजमानेन तेन 'सा च द्विविधा नित्या अनित्या च । परमाणुलक्षणा नित्या, कार्यलक्षणा त्वनित्या' (१९९७ : ७८) इत्युक्तं वर्तते । तेन च ज्ञायते अनेन परमाणूनां नित्यत्वं स्वीकृतमिति । कारणागुणाः कार्यगुणानारभन्ते इति वैशेषिकाणां प्रसिद्धः सिद्धान्तः खलु । तेन च ज्ञायते कार्येषु ये गुणा भवन्ति ते च तेषां कार्याणां मूलभूतानां परमाणूनाञ्च भवन्तीति । परमाणुस्वरूपविषये कन्दलीकारोपि न किमपि वक्ति परन्तु परमाणुसत्त्वमानविषये तु तेन अनुमानमेवोररीक्रियते । तस्य परमाणोः कार्यं द्व्यणुकत्र्यणुकादिकं च यदि निरवधि स्यात् तर्हि मेरुसर्षपयोः परिमाणभेदो न स्यात्, अनन्तावयवारव्धत्वाविशेषात् । तस्मान्निरवयवं द्रव्यमवधिः । तत्र न्यायकन्दलीकारस्यानुमानाकारश्च -

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अणुपरिमाणतारतम्यं क्वचिद् विश्रान्तं परिमाणतारतम्यत्वात् महत्परिमाणतारतम्यवद्, यत्रेदं विश्रान्तं यतः परमणुर्नास्ति स परमाणुः (१९९७ : ७९) स चाग्रे कथयति स च नित्यः, द्रव्यत्वे सति अवयवाभावात्, यथाकाशम् । यद्ययं सावयवस्तर्हि न स परमाणुः (पूर्ववत्) ।

न्यायसूत्रकारो गौतमश्च *'व्यक्तात् व्यक्तानाम्* (उत्पत्तिः) *प्रत्यक्षप्रामाण्यात्'* (न्या.सू.,(४।१।११), *'अणुश्यामतानित्यत्ववद्वा* (न्या.सू., ४।१।६७)', *'न प्रलयोऽणुसद्भावात्'* (न्या.सू.,४।२।१६) इत्यादिसूत्रैः परमाणुतत्त्वं विवृतम् ।

परमाणुविषयको वाद एव आरम्भवाद । अस्य कृते कैश्चिन्नवीनैरसत्कार्यवाद इति व्यवह्रियते । अयमेव वादः परमाणुकारणतावाद इत्युच्यते । परमाणुविषयकचिन्तने न्यायसूत्रकारेण *व्यक्ताद् व्यक्तानां प्रत्यक्षकारणात्* (न्यायसूत्रम्, ४।१।११) । इति सूत्रमुक्तमिति वदति फणिभूषणतर्कवागीशमहोदयः (तर्कवागीशः, १९६८ : ६९) । एतावता तेनैव सूत्रेण सूत्रकारः परमाणुविषये स्वमतं प्राचीकटत् । तत्र खिल न साक्षात् परमाणुविषये विवृतमपि तु अनुमानद्वारा तज्ज्ञेयमिति मतं प्रकटितम् । तत्र तावत् अस्मादेव जगदेतज्जातमिति नोक्तं न्यायसूत्रकारेणापि तु व्यक्तादुत्पन्नमित्येवोक्तम् । तच्च व्यक्तं मूलत इन्द्रियग्राह्यं परन्तु तत्सामान्यात् परमाणुजातमपि ज्ञेयमिति ज्ञापयति भाष्यकारः -

... व्यक्तात्=भूतसमाख्यातात् पृथिव्यादितः परमसूक्ष्मात् नित्यात् व्यक्तम्=शरीरेन्द्रियविषयोपकरणाधारं प्रज्ञातं द्रव्यमुत्पद्यते, व्यक्तञ्च खल्विन्द्रियग्राह्यं तत्सामान्यात् कारणमपि (परमाणुरपि) व्यक्तम् । किं सामान्यम् ? रूपादिगुणयोगः= रूपादिगुणयुक्तेभ्यः पृथिव्यादिभ्यो नित्येभ्यो रूपादिगुणयुक्तं शरीरादिकमुत्पद्यते (पृ.३५०) ।

'अणुश्यामतानित्यत्ववद्वा' इति सूत्रं यद्यपि पूर्वपक्षित्वेन पुरस्थापितं सूत्रकारेणापितु 'अणु' इत्यनेन परमाणोः गृहीतत्वात् सूत्रकारस्य परमाण्वभिमतौ प्रमाणमेतदिति वक्तुं सुशकम् ।

तथैव 'न प्रलयः, अणुसद्भावात्' इत्यनेन सूत्रेण सर्वशून्यतावादखण्डनावसरे सूत्रकारेण सर्वशून्यस्थितिर्नास्ति परमाणोः सत्त्वादिति मतस्य प्रकटितत्वात् परमाणौ सूत्रकारस्य वचनप्रमाणं स्पष्टम् । तत्र कीदृशस्तावत् परमाणुरित्यत्र यद्यपि सूत्रकारेण न किमपि स्पष्टमुक्तमपि तु 'परं वा त्रुटेः' (न्या.सू. ४-२-१७) इति सूत्रतो ज्ञायते त्र्यणुकात् यत् परं तदेव परमाणुरित्युक्तम्, यद्यपि त्रुटिर्नाम त्र्यसरेणुस्तथापि उपलक्षणात् द्व्यणुकमपि ग्राह्यम् । एतावता परमससूक्ष्मं यत् तदेव परमाणुजातमिति सिद्ध्यति । अत्र सुदर्शनाचार्यश्च - *सूत्रेण परमाणुस्वरूपमाह - परमिति, त्रुटेः परं यः सः परमाणुरिति। ...तथा घातिसूक्ष्मत्वात् परमाणोर्विभागो न संभवत्याशयः* (१९९८ :३९९) ।

परमाणुविषये सूत्रकारवचनं स्पष्टीकुर्वन् भाष्यकार 'स्पर्शवांश्चाणुर्नित्यः' (?) इत्यभिदधाति । भाष्यकारो वदति यत् यत्तावत् परमसूक्ष्मं यतो सूक्ष्ममन्यन्नास्ति, यच्च कार्याणां कारणं सत् स्वयमकारणं भवति तत् परमाणुरिति ज्ञापयति -

निरवयवत्वं खलु परमाणोर्विभागैरल्पतरप्रसङ्गस्य (अभावात्) यतो नाल्पीयस्तत्रावस्थानात् ।
लोष्टस्य खलु प्रविभज्यमानावयवस्याऽल्पतरल्पतममुत्तरमुत्तरं भवति स चायमल्पतरप्रसङ्गः
यस्मान्नाल्पतरमस्ति=यः परमोऽल्पस्तत्र निवर्तते, यतश्च नाल्पीयोऽस्ति तं परमाणुं प्रचक्ष्महे

इति (वास्त्यायन, १९९८ : ३९९) एतावता यच्च परमाल्पतरत्, निरवयवं, विभागरहितमेव परमाणुतत्त्वमिति । सूत्रभाष्यकारयोरभिप्रायं स्पष्टीकुर्वन् वदति वार्तिककारः यथा ह्यस्माभिर्दृश्यमानं पृथिव्यादिघटादिकस्य कारणं व्यक्तं दृश्यते, तत्कारणं यतो जायते तत्सामान्यात् तदपि व्यक्तमुच्यते । सामान्यञ्च रूपादियोगः । एतावता रूपमद्भिः परमाणुभिः कपालादिकं जायत इति स्पष्टम् । तच्च परमाणुजातं निरवयवम्, अकारणम् । सावयवत्वे सकारणत्वे च चानवस्थापत्तिः (उद्योतकरः , १९९७ : ४२९, ४७९) । तात्पर्यकारश्च पृथिव्याद्यवयविकार्यभूतानां मूलकारणत्वे पार्थिवादिपरमाणून् स्वीचकार (१९९० : ५९०,६३५) । स चाग्रे परमाणुश्च निरवयवः, परमत्वविशिष्ट इति वदति -

...निरवयवत्वं तु परमाणोरिति । ...परमत्वविशिष्टो ह्यणुः परमाणुर्यत क्षोदीयो नापरमस्तीति यावत् । तस्मादपि चेत् क्षोदीयोऽन्यदस्ति नैष परमत्वविशिष्टो अणुरित्यर्थः (६४८-९) । एतावता निष्कर्षे न्यायवैशेषिकमते दृश्यमानानां पृथिव्यादीनां मूलं निरवयवं तत्त्वमेव परमाणुरिति सिद्धम् ।

२.२ पाश्चात्त्यपरमाणुवादविचारः

अत्र प्रसङ्गे परमाणुवादविषये दर्शनदृष्ट्या प्रस्तूयमानत्वात् पाश्चात्यपरमाणुवादिनाम् एम्पेडोक्लीज-एनेक्जागोरस-ल्युसिपस-डेमोक्रिटसादीनां परमाणुविषयकाणि चिन्तनान्यत्र प्रस्तूयन्ते । तत्र परमाणुवादिषु एम्पेडोक्लीजस्य प्रथमत्वात् तत एव विव्रियते ।

(क) एम्पेडोक्लीजः

एम्पेडोक्लीजस्य मते अस्य जगतः कारणभूतानि पृथ्व्यादीनि चतुर्महाभूतानि किं वा तेषामणव एव । एतेषां मूलद्रव्याणां कृतेऽनेन क्रमशः एडोनियसः, जीयसः, हेराः एवं नेस्टीजः इति पौराणिकदेवानां संज्ञा प्रयुक्ता । अत्र भ्रमो मास्तु यत् किं धार्मिकदृष्टया आध्यात्मिकदृष्टया वा तथा प्रयोगो विहितः ? इति, परन्तु मूलधातूनां कृते एव, यतो जगदुत्पत्तिर्भवति । कविताशैल्या अभिव्यक्तत्वादेव तथा जातम् (दयाकृष्ण, १९८८ : ११२) । एतेषां प्रत्येकं स्वभावो विरुद्धात्मको वर्तते । पृथ्वी तावच्छुष्का, जलं च द्रववत्त्वात्मक़म्, अग्निश्च उष्णः, वायुः प्रवहणशीलः, शीतलश्च । एतेषु परस्परमेकेन उत्पाद्यमानं तत्त्वं नान्येन उत्पाद्यते, न वा तत्र पञ्चीकरणसिद्धान्ते इव किञ्चन्मात्रं प्रयुक्तं भवति । एतानि च नित्यानि । एतेभ्य एव विश्वस्मिन् सर्वाण्यपि चेतन-अचेतनरूपाणि वस्तूनि उत्पद्यन्ते । एतेषां मूलतत्त्वानां भिन्नानुपाततया संयुक्तीकरणात् समानजातीयानि नैकानि वस्तूनि जायन्ते । एतेषां विभागः एव जगद्विनाशः, संयोग एव तत्सृष्टिः (तिवारी, १९९६ : ३०) । तत्र जगन्मूलभूतानां पृथ्व्यादीनां तत्त्वानां संयोगवियोगसम्पादनार्थं तेन प्रेमघृणासिद्धान्तः स्वीकृतः । प्रेम तावदाकर्षणं घृणा च विकर्षणम् । प्रेम संयोगस्य जनकञ्चेत् घृणा वियोगस्य (शर्मा, २००३ : १०) । अत्रावधेयं यद् अत्र विव्रियमाणं प्रेम, घृणा च नास्मासु यथा प्रेम घृणा भवतस्तथा मनौवैज्ञानिकतत्त्वमपि तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भौतिकतत्त्वमेव (दयाकृष्ण, १९८८ : ११४) । केचन तु एतत्तत्त्वं मानसिकं प्रतीयते इत्यपि आचक्षते (या.मसीह, २००५ : ३२) । यद्यपि अनेन जगन्मूलत्वेन परमाणुतत्त्वमेव स्वीकृतं परन्तु स्वरवेणैव तथा नोक्तम् ।

(ख) एनेक्सोगोरसः

एम्पेडोक्लीजस्य चिन्तने प्रत्येकं मूलभूतं तत्त्वं सर्वथा भिन्नं भवति । यथा पार्थिवे तत्त्वे न लेशतोऽपि जलीयतत्त्वांशो भवति, न वा जलीये तत्त्वे पार्थिवादीनामन्येषां तत्त्वानां लेशतोऽप्यंशो भवति । तद्विपरीततया एनेक्जागोरसस्य मते तु प्रत्येकं तत्त्वे अन्यतत्त्वांशो भवति । अन्यांशश्च विरोधी वा स्वगुणानुरोपो वा भवेन्न तत्र विप्रतिपत्तिरिति । निदर्शनञ्च पृथ्व्यां वायोर्गुणा: अग्नौ जलीयगुणाः भवन्ति एव । तर्हि न हि किञ्चन एकं वस्तु स्यादेनकविधमिश्रितत्वादिति चेन्न, यथा पञ्चीकरणसिद्धान्ते यथा यस्याधिकांशो भवति तेनैव नाम्ना वस्तु व्यवह्रियते तथैवात्रापि च । यथा हि जले जलीयं मूलमणुरूपं तत्त्वमतिरिच्य पार्थिवादितत्त्वेषु सत्स्वपि जलीयतत्त्वस्याधिक्याज्जलमिति व्यवह्रियते (त्रिपाठी, १९८८ : १२१) । एतच्चान्यथापि व्याख्यातुं शक्यते - एम्पेडोक्लीजानुसारेण वयं यदि जगत्स्थानां वस्तूनां विभजनं कारं कारमग्रे गच्छामश्चेत् अन्तावस्थायां जगतो मूलतत्त्वं प्राप्नुमः, यतो जगज्जायते । तच्च पार्थिव-जलीय-तेजस-वायवीयरूपं चतुर्विधमेव । एनेक्जागोरसस्य मते तु वयमसीमितरूपेण विभजनं कारं कारमग्रे गच्छेम अपि तु अमिश्रितं शुद्धं तत्त्वं न प्राप्नुमः, यस्मिन् विरुद्धतत्त्वं मिश्रितं न स्यात् । एतावता जगत: सर्वमपि वस्तु अनन्तधर्मकं यथा जैना मन्वते - अनन्तधर्मकं वस्त्विति (श्रीवास्तव, २००० : ८०) । यदा हि विभजनं कारं कारमग्रे गच्छामस्तदा यदन्तिमं तत्त्वं तदेव परमाणुः । तच्च तत्त्वं नैकविधमस्य मते ।

(ग) ल्युसिपस-डेमोक्रिटसौ एम्पेडोक्लीजएनेक्जागोरसाभ्यां जगत्सृष्टिविषये तदस्तित्वविषये परमाणुवादविषये च प्राकृतिकव्याख्यानार्थं वैज्ञानिव्याख्यानार्थञ्च मार्गप्राशस्त्यं विहितम् । यत्कार्यं न केवलं दार्शनिकक्षेत्रेऽपि तु वैज्ञानिकक्षेत्रे च परमाणुवादिसिद्धान्तत्वेन ज्ञायते इति विदुषामभिमतम् । यद्वा तयोश्चिन्तनं तावद् वैज्ञानिकचिन्तनस्य आधारभूमित्वेन प्रसिद्धिमगात् । एतयोश्च परमाणुवादिसिद्धान्तः पक्वदार्शनिकसिद्धान्तत्वेन पूर्णवैज्ञानिकसिद्धान्तत्वेन च प्रतिपादनीय आसीत्, यच्च कार्यं ल्युसिपस-डेमोक्रिटसाभ्यां सम्भालितमिति मनुते विद्वज्जनसन्दोहः (त्रिपाठी, १९८८ : १२८) ।

परमाणुवादिदर्शनक्षेत्रे ल्युसिपस-डेमोक्रिटसयोर्विचारसाम्यात् कृतीनां परस्परं सम्मिश्रितत्वाच्च तयोः योगदानविषये, वैशिष्ट्यविषये च पृथक्त्वेन व्याख्यातुं शक्यत नेदानीं यावत् । अतश्चोभयोः विचाराणां एकसाम्प्रदायिकत्वेन प्रतिपादनं कुर्वन्ति विद्वासः (पूर्ववत्, : १२९) । किञ्च एतयो रचितासु कृतिषु, लिखितेषु लेखेषु च कियत् केन कियत् केन रचितं लिखितं वा न निश्चेतुं शक्यते '(श्रीवास्तव, २००० : ८५) । प्रथमन्तावत् पूर्ववर्त्तिनोरेम्पेडोक्लीज-एनेक्जागोरसयोश्चिन्तनेष्वाभ्यां कुत्र विषयेष्वैकमत्यं कुत्र वा वैमत्यं प्रकटितमिति विचा र्यते -

(अ) एताभ्यामपि एम्पेडोक्लीज-एनेक्जागोरसाविव जगदुत्पत्तिर्नाम मूलतत्त्वानां संयोगश्चेत् विनाशो नाम तेषां वियोग इत्युररीकृतम् ।

(आ) समन्वयविषये एम्पेडोक्लीज-एनेक्जागोरसाभ्यां गुणात्मकसमन्वयः कृत आसीच्चेत् ल्युसिपसडेमोक्रिटसाभ्यां परिमाणात्मकसमन्वयः कृत आसीत् । एतेन किं प्रतिफलति चेत् - एम्पिडोक्लीज-एनेक्जागोरसयोः मते अणुतत्त्वेभ्यो जातेषु वस्तुषु भेदः कारणगतगुणभेदाज्जायते परन्तु ल्युसिपस-डेमोक्रिटसयोः मते परमाणुषु न गुणगतभेदो वर्ततेऽपि तु परिमाण-आकार-संख्यागतभेदो वर्तते । सृष्टिमूलभूतेषु तत्त्वेषु गुणगतभेदाभावेऽपि तेभ्य उत्पन्नेषु वस्तुषु कथं भेद इति चेत् संख्याकार-परिमाणभेदादेवेति (श्रीवास्तव, २००० : ८६) ।

(इ) परमाणुगतगतिविषये च तेषां मतभेदो दृश्यते । एम्पेडोक्लीजमते प्रेमघृणातत्त्वतः परमाणुषु गतिः/कर्म जायते । एनेक्जागोरस्य मते नाउसतत्त्वतो गतिर्जायते चेत् ल्युसिपस-डेमोक्रिटसयोः मते परमाणुषु स्वाभाविकतया गतिर्भवति, न तु कुतश्चन कारणादुत्पद्यते (जाटव, : १२) ।

(घ-अ) ल्युसिपसडेमोक्रिटसयोः परमाणुवादः

ल्युसिपस-डमोक्रिटसयोः परमाणुवदिचिन्तनं पाश्चात्यदार्शनिकक्षेत्र अतीव महत्त्वमूर्णं मन्यते । अत्र चिन्तने यदि वयं किञ्चन निर्मितं वस्तु गृहीत्वा विभजनं कारं कारमग्रे गच्छामश्चेत्तादृशामवस्थां प्राप्नुमः, यस्यां तन्न विभजयितुं शक्यते । तादृशमविभाज्यमतीन्द्रियमुत्पत्तिविनाशरहितमणुरूपं तत्त्वमेव ल्युसिपसमहोदयेन परमाणुसंज्ञया व्यवहृतम् । यच्च चिन्तनं डेमोक्रिटसेन न केवलं स्वीकृतमपि तु व्यापकं प्रतिपादितमान्तं विवृतञ्चेति (त्रिपाठी, १९८८ : १३०) ।

एतयोर्द्वयोर्मते सर्वे च परमाणवः समतात्त्विकाः । तदुत्पन्नानि वस्तूनि तु परमाणूनामाकारभेदात् तेषां विन्यासादिभेदाद् भिद्यन्ते (श्रीवास्तव, २००० : ८९) । यथा हि आंग्लवर्णेषु इत्यनयोः परस्परमाकारे भेदः, तथैव इत्यनयोः स्थितिकारणादाकारे भेदः, इत्यनयोः विन्यासभेदात् भेदः । एवञ्च संख्यासु च १, २ इत्यनयोः परस्परमाकारे भेदः । ३,६ इत्यनयोः स्थितिकारणादाकृतौ भेदः । १२, २१ इत्यत्र भिन्नक्रमेण विन्यासात् भेदो वर्तते (उदीच्यः, सम्वत् २०१८ : ११२) । तथैव परमाणुतो जातेषु वस्तुषु भेद इति । ल्युपिसस-डेमोक्रिटसयोः परमाणुवादप्रतिपादकैः पाश्चात्यविद्वद्भिर्न खलु परमाणुषु चैतन्यमुररीकृतं दृश्यते परन्तु जुग्गीलालसदृशाः केचन पाश्चात्यप्रतीच्योभयदर्शनविदः पौरस्त्यचिन्तका डेमोक्रिटसस्य मते परमाणुषु चैतन्यं स्वीकृतमित्यामनन्ति :

विश्वोत्पत्तौ मूलकारण(मिष्टक?)स्वरूपाः परमाणवः । परमाणुर्हि परमसूक्ष्मं चेतनं स्वतः
क्रियाशीलमविभाज्यं तत्त्वमस्ति । ...तादृशाः विविधाः परमाणवश्चेतनत्वात् स्वतो
गतिशीलत्वात् अन्यै परमाणुपुञ्जैः सह सम्प्रयुक्ताः सन्तो जगदुत्पादयन्ति (सम्वत् २०१८ : ११२) ।

केचन विद्वांसो वस्तुभेदात् परमाणुगताकारभेदमुररीकुर्वन्ति । ते च कथयन्ति सुवर्णस्य परमाणव एकप्रकारकाः, सर्वे समानाश्चेत् मृत्तिकायाः एकप्रकारकास्सर्वे समाना इति :

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकस्यैव तत्त्वस्य परमाणवः एकप्रकारकाः भवन्ति । यथा सुवर्णस्य परमाणवस्सर्वे समानाः, ताम्रस्य परमाणवः सर्वे समानाः, गन्धकस्य परमाणवः सर्वे समानाः । परन्तु गन्धकस्य परमाणवः सुवर्णरजतादीनां परमाणुभ्यो भिन्नाः भवन्ति (उदीच्यः, सम्वत् २०१८ : ११२) ।

परमाणूनामविभाज्यत्वात् तेषु घनत्वाभेद्यत्वादिधर्मास्तेष्वपेक्षिता एवातस्तेषु न रिक्ततेति (त्रिपाठी, १९८८ : १३०) ।

परमाणुभारविषये च यूनानिदर्शनविदां वैमत्यं दृश्यते । तत्र तावत् केचन वदन्ति - डेमोक्रिटसाभिमतपरमाणुषु वैतन्यम् आकारो वा एवं स्वरूपम्(Form) आस्ताम् । परन्तु एपिक्युरसेन भारश्चाभिमतः इति । परन्त्वन्ये परमाणुषु भारस्तावत् स्वयं डेमोक्रिटसेन स्वीकृत आसीदिति आचक्षते (श्रीवास्तव, २००० : ९१) ।

वस्तुतो जगत्सृष्टिविषये डेमोक्रिटसेनेत्थं विवृतं यत् परमाणवो भारवन्तः, ते च स्वाभाविकतया अधः पतन्ति । अधिकभारवन्तोऽधिकवेगवत्त्वेन पतन्ति चेन्न्यूनभारवन्तो न्यूनवेगेन पतन्ति । फलतः समानाकारकाः, समानभारवन्तश्च परमाणूनां संघटने सृष्टिः प्रारभ्यते (जाटव, २००४ : xiii) ।

निष्कर्षे ल्युसिपसस्तावत् वैज्ञानिकपरमाणुवादस्य संस्थापकः । डेमोक्रिटसश्च तस्य प्रवर्द्धकः, प्रमुख व्याख्याता च । तयोर्मते परमाणुतः जगज्जायते । परमाणवश्च न गुणगतभेदवन्तोऽपि त्वाकारविस्तार-भारगतभेदवन्तः । तेषु स्वाभाविकतया गतिर्भवति । तत्र तावत् गतेर्व्यवस्थापकत्वेनाधिष्ठातृत्वेन वा शून्याकाशतत्त्वमपि उररीकृतम् । जीवानाञ्चोत्पत्तिः पार्थिवपङ्कतः, यच्च परमाणुरूपमेव ।

(ङ) एपिक्युरसः

अनेन च चिन्तितः परमाणुवादो मूलतो डेमोक्रिटसस्य परमाणुवादे आधृतो वर्तते । जगति स्थितानि सर्वाण्यपि कार्यवस्तूनि तेभ्य एव परमाणुभ्यो जातानि । परमाणवश्च नित्याः, अविभाज्याः, अपरिवर्तनीयाश्च । तेषु आकारविस्तारभारगतभेदमतिरिच्य नान्यगुणगतो भेदः । जगति न हि कस्यचन वस्तुनः आत्यन्तिकी उत्पत्तिर्न वात्यन्तिको विनाशः, परन्तु अत्र उत्पत्ति-विकास-परिवर्तनानि यानि दृश्यन्ते, तानि जगन्मूलभूतानां तत्त्वानां संयोगवियोगरूपाण्येव इति डेमोक्रिटसस्यैव मतं स्वीकरोति अयम् एपिम्युरसश्च । परमाणुषु गुणगतभेदाभावेऽपि जगति जातानां/वर्तमानानां वस्तूनां यो भेदोऽनुभूयते, स तु परमाणूनां पारस्परिकसम्बन्धभेदादिति (श्रीवास्तव, २००० : १९४) ।

एतावता उक्तविवरणेन ज्ञायते यत् परमाणुचिन्तनविषये डेमोक्रिटस-एपिक्युरसयोः प्रायः साम्यं दृश्यते । वैषम्यञ्च कुत्र ? इति चेत् - परमाणुगतिविषये । यद्यपि उभयमते परमाणवो नित्यगतिकाः, अपि तु डेमोक्रिटसस्य मते परमाणुषु चक्रीयगतिवर्तते । यतश्च तेषु घातप्रतिघातयोः सतोः न्यूनभारवन्तः, अधिकभारवन्तश्च पृथक् पृथक् विभक्तेषु सत्सु पृथिव्यादीनामुत्पत्तिः स्यात् । परन्तु एपिक्युरसस्य मते परमाणवः शून्याकाशे लम्बीयगतिकाः सन्तः अधः पतन्ति । तत्र समानगतिमत्त्वात् तथैव वेगवत्त्वाच्च तेषु घातप्रतिघातौ असम्भवौ । तथा पतत्सु तेषु परमाणुषु नैसर्गिकात्मस्फूर्तितः/आत्मस्फोरणबलात् घातप्रतिघातौ जायेते न तु चक्रीयगतितः (तिवारी, १९९६ : १२८) ।

निष्कर्षे एपिक्युरसमते गुणगतभेदाभाववद्भ्योऽपि त्वाकार-भार-परिमाणगतभेदवद्भ्यः परमाणुभ्य एव जगज्जायते । अस्य मतेऽपि परमाणवो गतिशीला एव परन्तु न चक्रीयगतिकाः अपि तु लम्बीयगतिका इति ।

एपिक्युरसानन्तरं पाश्चात्यपरमाणुवादिदार्शनिकेषु लुक्रेशियो (खैष्टाब्दपूर्वम्, ९८-५५) नामकः परमाणुवादी दार्शनिकः प्रादुर्बभूव । अयं हि केवलं डेमोक्रिटसाभिमतपरमावादं प्रसारयामास । नास्य किञ्चन नवीनस्वोपज्ञापूर्णमनुसन्धानात्मकं कार्यं प्राप्यते (सारस्वती सुषमा, वि.स. २०१८ :११२) ।

३. उभयदर्शनदिशा परमाणुवादविषयकः साम्यवैषम्यविचारः

यद्यपि उभयत्रापि भौतिकजगदुपादानत्वेन परमाणुषु स्वीकृतेषु सत्स्वपि पाश्चात्यचिन्तने जीवात्मनाञ्च कारणत्वेन चिक्कणवर्तुलाकारा आग्नेयपरमाणवः स्वीकृताः । पौरस्त्यचिन्तने तु जीवात्मनो नित्याः । पाश्चात्यपरमाणुवादिनो मूलतो भौतिकवादिनो वर्तन्ते । काणादस्तु भौतिकवादिनोऽध्यात्मवादिनश्च । ल्युसिपस-डेमोक्रिटसाभ्यां गुणदृष्टचा सर्वे परमाणवः समानजातीयाः स्वीक्रियन्ते चेत् आकृतिसंख्यासंघटनादिदृष्टचा भिन्नाः स्वीकृताः । काणादास्तु गुणगतभेदमपि स्वीकुर्वन्ति । कणादमते परमाणुषु केचन नित्याः केचन आगन्तुका गुणा भवन्ति । यथा पार्थिवपरमाणुगताः कतिपयगुणा आगन्तुका भवन्ति चेज्जलीयादिषु च नित्या एव । पाश्चात्यपारमाणुवादिनस्तत्रापि मूलतो ल्युसिपस-डेमोक्रिटसयोर्मते यान्त्रिकपद्धत्या परमाणूनां मेलनम्, काणादास्तु कर्म्मवादमादायैव तेषां मेलनमिति सम्मन्यन्ते । पाश्चात्या हि विश्वोत्पत्तौ मूलत ऐकान्तिकीं भौतिकीं यान्त्रिकीञ्च व्यवस्थामुररीकुर्वन्ति । पौरस्त्यानां हि जीवानामदृष्टानुसारेण परमाणुभिर्जगद्रचयत्यत्र दृढो विश्वासः (त्रिपाठी, २०१८ : १२६) ।

एम्पेडोक्लीज-एनेक्जागोरस-ल्युसिपस-डेमोक्रिटसैः सर्वैरपि सृष्टेः मूलद्रव्यं न चात्यन्तिकं नश्यति न वोत्पद्यते इति मन्यते । तैः स्वीकृतस्य मूलद्रव्यस्य कृते एम्पेडोक्लीज-एनेक्जागोरसाभ्यां न स्पष्टतः परमाणुपदं व्यवहृतम् अपि तु तेषां व्याख्यानेन तज्ज्ञायते । ल्युसिपस-डेमोक्रिटसाभ्यान्तु स्पष्टतः परमाणुपदं व्यवहृतम् । तत्र सर्वेषां मते तेषां परमाणुपदार्थानां नोत्पत्तिर्न वा विनाशः । तथैव न्यायवैशेषिकदर्शने च जगति उत्पन्नानां वस्तूनामुपादानकारणं/समावायिकारणं परमाणुरेव । येषां नोत्पत्तिर्न वा विनाशः । यच्च चिन्तनमुभयत्रापि साम्यं याति ।

यद्यपि एनेक्जागोरसेन अनियततत्त्वानि स्वीक्रियन्ते अपि तु एम्पेडोक्लीजमते तु अणुरूपाणि जगन्मूलमूलभूततत्त्वानि पार्थिव-जलीय-तैजसभेदाच्चतुर्विधानि एव । तथैव पौरस्त्यपरमाणुवादिचिन्तने च तावन्त एव चतुर्विधाः परमाणवः स्वीक्रियन्ते । परमाणुवादविषये पौरस्त्यपाश्चात्यानां परमाणुवादिदार्शनिकानां मतानि क्रोडीकृत्य तद्गतसाम्यवैषम्यविचारा विविच्यन्ते चेन्मूलतोक धस्तनेषु विषयेषु -

(क) परमाणुविधत्वम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परमाणुविषय एम्पेडोक्लीजेन जगन्मूलकारणत्वेन चतुर्विधानि तत्त्वानि स्वीकृतानि । तानि च परमाणुरूपाणि । परन्त्वत्र विप्रतिपत्तिर्वर्तते - केषाञ्चन पाश्चात्यदर्शनविदां मते (जाटव, २००४ : x, त्रिपाठी, १९८८ : ११२) तानि परमाणुरूपाण्येव । केषाञ्चन मते त्वनेन स्वीकृतानि मूलतत्त्वानि न परमाणुरूपाणि (शर्मा, २००३ : १२) । परन्तु न्यायवैशेषिकाभिमतं घटादिकार्यवस्तुनो मूलं कारणन्तु परमाणुरेव । नास्त्यत्र कस्यापि विप्रतिपत्तिर्विरोधश्च ।

यद्यपि एनेक्जागोरसेनानियततत्त्वानि स्वीक्रियन्तेक पि तु एम्पेडोक्लीजमते तु अणुरूपाणि जगन्मूलभूततत्त्वानि पार्थिव-जलीय-तैजसभेदाच्चतुर्विधान्येव । तथैव पौरस्त्यपरमाणुवादिचिन्तने च तावन्त एव चतुर्विधाः परमाणवः स्वीक्रियन्ते । एतावता मूलतत्त्वसङ्ख्याविषये एनेक्जागोरसेनानेकविधत्वे स्वीकृतेऽपि एम्पेडोक्लीजेन तु चतुर्विधत्वस्य स्वीकृतत्वात्तच्चतुर्विधत्वे त्वनेन सह पौरस्त्यचिन्तकानामैकमत्यमिति ।

एम्पेडोक्लीजेनाग्न्यादिचतुर्विधमूलतत्त्वानाङ्कृते क्रमश एडोनियस-जियस-हेरा-नेस्टिसानां पौराणिकदेवानां संज्ञा व्यवहृिता । न्यायवैशेषिकयोस्तु परमाणूनाङ्कृते न तथा कस्यापि देवस्य संज्ञा व्यवहृिता ।

यद्यप्युभयत्रापि संसारस्यानादित्वमनन्तत्वञ्च परन्तु सृष्टिपूर्वावस्थायां प्रलयावस्थायां वा एम्पेडोक्लीजमते पार्थिवादिपरमाणुरूपाणि तत्त्वानि कुत्रचन दिव्यलोके परस्परं संयुज्य विलीनानि भवन्ति । न्यायवैशेषिकमते तु नान्यस्मिन् कस्मिंश्चन दिव्यलोके परस्परं विलीनानि भवन्ति, तद्विपरीततया आकाशमण्डले नितान्तं पृथक् पृथग् अवतिष्ठन्ते ।

एम्पेडोक्लीज-एनेक्जागोरस-ल्युसिपस-डेमोक्रिटसैरनित्यता=परिणामो नित्यता चोभयं स्वीकृतम् । तथैव न्यायवैशेषिकयोरपि परमाणवः, आकाशकालादीनि च नित्यानि स्वीक्रियन्ते । परमाणुत उत्पन्नानि वस्तूनि त्वनित्यानि ।

पाश्चात्यचिन्तने जगन्मूलभूततत्त्वानि परमाणुरूपाणि, तानि एव नित्यानि अव्यापकानि च, यतो जगति सर्वाणि अपि वस्तूनि उत्पद्यन्ते । नान्यानि नित्यानि । पौरस्त्यचिन्तने तु आकाश-काल-दिगात्मादीनि व्यापकानि नित्यानि च, यानि न कुतश्चापि उत्पद्यन्ते । यतश्च न किमपि द्रव्यजातमुत्पद्यते । एतावतास्य तात्पर्यमेतदेव यत् परमाणुरूपं व्यापकञ्च वस्तु नित्यमन्यच्चानित्यमिति पौरस्त्यानां सिद्धान्तः । पाश्चात्यचिन्तने तु न तथा व्यापकं वस्तु स्वीक्रियत इति ।

पाश्चात्यचिन्तने जगदुत्पत्तिर्नाम जगन्मूलभूततत्त्वानां संयोग एव, नाशश्च तेषां वियोग एव । तत्र कारणविषये स्पष्टं नोक्तं लभ्यते । परन्तु पौरस्त्यचिन्तने यथा परमाणवः कार्यं प्रति समवायिकारणम् । संयोगश्च कार्योत्पत्तौ असमवायिकारणम्, न तु स्वयमुत्पत्तिः । तथैव विभागात् कार्यनाशः । न तु स्वयं विभाग एव नाशः । मूलतः पाश्चात्यानाञ्च तदेव तात्पर्यं पर्यवस्यति ।

(ख) परमाणुगतिः

परमाणुषु गत्यर्थमेम्पेडोक्लीजेन प्रेमघृणात्मकं तत्त्वद्वयं स्वीकृतम्, एनेक्जागोरसेन नाउसाख्यं चेतनं तत्त्वं स्वीकृतम् । ल्युसिपस-डेमोक्रिटसमते तु परमाणवो यद्यपि स्वतो गतिशीला अपि तु तत्सम्पादनार्थं शून्याकाशतत्त्वं स्वीकृतम् । एतावता ल्युसिपस-डेमोक्रिटसाभ्यां जगन्मूलभूतं तत्त्वद्वयं स्वीकृतम् । अत्र पौरस्त्यचिन्तने तु सृष्टिकाले प्राणिनां भोगार्थं महेश्वरसिसृक्षानन्तरं सर्वात्मगतवृत्तिलब्धादृष्टापेक्षेभ्यस्तत्संयोगेभ्यः पवनपरमाणुषु कर्म्मोत्पत्तिः, ततो द्व्यणुकादिक्रमेण महान् वायुः, तत आप्येषु परमाणुषु कर्मोत्पत्तिरेवं क्रमेण सृष्टिः । एतावता च पौरस्त्यपरमाणुवादिचिन्तने न परमाणवः स्वतो गतिशीलाः, न वा तत्सम्पादनार्थं शून्याकाशतत्त्वं प्रेमघृणात्मकं तत्त्वद्वयं, नाउसाख्यं वा तत्त्वं स्वीकृतम् ।

(ग) परमाणुस्वरूपम्

ल्युसिपस-डेमोक्रिटसाभ्यां गुणदृष्टया सर्वे परमाणवः समानजातीयाः स्वीक्रियन्ते चेद् आकृतिसंख्यासंघटनादिदृष्टया भिन्नाः स्वीकृताः । काणादस्तु गुणगतभेदमपि स्वीकुर्वन्ति । कणादमते परमाणुषु केचन नित्याः केचन आगन्तुका गुणा भवन्ति । यथा पार्थिवपरमाणुगताः कतिपयगुणा आगन्तुका भवन्ति चेज्जलीयादिषु च नित्या एव । अत्र तावत्पार्थिवपरमाणुतो जलीयपरमाणवो भिन्नाः, जलीयपरमाणवः पार्थिवपरमाणुतो भिन्नाः । तत्र एकपार्थिवपरमाणुतोऽन्यपार्थिवपरमाणुस्तु न गुणगतभेदवान् । तत्र कथं भेद इति चेन्न्यायवैशेषिकदर्शनयोर्विशेषनामकः पदार्थः स्वीक्रियते । स च विशेषोक न्यविशेषात् कथं भिन्नः ? इत्यत्र तु स्वतो भिन्न इति । पाश्चात्यपरमाणुवादिचिन्तने तु न तथा विशेषाख्यः कश्चन पदार्थः कल्प्यते । तर्हि कथं परस्परं परमाणवो भिद्यन्त इति चेन्नात्र विषये स्पष्टमुक्तं लभ्यतेक पि तु पाश्चात्त्यैः स्वत इत्येव वक्तव्यम् ।

४. निष्कर्षः

पौरस्त्यदर्शनेषु सामान्यतः न्यायवैशेषिकमीमांसाबौद्धजैनेषु परमाणुवादे स्वीकृतेऽपि मूलतो न्यायवैशेषिकदर्शने एव परमाणुवादिदर्शनत्वेन विश्रुते । तत्र द्वाभ्यामपि दर्शनाभ्यां पार्थिव-जलीय-तैजस-वायवीयभेदाच्चतुविधाः परमाणवः स्वीकृताः ।

पाश्चात्यपरमाणुवादिदार्शनिकेषु प्रथमस्तावत् एम्पेडोक्लीज आसीत् । तस्य मते परमाणवस्तावत् पार्थिव-जलीय-वायवीय-तैजसभेदात् चतुर्विधाः । तेषां संयोगरूपे जगत् तद्वियोगे तु प्रलयावस्था । तत्संयोगवियोगसिद्धयर्थं तेन प्रेमघृणात्मकं तत्त्वद्वयं स्वीकृतम् ।

एनेक्सागोरसमते तु न केवलं चतुर्विधानि एव तत्त्वानि अपि तु नैकानि जगत्सृष्टिमूलभूतानि परमाणुरूपाणि तत्त्वानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाश्चात्यदर्शनजगति ल्युसिपस-डमोक्रिटसौ मूलपरमाणुवादित्वेन प्रथितयशस्कौ । एतयोर्द्वयोर्मते सर्वे च परमाणवः समतात्त्विकाः । तदुत्पन्नानि वस्तूनि तु परमाणूनामाकारभेदात् तेषां विन्यासादिभेदात् भिद्यन्ते । यथा हि आंग्लवर्णेषु M,A इत्यनयोः परस्परमाकारे भेदः, तथैव W, M इत्यनयोः स्थितिकारणादाकारे भेदः, NO, ON इत्यनयोः विन्यासभेदात् भेदः । एवञ्च संख्यासु च १, २ इत्यनयोः परस्परमाकारे भेदः । ३, ६ इत्यनयोः स्थितिकारणादाकृतौ भेदः । १२, २१ इत्यत्र भिन्नक्रमेण विन्यासात् भेदो वर्तते । सृष्ट्यर्थं परमाणुषु गतिरपेक्षिता । तदर्थं परमाणूनां रिक्तस्थानमपेक्षितं यच्च शून्याकाशमित्याभ्यां स्वीकृतम् । गतिशीलेषु परमाणुषु चक्रावर्तनं जायते । ततश्च समानाकृतिविस्तारभारकाः परमाणवोऽसमानाकृतिविस्तारभारकेभ्यः पृथक् भूत्वा परस्परं संयुक्ताः भवन्ति । तत्र स्थूलाः अधिकभारवन्तः केन्द्रे संघटिताः भवन्ति । तेभ्यश्च पृथिवी जायते । सूक्ष्माः, न्यूनभारवन्तः परिधौ संयुक्ताः भवन्ति, येभ्यस्तावत् जल-वायु-तेजः-आकाशादीनि जायन्ते । एवञ्च सूर्य-चन्द्र-तारादीनामुत्पत्तिः । एवञ्च जगत्सृष्टिः ।

एपिक्युरसस्य परमाणुवादिचिन्तनं मूलतो डेमोक्रिटसस्य परमाणुवादे आधृता वर्तते । उभयोरपि मते परमाणवो नित्यगतिकाः परन्तु डेमोक्रिटसस्य मते परमाणुंषु चक्रीयगतिवर्तते, एपिक्युरसस्य मते तु न तथेति । तदनन्तरं प्रादुर्भूतेन लुक्रेशियोनामकेन परमाणुवादिदार्शनिकेन केवलं डेमोक्रिटसाभिमतपरमाणुवाद एव व्याख्यातः प्रसारितश्च । नानेन किञ्चन नवीनं स्वोपज्ञापूर्णमनुसन्धानात्मकं कार्यं व्यधायि ।

पाश्चात्यपरमाणुवादिनः मूलतो भौतिकवादिनो वर्तन्ते । काणादस्तु भौतिकवादिनोऽध्यात्मवादिनश्च । ल्युसिपस-डेमोक्रिटसाभ्यां गुणदृष्ट्या सर्वे परमाणवः समानजातीयाः स्वीक्रियन्ते चेत् आकृतिसंख्यासंघटनादिदृष्ट्या भिन्नाः स्वीकृताः । काणादास्तु गुणगतभेदमपि स्वीकुर्वन्ति । कणादमते परमाणुषु केचन नित्याः केचन आगन्तुकाः गुणाः भवन्ति । यथा पार्थिवपरमाणुगताः कतिपयगुणाः आगन्तुकाः भवन्ति चेत् जलीयादिषु च नित्या एव । पाश्चात्यपारमाणुवादिनस्तत्रापि मूलतो ल्युसिपस-डेमोक्रिटसयोर्मते यान्त्रिकपद्धत्या परमाणूनां मेलनम् । काणादास्तु कर्म्मवादमादायैव तेषां मेलनमिति सम्मन्यन्ते । पाश्चात्या हि विश्वोत्पत्तौ मूलत ऐकान्तिकीं भौतिकीं यान्त्रिकीञ्च व्यवस्थामुररीकुर्वन्ति । पौरस्त्यानां हि जीवानामदृष्टानुसारेणेश्वरः परमाणुभिः जगद्रचयत्यत्र द्रढीयान् विश्वासः । एतावता निष्कर्षे पौरस्त्यपाश्चात्योभयविधपरमाणुवादिदार्शनिकानां मते परमाणुरेव जगतो मूलभूतः पदार्थः । स च नित्यः ।

सहयोगिग्रन्थसुची

उदयनाचार्यः, (संवत् २०१९), लक्षणावली, सम्पादकः शशिनाथशर्मा, दरभङ्गा : मिथिलाविद्यापीठम् ।

उद्योतकरः, भारद्वाजः, (१९९७), न्यायभाष्यवार्तिकम् (अनन्तलालठक्कुरेण संस्कृतम्), दिल्ली : भारतीयदार्शनिकानुसंधानपरिषद् ।

उदीच्यः, जुगगीलालः (सस्वत्. २०१८), प्राचीनार्वाचीनपरमाणुपर्यालोचनम्, सारस्वती सुषमा १६ : १-२ (वि.स.२०१८), पृ. ८६-१२३) ।

ऋग्वेदः ।

चन्द, दीवान (२००५), पश्चिमी दर्शन (चतुर्थ संस्करण), लखनऊ : उत्तर प्रदेश हिंन्दी संस्थान ।

जाटव, डी. आर (२००४), प्रमुख पाश्चात्य दार्शनिक (अष्टम संस्करण), जयपुर : राजस्थान हिन्दी ग्रन्थ अकादमी ।

झा, आनन्द (१९६५), पदार्थशास्त्र, लखनऊ : हिन्दी समिति सूचना विभाग ।

तर्कवागीश, फणिभूषण (१९६८), न्यायपरिचय, वाराणसी : चौखम्वाविद्याभवन ।

त्रिपाठी, सी. एल. (१९८८), 'परमाणुवादी दर्शन', पाश्चात्य दर्शन का इतिहास, सम्पादक दयाकृष्ण (द्वितीयावृत्ति), जयपुर : राजस्थान हिन्दी अकादमी ।

त्रिपाठी, केदारनाथः (वि.स.२०१८), प्राचीनार्वाचीनपरमाणुविचाराणां प र्यालोचनम्, सारस्वती सुषमा १६ : १-२ (वि.स.२०१८), पृ. ८१२५-१३४) ।

देवाचार्यः, प्रशस्तः (१९९७), प्रशस्तपादभाष्यम् (न्यायकन्दलीयुतम्), सं. हिन्दीव्याख्याकारश्च श्रीदुर्गानन्द झा, वाराणसी : हरिश्चन्द्रमणि त्रिपाठी ।

न्यायसूत्रम् ।

भासर्वज्ञः (१९६८), न्यायभूषणम्, वराणसी : षड्दर्शनप्रकाशनप्रतिष्ठानम् ।

मसीह, या. (१९९४), पाश्चात्य दर्शन का समीक्षात्मक इतिहास (पाँचौ संस्करण), दिल्ली : मोतीलाल वनारसीदास ।

मिश्र, नारायण (१९६८), वैशेषिकदर्शन : एक अध्ययन, वाराणसी :चौखम्वा विद्याभवन ।

वात्स्यायनः, (१९९८), न्यायभाष्यम् (प्रसन्नपदापरिभूषितम्), अभिनवसंस्करणम्, वाराणसी : वौद्धभारती ।

वैशेषिकसूत्रम् ।

शर्मा, चन्द्रधर (१९९८), भारतीय दर्शन : आलोचना और अनुशीलन (पुनर्मुद्रण संस्करण), दिल्ली : मोतीलाल वनारसीदास ।

.... (२००३), पाश्चात्य दर्शन (पुनर्मुद्रण संस्करण), दिल्ली : मोतीलाल वनारसीदास ।

शर्मा, राममूर्ति (विम्वत्२०५४), न्यायवैशेषिक एक चिन्तन, दिल्ली : राष्ट्रियसंस्कृतसंस्थानम् ।

शर्मा, वासुदेवः, ईशाद्यष्टोत्तरशतोपनिषदः (२००३), दिल्ली : राष्ट्रियसंस्कृतसंस्थानम् ।

श्रीवास्तव, जगदीश सहाय (२०००), ग्रीक एवं मध्ययुगीन दर्शन का वैज्ञानिक इतिहास (पञ्चम संस्करण), इलाहावाद : किताव महल ।

हसूरकर, श्रीपादशास्त्री (१९९३), द्वादशदर्शनसोपानावलिः, वडोदरा : गुड कम्पेनियन्स् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वैदिक संस्कृतिमा सामाजिक व्यवस्था

प्रा.माधवराज गौतम

१. प्रारम्भ – वैदिक साहित्यको परिवेश देश कालको संकुचित सीमाहरू भन्दा धेरै विस्तृत छ । त्यसै गरी वैदिक संस्कृति पनि कुनै स्थान या कालको परिधिमा वाधिएको छैन । त्यसैले यो शाश्वत र सार्वभौम छ । यसले युगौं युगसम्म मानवमात्रलाई मार्गदर्शन गर्ने क्षमता राख्दछ । यदि आज पनि मनुष्यले वैदिक संस्कृति र समाजका उदार एवं सर्वजन कल्याणकारी नियमहरूलाई पालन गरेको खण्डमा वर्तमान समयका धेरै संकट र विसंगतिहरूवाट मुक्त हुने कुरामा सुनिश्चित हुन सकिन्छ ।

वेदमा जुन कर्मको विधान गरिएको छ, त्यसलाई धर्म र जुनको निषेध गरिएको छ त्यसलाई अधर्म भनिन्छ । वेदलाई पौरस्त्य मान्यतामा नारायण स्वरूप एवं उनको स्वाभाविक श्वास प्रश्वास रूप स्वयं प्रकाश ज्ञान मानिएको छ ।[१] यसलाई साक्षात्कृतधर्मा तपोलीन महर्षिहरूद्वारा प्रत्यक्ष दृष्ट मानिन्छ । विद्यमान पदार्थहरू नै दृष्ट हुने हुँदा वेद पहिले देखि नै अस्तित्वमा रहेको तथ्य यस सन्दर्भमा स्मरणीय हुन आउँछ ।[२] यो शब्द विभिन्न अर्थ र गणहरूमा रहेका पाँच धातुहरूवाट करण या भाव अर्थमा घञ् प्रत्यय भएर निष्पन्न हुन्छ । यस शब्दले ज्ञान, पुरुषार्थ चतुष्टय (धर्म, अर्थ, काम र मोक्ष) प्राप्त गर्ने उपाय, सृष्टि प्रकियाको विचार, चैतन्य, नामकर्म-स्वरूप आदिको आख्यान र निवास आदि अर्थलाई वोध गराउँछ ।[३] यसरी सार संक्षेपमा भन्दा मन्त्र ब्राह्मणात्मक रूप यो वेदशब्द आधिभौतिक, आधिदैविक एवं आध्यात्मिक रूप त्रिविध अर्थको प्रतिपादक, पुरुषार्थ चतुष्टयको साधक तथा समस्त पौरस्त्य ज्ञान-विज्ञानको संवाहकका रूपमा रहेको छ ।

२. वैदिक संस्कृति – पाणिनीय व्याकरण अनुसार सम् उपसर्ग पूर्वक कृञ् धातुवाट क्तिन् प्रत्यय भएर निष्पन्न संस्कृति शब्दले कुनै व्यक्ति, जाति या राष्ट्र आदिका ती कुराहरू, जुन उसको मन, आचार, विचार, कला, कौशल र सभ्यताको क्षेत्रमा भए गरेका वौद्धिक विकासका सूचकको काम गर्दछ । उपर्युक्त अर्थहरूको आधारहरूमा भन्दा यस धराधाममा मानव जन्मका साथै संस्कृतिको पनि उदय भएको तथ्य स्पष्ट हुन्छ । मानव जीवनको विकासका साथै यसका पथहरू पनि अनेक रूपमा अङ्कुरित, पल्लवित र पुष्पित हुँदै निरन्तर अगाडि वढिरहेका छन् । मानव-जीवनको इतिहास निर्माणमा जति पनि साधनहरू रहेका छन्, त्यसमा संस्कृतिको स्थान मुख्य रहेको छ । कुनै पनि राष्ट्रको वर्तमान र अतीतको लेखा-जोखा त्यसको संस्कृतिवाट नै हुने गर्दछ । संस्कृति नै त्यसको उन्नति र प्रगतिको मापदण्ड हो । संस्कृतिको क्षेत्र अत्यन्त व्यापक छ र त्यसलाई निर्माण गर्ने साधनहरू पनि अनेक रहेका छन् । त्यसैले विश्वका कुनै पनि जाति या राष्ट्रले आफ्नो चारित्रिक एवं वौद्धिक उन्नयनमा कति विकास गरेको छ ? भन्ने सजीव रूप त्यसको संस्कृतिमा देख्न सकिन्छ । यदि हामीले कुनै जाति वा राष्ट्रलाई सुसंस्कृत भन्छौं भने त्यहाँ हाम्रो आशय त्यसको साहित्यिक सम्पन्नता र विशालतासँग हुन्छ । विश्वका जुन जाति या राष्ट्रले अज्ञात अतीतवाट आफ्नो सांस्कृतिक गौरवलाई सुरक्षित राखेका छन्, तीमध्ये हाम्रो वैदिक आर्यसंस्कृतिको नाम अग्रणी रहेको छ । हाम्रा परम्पराद्वारा निर्मित एवं हाम्रा पूर्वजहरूद्वारा अर्जित सांस्कृतिक निधि यस नेपालराष्ट्रका हरेक विचार, आस्था र व्यवहारमा व्याप्त एवं विद्यमान छन् ।

३. समाज – समाज शब्द सम् उपसर्गपूर्वक 'अज गतिक्षेपणयोः' (हिँड्नु) धातुवाट घञ् प्रत्यय भएर निष्पन्न हुन्छ ।[४] समाज मानव जातिको संगठन हो । जहाँ मनुष्यहरू मिलेर एकै साथ एउटै गतिले हिँड्दछन् त्यही समाज हो । अर्को शब्दमा भन्दा मनुष्यहरूद्वारा एकै साथ रहेर एक आपसमा मिलेर एक अर्कालाई सहयोग गर्दै जीवन यापन गर्नु नै समाज हो । जहाँ यो सहयोगको भावना अत्यधिक सामञ्जस्यपूर्ण र सुदृढ हुन्छ, त्यही समाज उन्नत हुन्छ । समाजसँग मिल्दो जुल्दो शब्द हो - समुदाय । जहाँ मनुष्यहरू एक ठाउँमा रहेर एकै प्रकारका नियमहरूको अधीनमा जीवन निर्वाह गर्दछन्, समान कुरामा रुचि राख्दछन्, एउटै उद्देश्य पूर्तिका लागि काम गर्दछन्, जसमा सवैका हितको भाव निहित हुन्छ, तिनको समुच्चयलाई समुदाय भनिन्छ र यस्तो समुदायको नाम नै समाज हो । मानव एउटा सामाजिक प्राणी हो । मानव जन्मवाट लिएर मृत्युपर्यन्त समाजमा नै रहन्छ, समाजमा नै रहेर आफ्नो हितका लागि काम गर्दछ । समाजभन्दा पृथक् मानव हुन सक्दैन । त्यो त समाजको एउटा अङ्ग वा अवयव हो । यति मात्र हैन सवै प्राणी समाजका अङ्ग हुन्, जसको सहयोगवाट हाम्रो जीवन चलिरहेको छ, हाम्रो अर्थ र कामको सिद्धि भइरहेको छ । कृषक, श्रमिक, व्यापारी आदिले समाजमा अङ्गका रूपमा समाजको हितका लागि कार्य गर्दछन् । उनीहरूमा मैत्री, उदारता, आत्मसंयम, परार्थसाधन आदि गुणहरू रहेका छन् । यिनै गुणहरूको समुदयले नै मानवलाई परार्थ साधनरूप धर्म र मोक्षतर्फ लैजान्छ । मानवमा सहयोगको भावना भएर नै समाज समुन्नत हुन जाने हो र जब समाज समुन्नत

---

[१] एवं वा अरे अस्य महतो भूतस्य निश्वसितमेतद् यद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः । वृहदारण्यकोपनिषद् २।४।१० ।

[२] साक्षात्कृतधर्माण ऋषयो वभूवुः । ते अवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रात् सम्प्रादुः । निरुक्त १।६।२० । महर्षि कृष्णद्वैपायन वेदव्यासले वेद शब्दको यस सत्स्वरूपलाई

[३] विद-ज्ञाने - वेत्ति=जानाति धर्मादिपुरुषार्थचतुष्टयोपायान् अनेन इति वेद, विद-सत्तायाम् प्रतिपादन गर्दै भनेका छन् – अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा । आदी वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ॥ –महाभारत । विद्लृ-लाभे (तौदादिक) विन्दन्ति=लभन्ते धर्मादिपुरुषार्थान् अनेन इति वेदः । विद=विचारणे (रुदादि) विन्ते=विचारयति सृष्ट्यादिप्रक्रियाम् अनेन इति वेदः । यस विचार अर्थलाई ऋग्वेद १०।१९०।३ र भागवत ३।९।४३ ले 'धाता यथापूर्वमकल्पयत्' भनेर स्पष्ट गरेका छन् ।

[४] सम् अजन्ति जना यस्मिन् इति समाजः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हुन्छ व्यक्ति पनि समुन्नत हुन जान्छ । समाज व्यक्तिका लागि हुन्छ र उसले पनि सकाजका लागि काम गरोस् भन्ने अपेक्षा गरिन्छ । यही नै समाजको सामाञ्जस्य हो ।

४. वैदिक समाजमा सामञ्जस्य – वेदका अनेक उक्तिहरूमा यस्तो सामञ्जस्य र तदनुरूपको सामाजिकभाव स्पष्ट रूपमा देखन सकिन्छ । वेदको निर्देशन छ – समान मन भएका मित्र भएर जाग ।[५] आफूमा सवै प्राणीहरूमा देख्नु वेदको समभाव हो । यो समत्व जव मनमा आउँछ, अर्काप्रतिको घृणाभाव स्वत: समाप्त भएर जान्छ ।[६] वस्तुत: यो भावना पारिवारिक सौमनस्यवाट नै पल्लवित र पुष्पित हुन्छ । त्यसैले अथर्ववेदको एउटा सूक्तभा माता–पिता तथा पुत्र, भाइ–भाइ, भाइ-वैनी र पति-पत्नीहरूको एक आपसमा पूर्ण सौमनस्यको कामना गरिएको छ ।[७] परिवारवाट नै अगाडि वढेर त्यो सौमस्यको परिणति पूर्ण समाजमा हुन जान्छ । वेदले सम्पूर्ण विश्वलाई एक समाज मानेर एकै साथ हिंड्ने र समान विचार राख्ने प्रेरणा दिएको छ । जसको कारण सवै एक आपसमा मिलेर सुखपूर्वक रहन सकून् ।[८] यसरी 'वसुधैव कुटुम्वकम्'को शङ्खनाद गर्ने वैदिक संस्कृतिमा समाजको स्वाभाविक विषमतालाई पनि सहज रूपमा स्वीकार गरिएको छ । उसको धारणा छ – न त दुई हातले समान कार्य गर्न सक्दछन् र न त जुम्ल्याहा दुई भाइका कार्यहरू एक समान हुन्छन् ।[९] यो कुरा यस कारण पनि स्वाभाविक लाग्दछ – प्रकृतिको स्वभावगत विशेषता नै हो तीन गुणको समावस्थामा सृष्टि सम्भव छैन । सृष्टिका लागि गुणहरूको वैषाम्य आवश्यक हुन्छ तर पनि वैदिक आदर्श त यही नै हो – जसरी पृथ्वीले सवै मनुष्यको रक्षा गर्छिन्, त्यसै गरी एकले अर्कालाई सहयोग गर्नु हामी सवैको परम कर्तव्य हो ।[१०] यस्तो सामञ्जस्य पूर्ण सहयोगको लागि समाजमा समर्पण भाव अपरिहार्य तत्त्वका रूपमा रहेको हुन्छ ।

५. समर्पणभाव र यज्ञ संस्कृति – समाजमा सामञ्जस्यका लागि आत्मसमर्पण आवश्यक हुन्छ । आत्मसमर्पणले समाजको अस्तित्वलाई वल र जीवन प्रदान गर्दछ । यज्ञभावना र दानभावना वैदिक समाजको प्राणतत्त्व हो । हाम्रा पूर्वज मनीषीहरूले आफ्नो गृहागतका लागि यथेष्ट सम्मान गरेर उनीहरूलाई प्रचुर धन दिने गर्दथे ।[११] उनीहरूले समाजको सुव्यवस्थाका लागि परस्पर एक अर्कालाई सहायता गर्नु परमावश्यक मान्दथे ।[१२] उनीहरूको मत थियो दाता दीर्घ जीवन (आयु) प्राप्त गर्नुका साथै जरामरणशून्य स्थानमा जान्छ ।[१३] उनीहरूको अनुभव थियो दाताको नामको मृत्यु हुँदैन, दाता दरिद्र हुँदैन, उसलाई क्लेश, व्याधि र दु:खले सताउँदैनन् । दातालाई सम्पूर्ण स्वर्ग र मृत्यु लोकका पदार्थ सुलभ हुन जान्छन् ।[१४] उनीहरूको निर्देशन थियो याचकलाई अवश्य दान दिनुपर्छ धन रथका चक्रसमान चलायमान हुने हुँदा एकै व्यक्तिमा कहिले पनि स्थिर रहँदैन ।[१५] उनीहरूको स्पष्ट धारणा थियो जो स्वार्थी छ, त्यसले अन्न(धन) उत्पादन गर्नु व्यर्थ छ । यस्तो उत्पादनले उत्पादकको नै वध गराइदिन्छ । जसले आफ्नो धनलाई न त धार्मिक कार्यमा लगाउँछ, दु:ख परेका वेला न आफ्ना इष्टमित्र हितैषीहरूलाई सहयोग गर्छ, त्यस्ता आफ्नो पेट मात्र भर्ने पापी हुन् र पापीहरू सत्पथवाट जादैनन् ।[१६] एक्लै भोग गर्नेले पापलाई भोग गर्दछ । त्यसैले तैत्तिरीयोपनिषद्ले अनेक कारणवाट दान दिने प्रेरणा दिँदै भनेको छ – मनुष्यले श्रद्धापूर्वक दिनुपर्छ, समाजको लज्जा मानेर दिनुपर्छ, भविष्यको भयका कारण दिनुपर्छ र मित्रताका कारण दिनुपर्छ ।[१७] त्यागयुक्त भोगको भावनाले नै सवै मनुष्यहरूमा कल्याणको लागि उत्सर्गित हुने प्रेरणा दिन्छ ।[१८] यस्तै उत्सर्ग भावनामा नै सुन्दर समाजको आधारशिला रहेको हुन्छ यही नै इष्ट र पूर्त कर्म हो । जसलाई सम्पन्न गर्न अगिनसमान तेजस्वी गृहस्थ एवं समाजका नेतालाई प्रेरणा दिइएको छ । यही नै वैदिक जागृति र उद्वोधन हो ।[१९]

सवै किसिमका यज्ञहरूवाट वायुशुद्ध गराएर साना ठूला सवै प्रकारका प्राणीहरूको उपकार गर्नु इष्टकार्य हो। पिउने पानीको व्यवस्था, धर्मशाला निर्माण, कुवा खनाउनु, अन्नदान, उद्यान निर्माण आदि काम गरेर प्राणी मात्रको लागि सुख-सुविधा प्रदान गर्नु पूर्त कार्य हो । यस्ता उदार भावनाले उन्नत समाजको निर्माण गर्दछ । यही नै यज्ञ

---

[५] उद्वुध्यध्वं समनस: सखाय: । - ऋग्वेद १०।१०११ ।

[६] यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥ - वा.सं. ४०।४ ।

[७] मा भ्राता भ्रातरं द्विक्षत् मा स्वसारमुत स्वसा ।
जायापत्ये मधुमतीं वाचं वदतु शन्तिवाम् ॥ – अथर्ववेद ३।३०।३ ।

[८] संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।
समानमस्तु वो मनो यथा व: सुसहासति ॥ – ऋग्वेद १०।१९१। २-४ ।

[९] समो चिद्धस्तौ न समं विविष्ट: । मयोश्चिन्न समा वियांणि । – ऋग्वेद १०।११९।९ ।

[१०] अथर्ववेद १२।१।४२ ।

[११] ऋग्वेद २।१।३।४, ५।४।५ ।

[१२] ऋग्वेद १।२६।३ ।

[१३] ऋग्वेद १।१२५।६ ।

[१४] ऋग्वेद १०।१०७।८ ।

[१५] ऋग्वेद १०।११७।५ ।

[१६] मोघमन्नं विन्दते अप्रचेता: सत्यं व्रवीति वध इत् तस्य ।
नार्यमणं पुष्यति ता सखायं केवलाघो भवति केवलादी ॥ – ऋग्वेद १०।११७।६ ।

[१७] श्रद्धया देयम्, श्रिया देयम्, ह्रिया देयम्, भिया देयम्, संविदा देयम् । – तैत्तिरीयोपनिषद् १।११।३ ।

[१८] तेन त्यक्तेन भुञ्जीथा: । – शुक्लयजुर्वेद ४०।१ ।

[१९] उद्वुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते संसृजेथामयं च । शुक्लयजुर्वेद १५।५४ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतिको मूल उद्देश्य हो । वेदमा यज्ञमय जीवनको प्रार्थना गरिएको छ ।[२०] यज्ञ अध्वर (अहिंस्र)[२१] हो र यो हिंसा रहित छ । अहिंसा यज्ञको एउटा रूप हो । दिनु, सहायता गर्नु र दुःख निवारण गर्नु यज्ञ हो । सत्पुरुषहरूको संगतिद्वारा सबैको कल्याणार्थ सत्ज्ञान प्राप्त गर्नु एवं सत्व्यवहार सिक्नु यज्ञ हो । सूर्य र चन्द्रमा समान उन्नत शिल्प, उन्नत उद्योग र उन्नत विज्ञान यज्ञ हो । यज्ञ त्यसै पवित्र भावनाको नाम हो, जसले अनुष्ठान पूर्व सत्याचरणको प्रतिज्ञा गराउँछ ।[२२] यज्ञ सत्य हो र यसले सबैको कल्याण गर्दछ । कुनै पनि समाजलाई त्याग भावनाले नै उन्नत वनाउँछ । समाजको अस्तित्वका लागि आत्मसमर्पण नै सवैभन्दा उत्तम भावना हो । यही आत्मसमर्पण नै आरोहण हो, प्रगति हो र प्रत्येक प्राणीको लक्ष्य पनि हो ।[२३] समस्त समाजमा वन्धुत्व र मित्रताको भावना नै वैदिक समाज व्यवस्थाको आदर्श हो, त्यसैले उनीहरूको दृढ विश्वास थियो – हामीहरू एकले अर्कालाई मित्रको आँखाले हेरौं ।[२४] यसै भावले नै सवै दिशाहरू हाम्रा मित्र होऊन् [२५] भन्ने सदिच्छा प्रकट हुन सक्दछ ।[२६] यसै भावनालाई अगाडि सार्दै वेदको आदेश छ – मनुष्यले सवै तिरवाट मानवको रक्षा गर्नु पर्दछ ।[२७] यही नै व्यापक विश्वपरिवारको वैदिक भावना हो । यसमा कहीं पनि ठूलोसानोको लेशमात्र पनि अवकाश छैन । वैदिक परिवार संरचनाको कल्पना न त जातिभेदमा आधारित छ न त वंश परम्पराको सीमित परिधिभित्र । वेदका मतमा दस्यु जसरी कुनै जाति हैन त्यसै गरी आर्य पनि जाति हैन । ऋग्वेदका अनुसार कर्महीन, आलसी, अविश्वासी र मानवीय गुणहरूले रहित व्यक्ति नै दस्यु हो ।[२८] जो श्रद्धाहीन तथा केवल धनका पछि लागेका छन् ती राक्षस हुन् ।[२९]

